त्रिभिश्श्लोकसहस्रैस्तु त्रिभिर्वृत्तशतैरपि ।
पराशरोदितं धर्मशास्त्रं प्रोवाच सुव्रत ॥
नमोऽस्तु याज्ञवल्क्याय मनवे विष्णवे नमः ।
गौतमाय वसिष्ठाय नमः पाराशराय च ॥

Colophon:

इति श्रीबृहत्पाराशरे धर्मशास्त्रे सुव्रतप्रोक्तसंहितायां योगोपदेशो नाम द्वादशोऽध्यायः ॥

---

No. **2662.** बृहद्विष्णुस्मृतिः.

BṚHADVIṢṆUSMṚTIḤ.

Substance, paper. Size, 12 × 9⅝ inches. Pages, 77. Lines, 21 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, new.

Complete in 96 Adhyāyas.

Beginning:

ब्रह्मरात्र्यां व्यतीतायां वि(बु)बुधे पद्मसंलवो(भवः) ।
विष्णुस्सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलानुगाम् ॥
जलक्रीडा(डो)रुविश्रुतं (श्रान्तं) कल्पाहि(दि)षु यथा पुरा ।
वाराहमास्थितो रूपमुज्जहार वसुन्धराम् ॥
वेदपादोरुपदंष्ट्रः क्रतुवक्रः चितीमुखः ।
अग्निजिह्वो दल(र्भ)केरो (शो) ब्रह्मशीर्षो महातपाः ॥

**Colophon:**

इति श्रीवैष्णवे धर्मशास्त्रे प्रथमोऽध्यायः ॥

**End:**

ज्योतिषामपि च ज्योतिः तमसः परमुच्यते ।
ज्ञानज्ञेयज्ञानगम्यं हृदि सर्वमधिष्ठितम् ॥
इति क्षेमं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
महत्त एतद्विज्ञा[ना]य मद्भक्तायोपपद्यते ॥

**Colophon:**

इति वैष्णवे षष्ठन(ण्ण)वतितमोऽध्यायः ।
इत्येवमुक्ता वसुमती शिरसा जानुभ्याश्च नमस्कारं कृत्वोवाच ॥

---

## No. 2663. मनुस्मृतिः.

## MANUSMṚTIḤ.

Substance, paper. Size, 13 × 8⅛ inches. Pages, 273. Lines, 19 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in 12 Adhyāyas.

**Beginning:**

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥
मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन् सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवानाश्च धर्मान्नो वक्तुमर्हसि ॥
जरायुजाण्डजानाश्च तथा नन्वो(सस्वे)दजोद्भिदाम् ।
भूतग्रामस्य सर्वस्य उत्पत्तिं प्रलयन्तथा ॥

आचाराणाञ्च सर्वेषां तथा कार्यविनिर्णयम् ।
यथाकालं यथायोगं वक्तुमर्हस्यशेषतः ॥

त्वमेको प्यासि(ह्यस्य) सर्वस्य विधानस्य स्वयंभुवः ।
अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो ॥

स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचा तथान् (र्च्य तान्) सर्वान् महर्षीञ्च्छ्रूयतामिति ॥

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥

ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥

योऽसावतीन्द्रियग्राह्यस्सूक्ष्मोऽव्यक्तस्सनातनः ।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥

शौ(सोऽ)भिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥

**End:**

एवं यस्सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन् द्विजः ।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ॥

**Colophon:**

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वादशोऽध्यायः ॥

इति मनुसंहिता समाप्ता ॥

## No. 2664. मनुस्मृतिः.

### MANUSMṚTIḤ.

Substance, paper. Size, 12⅝ × 8 inches. Pages, 244. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 12 Adhyāyas.

Same work as the above.

---

## No. 2665. मनुस्मृतिः.

### MANUSMṚTIḤ.

Pages, 183. Lines, 8 on a page.

Begins on fol. 83*a* of the MS. described under No. 2616.

Complete.

Same work as the above.

---

## No. 2666. मनुस्मृतिः.

### MANUSMṚTIḤ.

Pages, 101. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 2612.

Complete in 12 Adhyāyas.

Same work as the above.

---

## No. 2667. मनुस्मृतिः.

### MANUSMṚTIḤ.

Substance, paper. Size, 12 × 7¾ inches. Pages, 220. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete in 12 Adhyāyas.

Same work as the above.

## No. 2668. मनुस्मृतिः.

## MANUSMṚTIḤ.

Substance, palm-leaf. Size, $16\frac{5}{8}$ × $1\frac{1}{4}$ inches. Pages, 144. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete in 12 Adhyāyas.

Same work as the above.

---

## No. 2669. मनुस्मृतिः.

## MANUSMṚTIḤ.

Substance, palm-leaf. Size, 16 × $1\frac{1}{2}$ inches. Pages, 200. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, not new.

Complete in 12 Adhyāyas.

Same work as the above.

Copying is said to have been completed on Friday, the third day of Phālguna-Śukla in the year Saumya by Kuppāśāstri son of Subbā-dīkṣitar.

सौम्याब्दे फाल्गुने मासि शुक्लपक्षतृतीयके ।
भृगुवारोत्तराभाद्रे (लि)खितेयं मनुस्मृतिः ॥
अप्पाशास्त्र्यभिधानेन सुब्बयज्वात्मजेन च ।
विदुषाश्चात्मजानाञ्च ज्ञापनाय हिताय च ॥

---

## No. 2670. मनुस्मृतिः.

## MANUSMṚTIḤ.

Substance, palm-leaf. Size, $16\frac{7}{8}$ × $1\frac{3}{8}$ inches. Pages, 264. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, not very old.

Complete in 12 Adhyāyas.

Same work as the above.

## No. 2671. मनुस्मृतिव्याख्या.

## MANUSMṚTIVYĀKHYĀ.

Substance, palm-leaf. Size, 16 × 1¼ and 16¾ × 1½ inches. Pages, 406. Lines, 7 on a page. Character, Grantha, and Telugu. Condition, slightly injured. Appearance, new.

Adhyāyas 1 to 11 complete; 12th incomplete.

They are not given in the proper order.

The commentary is by Nanda Paṇḍita.

**Beginning:**

मनुमेकाग्रमिति । मनुस्स्वायंभुवः । तथाच वक्ष्यति—
स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयदिति ।

एकाग्रमवहितम् । अनेन वक्ष्यमाणेष्वर्थेषु सन्देहराहित्यमभिप्रेतम् । भगवन्निति । न केवलं त्रैवर्णिकानामेव ; किन्तु शूद्राणामपीत्युक्तं सर्वशब्दग्रहणेन । अन्तरप्रभवानां वर्णसंकरजानां धर्मान् विहितानुष्ठान-प्रतिषिद्धवर्जनलक्षणान् । जरायुजेति । भूतग्रामस्य महदादितत्त्वसङ्घस्य । आचाराणामिति । कार्याणां विवादवा(प)दानां यथाकालमवसरे प्राप्ते । यथायोगम् उचितेनोपायेन लक्षणेन प्रतिपा(प)दोक्त्या वेति यावत् । त्वमेक इति । विधीयत इति विधानम् । स्वयंभुवा भगवता विहित-स्याचिन्त्यस्य दुर्ज्ञानस्य अप्रमेयस्यापर्यन्तस्य सर्वस्य प्राणिजातस्य कार्यं धर्मस्तस्य तत्त्वं पं(पा)रमार्थ्यन्तस्यार्थं प्रयोजनमभ्युदयसिद्धि-रूपन्त्वमेको वेत्सि ; तेन भवानेव प्रष्टव्यो नान्य इति । स इति । आर्च्य भवन्त एव सर्वज्ञा इति वाचा सम्भाव्य.

**End:**

अथ शास्त्रार्थसारत्वेन उपदिष्टयोः परमात्मज्ञानयोगयोरादरातिश-यार्थं ज्ञानन्तावत् प्रपश्चइ(य)ति सर्वमिति । सदसति कार्य[कार्य]कारणे चिदाचिति वा सर्वमात्मनि संपश्येत् आत्मनि सर्वमाकाशे वायुमिव स्थितं पश्येदित्यर्थः । नाधर्मे कुरुते मन इत्यनेन ज्ञानस्यानुषाङ्गिकं

(फलमु)क्तम् । आत्मैवेति । सर्वदेवता आत्मैव सर्वा देवताः परमात्मनो विभूताः । सर्वमात्मन्य(व)स्थितं सर्वमात्मप(र)तन्त्रमित्यर्थः । पारतन्त्र्यमेवो(त्तरार्धेनोपपादितम्).

---

## No. 2672. मनुस्मृतिस्सव्याख्या.

## MANUSMṚTIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1$ inches. Pages, 204. Lines, 10 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Wants beginning.

The text begins on fol. 82*a*.

---

## No. 2673. यमस्मृतिः.

## YAMASMṚTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 40*b* of the MS. described under No. 1203.

Complete.

**Begining:**

प्रायश्चित्तीयतां प्राप्य ये नरास्त्वकृतव्रताः ।
तेषां दंसं(ण्डं) व्रतश्चापि क्रमशश्चोदितं शृणु ॥
स्वयमेव तु यः पापं निवेद्य व्रतमाचरेत् ।
तस्मिन्दमे(मो) न[:] प्रयोज्या(ज्यः) व्रतं दण्डश्च गृह्यते ॥

**End:**

कण्टकानान्तु काथितमन्याये प्रथमेऽन्वयः ।
चतुर्विधा क्रिया प्रोक्ता संसिध्यति (हि) मार्गत[ा]ः ॥
कुलादयो विपा(वा)दस्य श्रवणेऽधिकृतान् ग(क्र)मात् ।
कोणेऽप्यधिगता शास्त्रे.

**Colophon:**

यमस्मृतिस्समाप्ता ॥

## No. 2674. यमस्मृतिः.

## YAMASMṚTIḤ.

Pages, 6. Lines, 11 on a page.

Begins on fol. 22*a* of the MS. described under No. 2614.

Complete.

**Beginning :**

आश्रमस्थं सुखासीनं वेदशास्त्रविशारदम् ।
अपृच्छन्नृषयो गत्वा यमं (सं)यत[त]मानसम् ॥

ऋषयः—

महापातकसंयुक्ता उपपातकिनस्तथा ।
यैर्यैर्व्रतैर्विशुध्यन्ति तन्नो ब्रूहि महामुने ॥

यमः—

दिवा वातार्कसंस्पृष्टं रात्रौ नक्षत्रमारुतैः ।
सन्ध्याद्वयोर्वा सन्ध्याभ्यां पवित्रं सर्वदा जलम् ॥
स्वभावयुक्तमव्याप्तममेध्येन सदाशुचि[ः] ।
श्वपादोष्ट्रहयाद्यैश्च मानुषैश्चरितं विना ॥
दष्टस्स्नात्वा शुचिस्सद्यो नरस्सन्ध्यादिरात्रिषु ।
अन्त्याद(म)ज्ञानतो भुक्त्वा चण्डालान्नमथापि वा ॥
गोमूत्रयावकाहारो दशरात्रेण शुध्यति ।
जलाग्निबन्धनभ्रष्टाः प्रव्रज्यानाशका(ः)च्युताः ॥
विषप्रपतनप्रायाः शस्त्रघातघ(गं)ताश्च ये ।
नवैते प्रत्यवसिताः सर्वधर्मबहिष्कृताः ॥

**End :**

तत्रापि दोषश्च पशुप्रमाणं नचा(नाच)क्षते धर्मविदस्तथैव ।
आरण्यका ये यदि दंष्ट्रिणस्तु गायत्रियन्ते यादि ता अदग्धम् ॥

पापान्न रोद्धुं न च पाशु(श)दातुर्धारास्स्वहस्ताग्र(त्र)वदन्ति पापम् ।
एको हतो यो बहुभिर्नृपरसन् यो ज्ञायते यस्य मृतोपघातैः ॥
दिव्येन तेषामुपलभ्य (म्मुसलस्य)हन्ता निवर्तयेद्यो नृपसन्नियुक्तैः ।
सत्यन्तये(सन्त्यक्तजी)वो मृतये [ते] कदाचित् हताग(यस्ताव)तां
पातकशुद्धि कुर्यात् ॥
तर्कै(त्तत्) प्रमाणं(णैः)प्रतितर्कयित्वा केचिद्वदन्त्येवमिमं प्रमाणम् ।
नित्यन्त(न्तु)जीवो मृ(म्रि)यते कदाचित् वेदैश्च पृष्टन्नृ(दृष्टं त्वृ)षिभिश्च
गीतम् ॥
चान्द्रायणादीनि सुपावनानि पापा यदिच्छन्ति हिताय कर्तुम् ।
संसारमिच्छान्ति फलन्तथा स्युर्ज्ञानप्रदीपेन तमोऽन्धकारे ॥

**Colophon:**

इति यमेन कृतं धर्मशास्त्रं समाप्तम् ॥

---

No. **2675.** यमस्मृतिः.

YAMASMṚTIḤ.

Pages, 5. Lines, 9 on a page.

Bings on fol. 44*b* of the MS. described under **No.** 2 611.

Complete.

Same work as the above.

---

No. **2676.** याज्ञवल्क्यस्मृतिः.

YĀJÑAVALKYASMṚTIḤ.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 120. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete in 3 Adhyāyas.

**Beginning:**

योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणान्नो ब्रूहि धर्मानशेषतः ॥

मिथिलास्थस्स योगीन्द्रः (क्षणं) ध्यात्वाब्रवीन्मुनीन् ।
यस्मिन्देशे मृगः कृष्णः तस्मिन्धर्मान्निबोधत ॥

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि (विद्यानां) धर्मस्य च चतुर्दश ॥

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिर[ा]ः ।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥

पराशर(व्यासशङ्ख)लिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ॥

देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् ।
पात्रे प्रदीयते (यत्तत्सकलं धर्मलक्षणम्) ॥

* * * *

**Colophon :**

इति याज्ञ्यवल्क्यधर्मशास्त्रे आचारं(रो) नाम प्रथमोऽध्यायः ॥

व्यवहारान् नृपः पश्येत् विद्वद्भिर्ब्राह्मणैरसह ।
धर्मशास्त्रानुसारेण क्रोधलोभाविवर्जितः ॥

श्रुताध्ययनसम्पन्नाः धर्मज्ञास्सत्यवादिनः ।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥

* * * *

**Colophon :**

इति याज्ञवल्क्यधर्मशास्त्रे व्यवहारं(रो) नाम द्वितीयोऽध्यायः ॥

**End :**

अयातयामान्यसृतानि वाचा
दिवाकराद्योऽधिजगे यजूंषि ।

तं(स) याज्ञवल्क्यः ककुदं(दो) मुनीना-
मात्स(श्च)यदो ब्रह्मनिधिस्ततोऽत्र ॥
प्रकाशिता येन यजूंषि लोके
भानोस्सकाशात्तपसा द(त्व)वाप्य ।
तं याज्ञवल्क्यं ककुदं मुनीनां
नमस्करोम्यार्तिहरं मुनीन्द्रम् ॥

**Colophon:**

इति याज्ञवल्क्यविरचिते धर्मशास्त्रे तृतीयोऽध्यायः ॥

---

## No. **2677.** याज्ञवल्क्यस्मृतिः.

### YĀJÑAVALKYASMṚTIḤ.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 22. Lines, 7 on a page. Character, Grantha. Condition good. Appearance, old.

Begins on fol. 1*a*. The other work herein is : Māghamāhātmyam 12*a*.

It begins in the course of the 2nd Adhyāya and breaks off in the 3rd.

---

## No. **2678.** याज्ञवल्क्यस्मृतिः.

### YĀJÑAVALKYASMṚTIḤ.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 36. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Vyavahārakāṇḍa (2nd Adhyāya) complete.

## No. 2679. याज्ञवल्क्यस्मृतिः.

## YĀJÑAVALKYASMṚTIḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 74. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Adhyāyas 1 and 2 complete; third incomplete.

Begins on fol. 1*a*. The other work herein is, Aparaviṣaya 38*a*.

---

## No. 2680. याज्ञवल्क्यस्मृतिः.

## YĀJÑAVALKYASMṚTIḤ.

Pages, 44. Lines, 8 on a page

Begins on fol. 57*a* of the MS. described under No. 2619.

Adhyāya 1, complete; II, incomplete.

---

## No. 2681. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

## YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 834. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

3 Adhyāyas complete.

**Beginning:**

धर्माधर्मौ तद्विपाकास्त्रयोऽपि क्लेशाः पञ्च प्राणिनामायतन्ते ।
यस्मिन्नेतैर्नो परामृष्ट ईशो यस्तं वन्दे विष्णुमोङ्कारवाच्यम् ॥

याज्ञवल्क्यमुनिभाषितं मुहुः विश्वरूपविकटोक्तिविस्तृतम् ।
धर्मशास्त्रमृजुभिर्मिताक्षरैः बालबोधविधये विविच्यते ॥

याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपं याज्ञवल्क्यप्रणीतं धर्मशास्त्रं संक्षिप्य कथयामास; यथा मनुप्रोक्तं भृगुः ।

तस्य चायमाद्यश्लोकः—

योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणान्नो ब्रूहि धर्मानशेषतः ॥

योगिनां सनकादीनामीश्वरः श्रेष्ठो योगीश्वरः तं याज्ञवल्क्यसंज्ञं संपूज्य मनोवाक्कायकर्मभिः पूजयित्वा मुनयः सामश्रवःप्रभृतयः श्रवणधारणयोग्याः । अब्रुवन् उक्तवन्तः नः अस्मभ्यं धर्मान् ब्रूहीति । कथम्? अशेषतः कात्स्न्र्येन । केषाम्? वर्णाश्रमेतराणां वर्णा ब्राह्मणादयः आश्रमाः ब्रह्मचारिप्रभृतयः इतरे अनुलोमप्रतिलोमजाता मूर्धावसिक्ताम्बष्ठादयः । इतरशब्दस्य द्वन्द्वे[ति]चेति सर्वनामसंज्ञाप्रतिषेधः । अत्र धर्मशब्दष्षड्विधस्मार्तधर्मविषयः । तद्यथा — वर्णधर्म(र्मो)वर्णाश्रमधर्म(र्मो) गुणधर्म(र्मो)निमित्तधर्म(ः)साधारणधर्मश्चेति । तत्र वर्णधर्मो नित्यं ब्राह्मणो मद्यं वर्जयेदित्यादिः ॥

* * * *

**Colophon:**

इति श्रीपद्मनाभभट्टोपाध्यायस्य श्रीमत्परमहंसपरिव्राजकाविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ प्रथमोऽध्यायः समाप्तः ॥

**End:**

एतदृषिभाषितं श्रुत्वा योगीन्द्रोऽपि स्वनिर्मितधर्मशास्त्रधारणादिफलप्रार्थनोन्मीलितमुखपङ्कजः स्वयम्भुवे ब्रह्मणे च प्रणम्य भवत्प्रार्थितं सकलमिदं भवत्वित्येवं किल भगवान् बभाषे ॥

**Colophon:**

इति भरद्वाजगोत्रपद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ तृतीयोऽध्यायः (समाप्तः) ॥

* * * *

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः ।
धर्मशास्त्रस्य विवृतिः विज्ञानेश्वरयोगिनः ॥

इति याज्ञवल्क्यमुनिशास्त्रगता विवृतिर्न कस्य विहिता विदुषः ।
ऋ(प्र)मिताक्षरापि विपुलार्थवती परिषिञ्चति श्रवणयोरमृतम् ॥

गम्भीराभिः प्रसन्नाभिः वाग्भिर्नाम्ना मिताक्षरं(रा) ।
अनल्पाभिरथाल्पाभिः विवृतिर्विहिता मया ॥

विज्ञाननाथचरिता वृत्तिर्या तु मिताक्षरा ।
सेयं द्वादशसाहस्री संख्याता ग्रन्थसंख्यया ॥

यतः प्रपञ्चसंभूतिविभूतिपरिभूतयः ।
पुरुषाय नमस्तस्मै परस्मै चिन्मयात्मने ॥

---

No 2682. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, paper. Size, $12\frac{5}{8} \times 7\frac{7}{8}$ inches. Pages, 238. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Vyavahārakāṇḍa with Anukramaṇikā, complete.

The commentary is by Vijñānēśvara, son of Padmanābhabhaṭṭa.

**Beginning :**

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः ; तच्च दुष्टनिग्रहमन्तरेण न संभवति ; दुष्टपरिज्ञानञ्च न व्यवहारदर्शनेन विनेति व्यवहारदर्शनमहरहः कर्तव्यमित्युक्तम्—

ऽव्यवहारान् स्वयं पश्येत्सभ्यैः परिवृतोऽन्वहमिति । स च व्यवहारः कीदृशः कतिविधः कथं वेतीतिकर्तव्यताकलापो नाभिहितोऽतस्तदभिधानाय द्वितीयोऽध्याय आरभ्यते ।

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैस्सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥

व्यवहारानिति । अन्यविरोधेन स्वात्मसंबन्धितया कथनं व्यवहारः; यथा कश्चिदिदं क्षेत्रं मदीयमिति कथयति, अन्योऽपि तद्विरोधेन मदीयमिति । तस्यानेकविधत्वं दर्शयति बहुवचनेन । नृप इति । न क्षत्रियमात्रस्यायं धर्मः ; किन्तु प्रजापालनेऽधिकृतस्यान्यस्यापीति दर्शयति । पश्येदिति । पूर्वोक्तस्यानुवादो धर्मविशेषविधानार्थः । विद्वद्भिर्वेदव्याकरणादिधर्मशास्त्राभिज्ञैर्ब्राह्मणैस्सह न क्षत्रियादिभिः । ब्राह्मणैस्सहेति तृतीयानिर्देशात्तेषामप्राधान्यं सहयुक्तेऽप्रधान इति स्मरणात् । अतश्चादर्शनेऽन्यथादर्शने च राज्ञो दोषो न ब्राह्मणादीनां यथाह मनुः—

अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकञ्चैव पश्यति ॥

**End:**

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः ।
धर्मशास्त्रस्य विवृतिः विज्ञानेश्वरयोगिनः ॥

**Colophon:**

इति श्रीपद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजकस्य विज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां संहितायां याज्ञवल्क्यधर्मशास्त्रविवृतौ द्वितीयोऽध्यायः समाप्तः ॥

अस्मिन्नध्याये प्रकरणानुक्रमणिका कथ्यते ।

आद्यं व्यवहारमातृका, भुक्तिलक्षणम्, ऋणादानं, निक्षेपः, साक्षिलक्षणं, लेख्यलक्षणं, दिव्यरूपकथनं, दायविभागः, सीमाविवादः, स्वामिपालविवादः, अस्वामिविक्रयः, दत्ताप्रदानी(नि)कम्, क्रीत्वानुशयः, अभ्युपेत्य गुरुशि(शु)श्रूषा, संविद्व्यतिक्रमः, वेतनादानं, द्यूतसमाह्वयाख्यं, वाक्पारुष्यं, दण्डपारुष्यं, साहसप्रकरणं, विक्रीय्या(या)संप्रदानं, संभूयसमुत्थानं, स्तेयप्रकरणं, स्त्रीसंग्रहः, प्रकीर्णकमिति पञ्चविंशतिप्रकरणानि ।

इति याज्ञवल्क्यमुनिशास्त्रगता
विवृतिर्न कस्य विहिता विदुषः ।
प्रमिताक्षरापि विपुलार्थवती
परिषिञ्चति श्रवणयोरमृतम् ॥

---

No. 2683. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf (Śrītāla). Size, $18\frac{3}{8} \times 2$ inches. Pages, 117. Lines, 14 on page. Character, Grantha. Condition, good. Appearance, old.

I Adhyaya, complete; II, 32 Ślōkas.

Begins on fol. 1*a*. The other work herein is, Sōmaprayōga 60*a*.

---

No. 2684. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 226. Lines, 9 on a page. Character, Telugu. Condition, very good. Appearance, new.

Second Adhyāya or Vyavahāra-Kaṇḍa, complete.

Said to have been written by Addangi Nāganna for Avanarālapadma Raju, on the Śuddhatrayōdaśī of the month of Āṣāḍha in the year Dundubhi.

---

No. 2685. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 398. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in Sāhasa Prakaraṇa in the Vyavahārakāṇḍa.

No. 2686. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf (Śrītāla). Size, 8⅝ × 1⅝ inches. Pages, 411. Lines, 9 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Vyavahārakāṇḍa with Anukramaṇikā complete.

---

No. 2687. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, 15⅝ × 1⅛ inches. Pages, 644. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, new.

Prāyaścittakāṇḍa (3rd Adhyāya) complete.

**Beginning :**

ग्रहस्थाश्रमिणां नित्यनैमित्तिकधर्मा उक्ताः । अभिषेकादिगुणयुक्तस्य ग्रहस्थविशेषस्य गुणधर्माश्च दर्शिताः । अधुना तदधिकारसंकोचहेतुभूताशौचप्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते । आशौचशब्देन च कालस्नानापनोद्यः पिण्डोदकदानादिविधेरध्ययनादिपर्युदासस्य च निमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते न पुनः कर्मानधिकारमात्रम् ।

* * * *

तत्राशौचिभिस्सपिण्डाद्यैर्यत्कर्तव्यं तत्तावदाह—

ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ।
आ श्मशानादनुव्रज्य इतरोज्ञा(रैर्ज्ञा)तिभिर्वृतः ॥
यमसूक्तं तथा गाथां जपद्भिर्लौकिकाग्निना ।
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ॥

ऊने अपरिपूर्णे द्वे वर्षे यस्यासौ ऊनद्विवर्षः तं प्रेतं निखनेत् भूमाववटं कृत्वा निदध्यात् न पुनर्दहेदित्यर्थः ॥

End:

इति याज्ञवल्क्यमुनिशास्त्रगता
विवृतिर्न कस्य विहिता विदुषः ।
प्रमिताक्षरापि विपुलार्थवती
परिषिञ्चति श्रवणयोरमृतम् ॥
गम्भीराभिः प्रसन्नाभिर्वाग्भिर्नाम्ना मिताक्षरा ।
अनल्पार्थाभिरत्वा(ल्पा)भिर्विवृतिर्विहिता मया ॥
नासीदस्ति भविष्यति क्षितितले कल्याणकल्पं पुरं
नो दृष्टः श्रुत एव वा क्षितिपतिः श्रीविक्रमार्कोपमः ।
विज्ञानेश्वरपण्डितो न भजते किञ्चान्यदन्योपमा-
माकल्पं स्थिरमस्तु कल्पलतिकाकल्पं तदेतत्त्रयम् ॥
स्रष्टा वाचां मधुलवमुचां विद्वदाश्चर्यसीम्नां
दातार्थानामतिशयजुषामर्थिसार्थार्थनाय ।
ध्याता मूर्तेर्मुरविजयिनो जीवतादार्कचन्द्रं
जेतारीणान्तनुसहभुवां तत्त्वविज्ञान(प)नाद्यः ॥
प्रमातीचे नभोमासे लिखितं चेन्नपट्टणे ।
कम्भाल्लरुन्नृसिंहेन धर्मशास्त्राब्धिमज्जता ॥

---

No. 2688. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, 12⅜ × 1 inches. Pages, 162. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Prayaścittakāṇḍa, complete.

Begins on fol 1*a*. The other works herein are: Dharmaśāstram 82*a*, Gāyatrīvarṇamālāstōtra 158*a*, Sandhyāvandanavidhi 159*b*, Prāyaścittavidhi 162*a*.

Copying is said to have been finished on Tuesday, the 12th day of the dark fortnight in the month of Puṣya of the year Pramātīca.

प्रमातीचे पुष्यमासे लिखितं चेन्नपट्टणे ।
कृष्णेन रामभट्टेन धर्मशास्त्राब्धिमज्जतो(ता) ॥

---

No. **2689.** याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 422. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Vyavahāra, complete; Prāyaścitta, incomplete.

Begins on fol. 25*a*. The other works herein are: Ācārabhāga 1*a*, Dāyabhāgaviṣaya 8*a*.

---

No. **2690.** याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 254. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Vyavahāra, complete with index.

कीलकबाहुळबहुळस्मरदिवसे पूर्वदेवगुरुवारे ।
भारतितिम्मयविदुषा लिखितं व्यवहारकाण्डमिदमखिलम् ॥

---

No. **2691.** याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, paper. Size, $13\frac{1}{4} \times 5\frac{1}{4}$ inches. Pages, 230. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Vyavahārakāṇḍa, complete.

## No. 2692. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Pages, 26. Lines, 17 on a page.

Begins on fol. 16*a*. of the MS. described under No. 459.

Dāyabhāgaprakaraṇa to the end of Rikthavibhāgaprakaraṇa.

---

## No. 2693. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf (Srītāla). Size, 19½ × 2 inches. Pages, 211. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Vyavahāra incomplete.

---

## No. 2694. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, 18½ × 1⅝ inches. Pages, 270. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Vyavahāra complete.

Wants the first leaf.

Said to have been copied by Īyuṇṇi Raghupatidās.

---

## No. 2695. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARA.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 380. Lines, 5 on a page. Character, Nandināgarī. Condition, Good. Appearance, old.

Vyavahāra complete.

Begins on fol. 1*a*. The other work herein is, Madanapārijāta 191*a*.

## No. 2696. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 69. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Vyavahāra incomplete.

Begins on fol. 1*a*. The other works herein are, Ṣaḍaśītiḥ 36*a*, Prētasaṁskāravidhiḥ 45*a*., Smṛtisiddhāntasaṅgraha 50*a*, Dattamīmāṁsā 97*a*.

---

## No. 2697. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 436. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Prāyaścittakāṇḍa incomplete.

---

## No. 2698. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, palm-leaf. Size, 16⅛ × 1⅛ inches. Pages, 176. Lines, 5 on a page. Character, Telugu. Condition, much injured Appearance, new.

Vyavahārakāṇḍa to the end of Ṛṇādānaprakaraṇa.

---

## No. 2699. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, paper. Size, 7⅞ × 6¼ inches. Pages, 42. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 14*a*. The other works herein are, Kavirākṣasīya 1*a*, Sāmudrikaśāstra 37*a*.

Vyavahārakāṇḍa incomplete.

## No. 2700. याज्ञवल्क्यस्मृतिः—मिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH MITĀKṢARĀ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 318. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāya II. complete

---

## No. 2701. याज्ञवल्क्यस्मृतिः—मिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH MITĀKṢARĀ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 374. Lines 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Vyavahārakāṇḍa complete.

Said to have been copied by Kucukuṇḍu Mallayya for Bhāmāvadhāni finsihed on the Bahulasaptamī in the month of Mārgaśira of the year Viṣu.

---

## No. 2702. याज्ञवल्क्यस्मृतिः—मिताक्षरासहिता.

### YĀJÑAVALKYASMṚTIḤ WITH MITĀKṢARĀ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 160. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Dāyabhāga complete, Sīmāvivāda incomplete, in Vyavahārakāṇḍa.

Begins on fol. 1*a*. The other works herein are—Vēdamantrārtha 54*a*, Vāstuhōmavidhi 66*a*, Jātakarmādimantrārtha 68*a*, Gṛhyacandrikā 121*a*, Āśaucadīpikā 130*a*, Viṣṇustōtra 142*a*, Pariśiṣta 145*a*.

## No. 2703. याज्ञवल्क्यस्मृतिः—मिताक्षरासहिता.

## YĀÑJAVALKYASMṚTIḤ WITH MITĀKṢARĀ.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 244. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Vyavahārakāṇḍa – Breaks off in Strīsaṅgrahaṇa.

---

## No. 2704. याज्ञवल्क्यस्मृतिः—मिताक्षरासहिता.

## YĀJÑAVALKYASMṚTIḤ WITH MITĀKṢARĀ.

Substance, paper. Size, $7 \times 4\frac{1}{4}$ inches. Pages, 29. Lines, 22 on a page. Character, Telugu. Condition, injured. Appearance, old.

Vyavahāramātṛkā complete.

Begins on fol. 1*a*. The other work herein is, Raghuvaṁśavyākhyā 17*a*.

---

## No. 2705. याज्ञवल्क्यस्मृतिः—मिताक्षरासहिता.

## YĀJÑAVALKYASMṚTIḤ WITH MITĀKṢARĀ.

Substance, palm-leaf. Size, $18 \times 1\frac{3}{8}$ inches. Pages, 162. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Âcārakāṇḍa complete.

---

## No. 2706. याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

## YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Substance, paper. Size, $13 \times 8\frac{1}{8}$ inches. Pages, 208. Lines, 20 on a page. Character, Grantha Condition, good. Appearance, new.

Prāyaścittakāṇḍa incomplete.

## No. 2707. याज्ञवल्क्यस्मृतिव्याख्यानदीपिका.

## YĀJÑAVALKYASMṚTIVYĀKHYĀNADĪPIKĀ.

Substance, palm-leaf. Size, 19 × 1½ inches. Pages, 182. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Vyavahārakāṇḍa in 8 Prakaraṇas.

By Nirdūri Basavōpādhyāya. Also contains notes in Telugu.

**Beginning:**

राज्ञो राजगुणान्वितस्य परमो धर्मः प्रजापालनं
सम्यग्दुर्जननिग्रहेण तदलं सेद्धेदनं(सिध्येदस)न्निग्रहे ।
कर्तव्ये सति धर्मशास्त्रविधिना यत्नात्त्वया भूभृता
द्रष्टव्यं व्यवहारजालमनिशं श्री(कीर्ति)सौख्यप्रदम् ॥

**End:**

आचार्यश्श्वशुरो गुरुश्च तनयो वा मातुलस्सोदरो
नो दण्ड्योऽस्ति नृपस्ति(श्च) धर्मचरितो दण्ड्योऽस्तु च स्नातकः ।
वानप्रस्थबहुश्रुतौ च जननी तातः पुरोधा यतिः
दण्ड्यादण्ड्यविवेकिना क्रतुशतं नित्यं कृतं भूभृता ॥

इति श्रीदेवराजभट्टोपाध्यायसोमयाजिपुत्रनिर्दूरिबसवोपाध्यायसूरिविरचितायां विज्ञानेश्वरदीपिकायां स्तेयस्त्रीसङ्ग्रहणस्त्रीपुंयोगाख्यप्रकीर्णनिर्णय(यो)नाम अष्टमप्रकरणम् (समाप्तम्) ॥

---

## No. 2708. लिखितस्मृतिः.

## LIKHITASMṚTIḤ.

Pages, 18. Lines, 9 on a page.

Begins on fol. 8*a* of the MS. described under No. 2625.
Complete in 6 Adhyāyas.

**Beginning:**

वसिष्ठाद्याश्च मुनयः लिखितं धर्मरूपिणम् ।
पप्रच्छुर्धर्मशास्त्रार्थं वेदान्तानि द्विजन्मनाम् ॥
चातुर्वर्ण्यस्य धर्माणि प्रायश्चित्तान्यशेषतः ।
वक्तुमर्हसि ब्रह्मर्षे कण्वात्मज महामते ॥
साधु साधु महाप्राज्ञास्सर्वशास्त्रविशारदाः ।
ऐहिकादीन्प्रवक्ष्यामि सङ्ग्रहेण यथामति ॥

लिखितः—

निशान्त्ययामो(मे) विज्ञेयः यामार्धं सन्धिरुच्यते ।
तत्काले तु समुत्थाय विण्मूत्रं विसृजेद्बुधः ॥
गृहाद्दूरं ततो गत्वा वाग्यतः प्रावृतस्ततः ।
उदङ्मुखस्समाविश्य प्रतिबद्धान्यदिङ्मुखः ॥
जलाग्निब्राह्मणादीनां देवानामाभिमुख्यतः ।
लिङ्गं पिधाय वामेन मुखमन्येन पाणिना ॥
मलमुत्सृज्य चोत्थाय न पश्येच्चेतरन्मलम् ।
उद्धृतेन जलेनैव शौचं कुर्याज्जलाद्बहिः ॥
शौचपात्रं करे धृत्वा मूत्रादीनुत्सृजेद्द्विजः ।
तेनैव शौचं कुर्याच्चेदन्यथाशुचिरेव सः ॥
अथवा देवपित्रर्थं तीर्थावतरणं विना ।
सप्त वा पञ्च वा तिस्रः गुदं वा शोधयेन्मृदा ।

* * * *

**Colophon:**

इति लिखितस्मृतौ प्रथमोऽध्यायः ॥

**End:**

अनध्यायेष्वधीतानां प्रजां प्रज्ञां यशश्श्रियम् ॥
आयुष्यं बलमारोग्यं निकृन्तति यमस्स्वयम् ।
अनध्याये तु योऽधीते तं विन्द्या(द्या)द्ब्रह्मघातकम् ॥
न तं संभाषयेद्विप्राः न तेन सह संवसेत् ।
कुण्डगोलकयोः केचित् द्विजातीनाञ्च सत्तमाः ॥
वदन्ति चोपनयनं पुत्रादिषु च जन्मसु ।
अनधीत्य तु यो विद्वान् शास्त्रादिपठने रतः ॥
शूद्रतुल्यस्स विज्ञेयः नरकायोपपद्यते ।
नाचारफलमाप्नोति यथा शूद्रस्तथैव सः ॥
अनध्यायें तु गायत्री सहस्रावृत्तिनी यदि ।
स्वयं भवति संक्रुद्धा तस्य भाग्यक्षयंकरी ॥

**Colophon:**

इति लिखितस्मृतौ षष्ठोऽध्यायः ॥

समाप्ता चेयं स्मृतिः ॥

---

No. 2709. लोहितस्मृतिः.

LŌHITASMṚTIḤ.

Substance, palm-leaf. Size, 17⅝ × 1⅝ inches. Pages, 42. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old

Complete.

Begins on fol. 13*b*. The other works herein are, Viśvāmitrasmṛtiḥ 1*a*, Vasiṣṭhasmṛtiḥ 34*a*.

**Beginning:**

देवयज्ञादिकं वक्ष्ये गृहो(ह्यो)क्तविधिना ततः ।
कोद्रवान्मासुरान्माषान् मसूरान् च कुंलुत्थजान् ॥
लवणञ्च कटुद्रव्यं वैश्वदेवे विसर्जयेत् ।
नीवारवंशजं धान्यं गोधूमान् तण्डुलान्तथा ॥
कन्दमूलफलादीनि दधिक्षीरघृतादिकम् ।
प्रत्यहं वैश्वदेवार्थं कुर्यान्नित्यमतन्द्रितः ॥
गृहस्थो वैश्वदेवस्य कर्म प्रारभते मुदा ।
गृहे सिद्धान्नमादाय दधिक्षीरघृतान्वितम् ॥
औपासने स्वकार्यार्थं सर्वेभ्यः पचते द्विजः ।
यो हि यत्तु हुनेदग्नौ गायत्रीमन्त्रपूर्वकम् ॥
दिवा सूर्याय रात्र(त्रौ) चेदग्नये च हुनेद्धविः ।
प्रजापतये इत्येकामुभयोराहुतिं हुनेत् ॥

**End:**

यत्नादन्यथयन्तो वै नास्माकं सम्मतिः परा ॥
इयमेत्येव मे दुष्टाः तास्सद्यो निर्दयं नृपः ।
एकदा भीषयेच्चेत्तु दण्डसंग्रहणात्परम् ॥
अनया निखिलाश्चापि सद्यश्शान्ता भवन्ति हि ।
अनयानामभावे तु लोकोऽयं सुखमश्नुते ॥
लोको यथा सुखी राजा तदा सर्वान्मरो(नोर)थान् ।
अवशादेव लभते नात्र कार्या विचारणा ॥
इतीदं कथितं शास्त्रं लोहिते(न) महात्मना ।
हिताय सर्वलोकानां सारमुद्धृत्य शास्त्रतः ॥

**Colophon:**

इति लोहितस्मृतिस्संपूर्णा ॥

## No. 2710. वसिष्ठस्मृतिः.

## VASIṢṬHASMṚTIḤ.

Substance, paper. Size, 8 × 6¼ inches. Pages, 127. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*b*. The other works herein are—Anubhavasūtra 70*a*, Mahimnastava 117*a*.

Complete in 10 Adhyāyas.

**Beginning:**

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

गुरुमिक्ष्वाकुवंशस्य वसिष्ठं ब्रह्मसंभवम् ।
पप्रच्छुर्मुनयस्सर्वे पराशरपुरोगमाः ॥

ऋषयः—

भगवन् भवता प्रोक्ता यज्ञदानव्रदात(ताद)यः ।
वर्णाश्रमाणां कर्तव्यास्तथा राज्ञां महीभृताम् ॥

अधुना श्रोतुमिच्छामो विप्राणां विष्णुसेविनाम् ।
कीदृग्विधाः प्रकर्तव्या नित्यनैमित्तिकक्रियाः ॥

आचारः कः क आहारः कीदृग्वृत्तिः क आश्रमः ।
वैष्णवानां मुनिश्रेष्ठ ब्रूहि सर्वमशेषतः ॥

वसिष्ठः—

शृणुध्वं मुनयस्सर्वे सर्वधर्मं सनातनम् ।
वैष्णवानान्तु विप्राणां यद्यदाचरणं शुभम् ॥

सर्गादौ ब्राह्मणास्सृष्टाः वैष्णवांशेन चोदिताः ।
इतरे च त्रयो वर्णाः ब्रह्मणा विष्णुसूनुना ॥
तस्माच्च वैष्णवा विप्राः प्रकृत्या द्विजसत्तमाः ।
अवैष्णवत्वं विप्राणां महापातकसम्मितम् ॥
अवैष्णवस्तु यो विप्रस्सर्वकर्मसु गर्हितः ।
रौरवं नरकं प्राप्य चाण्डालीं योनिमाप्नुयात् ॥
नित्यं नैमित्तिकं काम्यं त्रिविधं श्रुतिचोदितम् ।
अवैष्णवानां विप्राणां कर्मित्वं निष्फलं भवेत् ॥
यो मोहाद्विष्णुमन्येन हीनदेवेन दुर्मतिः ।
स मरस्त्वन्त्यजो(जः) ख्यातो सोऽन्त्यजो नान्त्यजोऽन्त्यजः ॥

* * * *

**Colophon:**

इति वासिष्ठस्मृतौ विशिष्टपरमधर्मशास्त्रे ब्राह्मणकथनं नाम प्रथमोऽध्यायः ॥

**End:**

दद्यात्पुष्पाञ्जलिं तस्मै तेनैव शतसंख्यया ।
आज्यं तेनैव होतव्यमष्टोत्तरशतं ततः ॥
उपचारैस्समभ्यर्च्य नमस्कृत्वा तु भक्तितः ।
वैष्णवान् भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥

**Colophon:**

इति वासिष्ठस्मृतौ विशिष्टधर्मशास्त्रे विष्णुप्रतिष्ठाविधिर्नाम दशमोऽध्यायः ॥

१, २. ब्राह्मणकथनम्.
३. चौळोपनयनवेदव्रतानुष्ठानम्.
४. गर्भाधानादिसीमन्तोन्नयनकथनम्.
५. स्त्रीधर्मकथनम्.
६. भगवन्नित्याराधनम्.
७. भगवत्समाराधनम्.
८. पितृयज्ञः.
९. सापिण्डीकरणम्.
१०. विष्णुप्रतिष्ठा.

## No. 2711. वसिष्ठस्मृतिः.

## VASIṢṬHASMṚTIḤ.

Pages, 81. Lines, 8 on a page.

Begins on fol. 80*a* of the MS. described under No. 2614.

Complete in 9 Adhyāyas.

The reading in this MS. is different from what is found in that described under the previous number, and the Adhyāyas are grouped differently.

---

## No. 2712. वसिष्ठस्मृतिः.

## VASIṢṬHASMṚTIḤ.

Pages, 21. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 2709.

Adhyāyas 1 to 5, 8 & 11 are complete; 12th incomplete.

**Beginning:**

शुक्लाम्बरधरं . . . . शान्तये ॥

सत्यज्ञानानन्दमयीं ब्रह्मरूपां नमाम्यहम् ।

देवीं सरस्वतीं सौम्यां शुद्धस्फटिकसन्निभाम् ॥

* * * *

शुद्धवस्त्रपरीधानां भक्ताभीष्टप्रदायिनीम् ।

ध्यायाम्यहं हृत्सरोजे ग्रन्थस्यास्य चिकीर्षया ॥

बुद्धिप्रभावसिद्ध्यर्थं प्रसादं कुरु शङ्करि ।

अरुणामरुणाकल्पां करुणापूर्णलोचनाम् ॥

* * * *

ब्राह्मण्यप्राप्तिभूतं प्रतिदिनकृतपापाटवीवीतिहोत्रं

ज्ञानान(द)ष्टैकहेतुं शुचिकरमतुलं मृत्युवज्रोपघातम् ।

मन्त्रग्रामादिमूलं सकलमनुमयं सर्ववेदान्तगुह्यं

वक्ष्ये षट्कर्मसारं द्विजकुलतिलकं मोक्षसोपानमार्गम् ॥

प्रत्यहं प्रातरुत्थाय ब्राह्मणानां विधिः(धिं) क्रमात् ।
स्नानादिकर्मणां षण्णां वक्ष्ये लोकोपकारकम् ॥
उत्थाय सम्यगासीनः ईशान्याभिमुखो द्विजः ।
प्राणायामं प्रकुर्वीत गुरुध्यानपुरस्सरम् ॥

* * * *

इति वसिष्ठस्मृतौ स्नानविधिर्नाम प्रथमोऽध्यायः ।

* * * *

इति वसिष्ठस्मृतौ न्यासादिविधानं नाम अष्टमोऽध्यायः ।

* * * *

इति वसिष्ठस्मृतौ एकादशोऽध्यायः ॥
अथातस्संप्रवक्ष्यामि वैश्वदेवविधिक्रमम् ।
प्रतिपूर्षं वैश्वदेवं कुर्यान्नित्यमतन्द्रितः ॥

**End:**

तस्मात् भार्यां सदा विद्वान् स्थापयेत्सार्वकालिकम् ।
यद्गृहे सुखिता पत्नी तद्गृहं सुखमेधते ॥
स्वसमा सा प्रकथिता स्वाभिन्नतनुरुत्तमा ।
सर्वाश्च सं . . . . . पुत्रपौत्रादयोऽखिलाः ॥
तथेति तां मौढ्यतस्तु बालभावे वृथैव वै ।
अत्यन्तचारिणीं कृत्वा गर्विष्ठाङ्कारयेन्न तु ॥

---

## No. 2713. वसिष्ठस्मृतिः.
## VASIṢṬHASMṚTIḤ.

Substance, paper. Size, $11\frac{7}{8} \times 9\frac{5}{8}$ inches. Pages, 72. Lines, 21 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, new.

Commences from about the end of the 2nd Adhyāya and breaks off in the 10th Adhyāya. Wants 2 leaves in the beginning.

The third leaf is bound at the end.

## No 2714. वसिष्ठस्मृतिः.

## VASIṢṬHASMṚTIḤ.

Substance, paper. Size, 11½ × 7⅝ inches. Pages, 78. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 10 Adhyāyas.

Begins on fol. 1*a*. The other works herein are, Śāṇḍilyasmṛtiḥ 40*a*, Aparaprayōga (Kṛṣṇīya) 77*a*, Yallājīya 144*a*, Kamalākarasmṛti 223*a*.

---

## No. 2715. वसिष्ठस्मृतिः.

## VASIṢṬHASMṚTIḤ.

Pages, 58. Lines, 18 on a page.

Begins on fol. 73*a* of the MS. described under No. 2622.

Commences in the course of the 3rd Adhyāya and breaks off in the 6th.

---

## No. 2716. वसिष्ठस्मृतिः.

## VASIṢṬHASMṚTIḤ.

Pages, 58. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 2634.

Adhyāyas 1 to 10 complete.

---

## No. 2717. विश्वामित्रस्मृतिः.

## VIŚVĀMITRASMṚTIḤ.

Pages, 26. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2709.

Adhyāyas 2 to 5, and 8 to 9 are complete.

**Beginning :**

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभे

वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ।

प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि पावनं तदभिधानपूर्वं गुरुम् ॥

(चतुःपञ्चघटीमानं मुहूर्तं) ब्रह्मसंज्ञितम् ।
पञ्चप(ञ्च)घटीज्ञेय उषःकाल इतीष्यते ॥

ऋतुबाणघटीमानमरुणोदयसंज्ञितम् ।
उषःपञ्चघटीमानं प्रातःकाल इति स्मृतः ॥

एवं ज्ञात्वा प्रभाते तु नि(त्यकर्म समाचरेत्) ।
(नित्यनैमित्तिके) काम्ये कृते काले तु सत्फलम् ॥

ब्राह्मे मुहूर्त्ते उत्थाय कृत्वा शौचं समाहितः ।
स्नानं कुर्यादुषःकाले आत्मार्थमरुणोदये ॥

* * * *

इति विश्वामित्रस्मृतौ शुद्धाचमनयोगो नाम द्वितायोऽध्यायः ॥

* * * *

इति पञ्चमोऽध्यायः ॥

* * * *

इति विश्वामित्रस्मृतौ नानाप्रयोगविधानं नामाष्टमोऽध्यायः ॥

अथातस्संप्रवक्ष्यामि उपस्थानविधिं क्रमात् ।
ऋक्छाखोक्तेन विधिना जातवेदस इत्यृचम् ॥

**End:**

त्रिपदा जपसाद्गुण्यं तुर्यजाप्यं दशांशकम् ।
तुर्यपादं विना जाप्यं कुरुते निष्फलं भवेत् ॥

मित्रस्य चर्षणीमन्त्रं याजुषोपासनक्रमात् ।
प्रातर्जपान्ते गायत्र्या(:) सूर्योपस्थानमाचरेत् ॥

आसत्येनेति मन्त्रेण षडृचोक्तविधानतः ।
मध्यन्दिने रविन्ध्यायेत् जपान्ते विधिवत्क्रमात् ॥

सायं भानोरस्तमयात् द्विघटेकर्मसाधमे(?) ।
ऋक्षप्रकाशपर्यन्तं जपन्देवीं मनोहराम् ॥

लुप्तं सूर्यं समालोक्य दिगुपस्थानमाचरेत् ।
सूर्यं(र्क्तं) वारुणमस्ते च इममादि पठेन्मनुम् ॥

प्री(प्रि)यसूक्तं समुच्चार्य देवीं ध्यायेच्चतुष्पदाम् ।
पञ्चोपचारैरभ्यर्च्य गायत्रीं तुर्यया सह ॥

**Colophon:**

इति विश्वामित्रस्मृतौ उपस्थानं नाम नवमोऽध्यायः ॥

---

No. **2718.** विष्णुस्मृतिः.

VIṢṆUSMṚTIḤ.

**Pages, 9. Lines, 11 on a page.**

Begins on fol. 101*b* of the MS. described under No. 2612.

Adhyāyas 1 and 2 complete.

**Beginning:**

विष्णो धर्मानशेषेण ब्रह्मज्ञानैकसाधकान् ।
चित्तशुद्धिकरान्सद्यः शिष्येभ्यो वद नः प्रभो ॥

इति संप्रार्थितो विष्णुः श्रीमान्ब्रह्मविदां वरः ।
नत्वा नारायणं देवं वेदवेद्यं सनातनम् ॥

वक्तुं धर्मान्द्विजातीनां निखिलांस्तु द्विजाग्रणीः ।
हरिरोमित्युपक्रम्य श्रृणुतेति वचोऽब्रवीत् ॥

सर्वेषामपि वर्ना(र्णा)नां सर्वभूतदया परा ।
प्रमुखास्सर्वधर्माणामहिंसा सत्यमार्जवम् ॥
तितिक्षोपरमश्शान्तिर्दान्तिर्दानं दमस्तथा ।
सामान्यधर्माः कथिता विशेषेण वदाम्यथ ॥

* * * *

**Colophon:**

इति श्रीविष्णुस्मृतौ प्रथमोऽध्यायः ॥

**End:**

तस्य धर्मार्थकामानां हानिर्न क्वापि जायते ॥
पापे ह्यपापः पुरुषे ह्यभिधत्ते प्रियाणि यः ।
मैत्रीद्रवान्तःकरणः तस्य मुक्तिः करे स्थिता ॥
नित्यं सत्यं वदेत्प्राज्ञो यत्परप्रीतिकारणम् ।
सत्यं यत्परदुःखाय तत्र मौनपरो भवेत् ॥
प्रियं हितं नेति . . इति मत्वा न तद्वदेत् ।
श्रेयस्करं हितं वाक्यं यद्यदत्यन्तमप्रियम् ॥
प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्मणा मनसा वाचा तदेव मतिमान्वदेत् ॥
प्राणिनां निखिलानाञ्च ह्युपकारं सदाचरेत् ।
अपकारं न वै कुर्यादिति वेदानुशासनम् ॥

**Colophon:**

इति विष्णुस्मृतौ द्वितीयोऽध्यायः ॥

---

No. **2719.** व्यासस्मृतिः.

VYĀSASMṚTIḤ.

Pages, 9. Lines, 10 on a page.

Begins on fol. 11*a* of the MS. described under No. 2614.
Complete in 3 Adhyāyas.

**Beginning :**

ऋषय ऊचुः—

अहन्यहनि कर्तव्यं ब्राह्मणानां क्रमान्वितम् [महामुने] ।
तदाचक्ष्वाखिलं कर्म येन मुच्येत बन्धनात् ॥

व्यास उवाच—

विप्रास्समाहितास्त्वद्य श्रृणुध्वं वदतो मम ।
अहन्यहनि कर्तव्यं ब्राह्मणानां क्रमान्वितम् ॥

ब्राह्मे मुहूर्ते बुध्येत धर्माथावनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूला(न्) वेदतत्त्वार्थमेव च ॥

उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नानान(यान्न)दीषु शुद्धासु शौचं कृत्वा यथाविधि ॥

प्रातस्स्नाने(न) पूयन्ते येऽपि पापकृतो जनाः ।
तस्मात्सर्वप्रयत्नेन स्नानं व्र(प्रा)तस्समाचरेत् ॥

प्रातस्स्नांनं प्रशंसन्ति दृष्टादृष्टकरं शुभम् ।
ऋषीणामृषिता नित्यं प्रातस्स्नानान्न संशयः ॥

मुखे सुप्तस्य सततं लालाद्याश्च स्रवन्ति हि ।
ततो नैवाचरेत्कर्म अकृत्वा स्नानमादितः ॥

* * * *

इति व्यासस्मृतौ प्रथमोऽध्यायः ॥

**End :**

इत्येतदखिलेनोक्तमहन्यहनि वै मया ।
ब्राह्मणानां कृतं(त्य)जातमपवर्गफलप्रदम् ॥

नास्तिक्यादथवालस्या(त्)ब्राह्मणो न करोति यः ।
(स याति नरकान् घोरान्सूकरेष्वपि जायते) ॥
नान्यो विमुक्तये बन्धा(पन्था) रक्ताश्र(मुक्त्वा क)मविधिं स्वकम् ।
तस्मात्कर्माणि कुर्वीत मुक्तये परमेष्ठिनः ॥

**Colophon:**

इति व्यासस्मृतौ तृतीयोऽध्यायः ॥

इति व्यासस्मृतिस्समाप्ता ।

---

No. **2720.** व्यासस्मृतिः.

VYĀSASMṚTIḤ.

Pages, 10. Lines, 8 on a page.

Begins on fol. 26*a* of the MS. described under No. 2619.

Complete.

Same work as the above.

---

No. **2721.** व्यासस्मृतिः.

VYĀSASMṚTIḤ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2616.

(Complete in 3 Adhyāyas.)

Same work as the above.

---

No. **2722.** व्यासस्मृतिः.

VYĀSASMṚTIḤ.

Pages, 15. Lines, 20 on a page.

Begins on fol. 41*b* of the MS. described under No. 1203.

Complete in two Adhyāyas, the second Adhyāya comprising the second and the third Adhyāyas as found in the other MSS. of the work.

---

## No. 2723. शाण्डिल्यस्मृतिः.

## ŚĀṆḌILYASMṚTIḤ.

Pages, 64. Lines, 9 on a page.

Begins on fol. 121*a* of the MS. described under No. 2614.

Complete in 5 Adhyāyas.

**Beginning :**

श्रीमत्तोद(त)गिरेर्मूर्ध्नि श्रीमत्यायतने हरेः ।
शाण्डिल्यमृषिमासीनं प्रणम्य मुनयोऽब्रुवन् ॥

श्रीमदेकायनं शास्त्रं श्रुतं गुह्यं सनातनम् ।
ज्ञातश्च सर्ववेदानामन्तस्सारमिदन्त्विति ॥

निवृत्तं वैदिकं कर्म यत्प्रोक्तं भवभेषजम् ।
पञ्चकालात्मकं ज्ञानं तच्च ब्रह्मैकदैवतम् ॥

कुडु(टु)म्बाश्रमनिष्ठानां पञ्चकालनिषेविणाम् ।
आचारन्त्वन्मुखाम्भोजाच्छ्रोतुमिच्छामहे वयम् ॥

शाण्डिल्योऽपि नमस्कृत्य मङ्गलायतनं हरिम् ।
अब्रवीत्स मुनिश्रेष्ठान् श्रेष्ठकर्मा महामुनिः ॥

बहुशः पूर्वमेवायं समाचारो मयेरितः ।
पदार्थानधिकृत्यैव शास्त्रे सत्पथसंस्थितान् ॥

महाविस्ताररूपोऽयमाचारः पञ्चकालिनाम् ।
संक्षेपात्प्रब्रवीम्यद्य यथाशास्त्रं यथामति ॥

रहस्यमेतद्विज्ञानं भक्तानां हितमेव च ।
अतः प्रमाणं भक्तानां सारं सर्वागमेषु च ॥

कुटुम्बाश्रममाश्रित्य तथा कालक्रमेण च ।
वक्ष्यामि वस्समाचारान् मुख्यास्ते हि कुटुम्बिनः ॥

आचारं मङ्गलोपेतं संक्षेपात्प्रब्रवीमि वः ।
अनन्यमनसस्सर्वे शृणुध्वं मुनिपुङ्गवाः ॥

पञ्चेन्द्रियस्य देहस्य बुद्धेश्च मनसस्तथा ।
द्रव्यदेशक्रियाणाञ्च शुद्धिराचार इष्यते ॥

वक्ष्यमाणस्य सूत्रं हि स्तोके(क) श्लोको यदीरितः ।
संक्षेपविस्तराभ्याञ्च व्याख्यानमिदमुच्यते ॥

प्रतिषिद्धेष्वसक्तं यत्सक्तं शुद्धेषु साधुषु ।
भगवद्विषयेष्वेव शुद्धन्तच्छ्रोत्रमुच्यते ॥

अस्पृश्यमस्पृशन्ती वा(या) स्पृशन्ती स्पृश्यमेव च ।
तत्राप्यलोलुपा सद्भिः त्वक् शुद्धेति निगद्यते ॥

* * * *

इति श्रीशाण्डिल्यधर्मशास्त्रे प्रथमोऽध्यायः ॥

**End :**

यथौषधीनाममृतं मणीनां कौस्तुभो यथा ।
सर्वेषामपि धर्माणां श्रेष्ठो भागवतो विधिः ॥

सर्वधर्मान् समुत्सृज्य पाञ्चकालमनुव्रताः ।
व्यामिश्रयागनिर्मुक्ता गच्छन्ति पुरुषोत्तमम् ॥

व्यामिश्रयाजिनां ब्रह्मण(ण्य)नर्पितसुद्वत्तिनाम् ।
यततामपि वा नित्यं पदमेषां परं स्थितम् ॥

अकर्म कर्त(र्म) चैव स्यात् ज्ञानं वा कर्म संभवेत् ।
कर्मयोगस्तथापि स्याद्योगः कर्म परन्तथा ॥
नास्मात्परमकं शास्त्रं नास्मात्कर्म परन्तथा ।
नास्मात्परमकं ज्ञानं ना[क]स्मात्परमं(मकं) सुखम् ॥
ऋग्यजुस्सामसंज्ञेषु वेदशब्दः प्रयुज्यते ।
इदं सदागमाख्यन्तु वेदशास्त्रमितीरितम् ॥
इति संक्षेपतः प्रोक्तः सदाचारो यथागमम् ।
तथा शास्त्रस्य माहात्म्यं विशेषश्चैकयाजिनाम् ॥
इदं शास्त्रमधीयानो ब्राह्मणो भगवत्परः ।
श्रियं यशश्च विपुलं दीर्घमायुरवाप्नुयात् ॥

**Colophon:**

इति शाण्डिल्यधर्मशास्त्रे पञ्चमोऽध्यायः ॥
संपूर्णश्चेदं शाण्डिल्यधर्मशास्त्रम् ॥

---

## No. **2724.** शाण्डिल्यस्मृतिः.

### ŚĀṆḌILYASMṚTIḤ.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 76. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 3 complete; 4th incomplete.

Same work as the above.

---

## No. **2725.** शाण्डिल्यस्मृतिः.

### ŚĀṆḌILYASMṚTIḤ.

Pages, 42. Lines, 8 on a page.

Begins on fol. 42*a* of the MS. described under No. 2616.

Complete in 5 Adhyāyas.

Same work as the above.

एतत्स्मृतिश्लोकसङ्ख्या—७०३.
नेत्रे मेघघटश्रोत्रकाममार्येषु देहतः ।
माघबहुळ २ गु.

---

No. 2726. शाण्डिल्यस्मृतिः.

ŚĀṆḌILYASMṚTIḤ.

Pages, 77. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 2633.

Complete in 5 Adhyāyas.

Same work as the above.

---

No. 2727. शाण्डिल्यस्मृतिः.

ŚĀṆḌILYASMṚTIḤ.

Pages, 60. Lines, 22 on a page.

Begins on fol. 40*a* of the MS. described under No. 2714.

Complete.

Same work as the above.

---

No. 2728. शातातपस्मृतिः.

ŚĀTĀTAPASMṚTIḤ.

Pages, 17. Lines, 9 on a page.

Begins on fol. 34*a* of the MS. described under No. 2614.

Complete in 12 Adhyāyas.

**Beginning:**

अथ शातातपधर्मं व्याख्यास्यामः—ब्राह्मणो ब्राह्मणं हत्वा शिरः-कपालमादाय तीर्थान्यनुचरेत् । आत्मनः पापसंकीर्तनं कृत्वा द्वाद(श)-

वर्षात् पूतो भवति । अथवाश्वमेधं यक्ष्यति । इति तस्य दर्शनात् पूतो भवति ।

ब्राह्मणस्तु सुरा पश्चात्(सुरां पीत्वा) कथञ्चित्काममोहितः ।
अग्निवर्णां सुरां पीत्वा मृतश्शुद्धिमवाप्नुयात् ॥

अपहृत्य सुवर्णन्तु ब्राह्मणस्य तु तत्स्वयम् ।
गच्छेन्मुसलमादाय राजानं स विधाय तु ॥

हतश्शुद्धिमवाप्नोति राज्ञासौ मुक्त एव वा ।
कामतस्तु वधस्तस्य नान्यथा वधमर्हति ॥

* * * *

इति शातातपधर्मशास्त्रे महापातकप्रायश्चित्तकथनं नाम प्रथमोऽध्यायः ।

**End:**

ब्राह्मणं स्नातुमायान्तमन्व(नु)गच्छन्ति देवताः ।
पितरश्च महाभागा वायुभोजलना(तृष्णार्तास्सलिला)र्थिनः ॥

निराशास्ता(स्ते) निवर्तन्ते वस्त्रनिष्पीडने कृते ।
तस्मान्न पीडयेद्वस्त्रमकृत्वा पितृतर्पणम् ॥

तर्पणन्तु शुचिः कुर्यात् प्रत्यहं स्ता(स्ना)तकस्त्विति ।
देवेभ्योऽथ ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥

अग्निकार्यस्तु(न्तु) कुर्वीत वाग्यतो नान्यमानसः ।
भूतयज्ञं तथा श्राद्धं नित्यं त्वतिथितर्पणम् ॥

**Colophon:**

इति शातातपधर्मशास्त्रे आचारकथनं नाम द्वादशोऽध्यायः ॥
इति शातातपधर्मशास्त्रं समाप्तम् ॥

१. महापातकप्रायश्चित्तकथन.
२. अभक्ष्यभक्षणकथन.
३. उपपातकप्रायश्चित्तकथन.
४. हिंसाप्रायश्चित्तकथन.

५. विवाहप्रकरण. ९. भोजनविधि.
६. वैश्वदेवकथन. १०. शुना दष्टप्रायश्चित्तकथन.
७. श्राद्धकथन. ११. आशौचकथन.
८. Do. १२. आचारकथन.

---

No. **2729.** शातातपस्मृतिः.

ŚĀTĀTAPASMṚTIḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 9*b* of the MS. described under No. 2616.

Complete in 12 Adhyāyas.

Same work as the above.

---

No. **2730.** शातातपस्मृतिः.

ŚĀTĀTAPASMṚTIḤ.

Pages, 10. Lines, 9 on a page.

Begins on fol. 31*a* of the MS. described under No. 2619.

Adhyāyas 7 and 8 wanting.

---

No. **2731.** संवर्तस्मृतिः.

SAṀVARTASMṚTIḤ.

Pages, 23. Lines, 10 on a page.

Begins on fol. 43*a* of the MS. described under No. 2614.

Complete in 6 Ahdyāyas.

**Beginning :**

संवर्तमेकमासीनमात्मविद्यापरायणम् ।
ऋषयस्ते समागम्य पप्रच्छुर्धर्मकाङ्क्षिणः ॥
भगवन् श्रोतुमिच्छाम(:)श्रेयस्कामा द्विजोत्तमाः ।
यथावद्धर्ममाचक्ष्व शुभाशुभविचेत(वेच)नम् ॥

वामदेवादयस्सर्वे तत्पृच्छन्ति महौजसम् ।
तानब्रवीन्मुनिस्सर्वान् प्रीतात्मा श्रूयतामपि(मिति) ॥

स्वभावाद्यत्र विचरेत् कृष्णस्सारस्सदा मृगः ।
धर्म्यदेशस्स विज्ञेयो द्विजानान्धर्मसाधनम् ॥

उपनीतस्सदा विप्रो गुरोस्तु हितमाचरेत् ।
स्रग्गन्धमधुमांसानि ब्रह्मचारी विवर्जयेत् ॥

सन्ध्यां प्रातस्सनक्षत्रा अ(मु)पासीत यथाविधि[ः] ।
सादित्यां पश्चिमां सन्ध्यामर्धास्तमितभास्कर(ा)म ॥

तिष्ठेत्पूर्वं जपं कुर्यात् ब्रह्मचारी समाहितः ।
आसीनः पश्चिमां सन्ध्यां जपं कुर्यादतन्द्रितः ॥

* * * *

इति संवर्तधर्मशास्त्रे ब्रह्मचारी(रिव्रत)कथनं नाम प्रथमोऽध्यायः ॥

**End :**

श्रुतिस्स्मृतिश्च विप्राणां चक्षुषी द्वे च निर्मिते ।
काणस्तत्रैकहीनस्तु द्वाभ्यामन्धः प्रकीर्तितः ॥

नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः ।
तस्मान्नाभिसमं कुर्यादुपवीतं द्विजोत्तमः ॥

चान्द्रायणञ्च सर्वेषां पावनं शोधनं परम् ।
तत्कृतां शुद्धिमाप्नोति उत्तमं स्थानमाप्नुयात् ॥

दुस्तरं यद्दुराधर्षं यच्च शूरेष्ववस्थितम ।
सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमम् ॥

अनुष्टुप्छन्दसा ह्येतत् संवर्तेन तु भाषितम् ।
श्लोकानामपि विज्ञेयं त्रिशतं षोडशोत्तरम् ॥

सर्वशास्त्रमिदं पुण्यं संवर्तेन तु भाषितम् ।
अधीत्य ब्राह्मणो गच्छेत् ब्र[ा]ह्मणस्सत्व(ह्म) शाश्वतम् ॥

**Colophon:**

इति संवर्तधर्मशास्त्रे प्रायश्चित्तप्रकरणं नाम षष्ठोऽध्यायः ॥
इति संवर्तधर्मशास्त्रं संपूर्णम् ॥

१. ब्रह्मचारी(रिव्रत)कथनम्.
२. विवाहकथनम्.
३. दानकथनम्.
४. वानप्रस्थप्रकरणम्.
५. सन्न्यासप्रकरणम्.
६. प्रायश्चित्तकथनम्.

---

## No. 2732. संवर्तस्मृतिः.

## SAMVARTASMṚTIḤ.

Pages, 14. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 2625.

Complete.

---

## No. 2733. संवर्तस्मृतिः.

## SAMVARTASMṚTIḤ.

Pages, 20. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 2619.

15 Ślōkas wanting in the beginning.

Complete.

This copy, like the Anandāśrama edition, does not divide the work into chapters.

---

## No. 2734. हारीतस्मृतिः.

## HĀRĪTASMṚTIḤ.

Substance, paper. Size, 12½ × 8⅝ inches. Pages, 210. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 8 Adhyāyas.

**Beginning:**

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नान्निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ॥

अम्बरीषस्ततो गत्वा हारीतस्याश्रमं नृपः ।
ववन्दे तं महात्मानं बालार्कसदृशप्रभम् ॥

स पृष्टकुशलस्तेन पूजितः परमासने ।
उपविष्टस्ततो विप्रमुवाच नृपनन्दनः ॥

भगवन् सर्वधर्मज्ञ सर्ववेदविदां वर ।
पृच्छामि त्वां महाभाग परमं धर्ममव्ययम् ॥

कथं वर्णाश्रमाणान्तु नित्यनैमित्तिकाः क्रियाः ।
कर्तव्या मुनिशार्दूल नारीणाञ्च नृपस्य च ॥

स्वरूपं जीवपरयोः कथं मोक्षपथस्य च ।
तत्प्राप्तिसाधनं ब्रह्मन् वक्तुमर्हसि सुव्रत ॥

एवमुक्तस्तु विप्रर्षिस्तेन राजर्षिणा तदा ।
उवाच परमप्रीत्या नमस्कृत्य जनार्दनम् ॥

श्रु(शृ)णु राजन् प्रवक्ष्यामि सर्ववेदोपबृंहितम् ।
यदुक्तं ब्रह्मणा पूर्वं पृच्छतो मम भूपते ॥

तद्ब्रवीमि परं धर्मं श्रु(शृ)णुष्वैकाग्रमानसः ।
सर्वेषामेव देवानामनादिः पुरुषोत्तमः ॥

ईश्वरस्तु स एवास्य जगतो विभुरव्ययः ।
नारायणो वासुदेवो विष्णुर्ब्रह्माच्युतो हरिः ॥

*    *    *    *

सहस्रमूर्धा विश्वात्मा सहस्रकरपादवान् ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं हरेः ॥

चतुर्भिश्शोभनोपायैस्साध्योऽयं सुमहात्मभिः ।
तुरीयं परया भक्त्या सुसिद्धं समुदाहृतम् ॥

तत्स्वीकुर्वन्ति विद्वांसः स्वस्वरूपतया सदा ।
नैसर्गिकं हि सर्वेषां दास्यमेव हरेस्सदा ॥

स्वाम्यं परस्वरूपं स्यात् दास्यं जीवस्य नित्यशः ।
प्राक्प्रत्यगात्मनो रूपं स्वाम्यं दास्यमिति श्रुतिः ॥

दास्यमेव परो धर्मः दास्यमेव परं हितम् ।
दास्येनैव भवेन्मुक्तिः अन्यथा निरयो भवेत् ॥

विष्णोर्दास्यं परा भक्तिर्येषान्तु न भवेत्क्वचित् ।
तेषामेव हि संसृष्टं निरयं ब्रह्मणा नृप ॥

नारायणस्य दासा ये न भवन्ति नराधमाः ।
जीवन्त एव चण्डाला भविष्यन्ति न संशयः ॥

तस्माद्दास्यं परां भक्तिमालम्ब्य नृपसत्तम ।
नित्यं नैमित्तिकं सर्वं कुर्यात्प्रीत्यै हरेस्सदा ॥

दास्यस्वरूपं रूपञ्च गुणान् सम्यग्विभूतिकाः ।
ज्ञात्वा समर्चयेद्विष्णुं यावज्जीवमतन्द्रितः ॥

* * * *

**Colophon:**

इति हारीतस्मृतौ पञ्चसंस्कारप्रतिपादनं नाम प्रथमोऽध्यायः ॥

**End:**

भरद्वाजादयस्सर्वे नृपाश्च जनकादयः ।
योगिनस्सनकाद्याश्च नारदाद्यास्सुरर्षयः ॥

वसिष्ठाद्या वैष्णवाश्च विष्वक्सेनादयस्सुराः ।
एतच्छास्त्रानुसारेण पूजयामासुरच्युतम् ॥

परमं वैष्णवं शास्त्रमेतद्वैष्णवमुत्तमम् ।
ज्ञात्वैव पारमैकान्त्यं सर्वदेवेश्वरेश्वरम ॥

एतच्छास्त्रानुसारेण पूजयामासुरच्युतम् ।
पारमैकान्त्यमाप्नोति नान्यथा वैष्णवोत्तमः ॥

**Colophon :**

इति हारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे वृत्त्याधिकारो नाम अष्टमोऽध्यायः ॥

इयं हारीतस्मृतिनाम्ना वव्य(व्यव)ह्रियमाणा स्मृतिः सर्वापि पाठभेदपर्यालोचनापूर्वकत्वेन सम्यक् परिष्कृता । परन्तु अस्यां स्मृतौ पञ्चमाध्याये सामगानैः प्रबन्धैश्च गायन् कृष्णं जगद्गुरुमिति, तत्रैव इतिहासपुराणाभ्यां गीतापाठैः प्रबन्धकैरिति च स्मर्यते; तथा षष्ठाध्याये पञ्चविंशत्युत्तरत्रिशततमे वचने मत्स्यकूर्मादिभिश्चैव वेदार्थोक्तो (क्ति) प्रबन्धकैरिति च फण्यते; तथा सप्तमाध्याये द्व्यशीत्युत्तरत्रिशततमे वचने च सूक्तैश्च ब्राह्मणस्पत्यैस्सामगानैः प्रबन्धकैरिति च पठ्यते; तत्र तत्र प्रबन्धशब्दस्य द्रविळप्रबन्ध एवार्थ इति तस्य च कलावाधुनिकपुरुषनिर्मितत्वेन विकृतिभाषामयत्वेन च ततः प्राचीनतनकालोत्पन्नस्मृतौ तद्विनियोगकथनस्य इतरभाषाप्रबन्धविनियोगकथनस्य चासंभवेन इतरस्मृतिवत् सर्वसंप्रतिपन्ननिबन्धनग्रन्थेष्वस्या अनुदाहरणेन च नेयं मुनिकृतेति न चाष्टादशसु स्मृतिष्वन्तर्भवतीति च निश्च(श्ची)येत्(त) ॥

१. पञ्चसंस्कारप्रतिपादनम्.
२. do. do.
३. do. do.
४. प्रातःकालभगवत्समाराधनविधिः.
५. भगवन्नित्यनैमित्तिकसमाराधनविधिः.
६. प्रायश्चित्तप्रकरणम्.
७. नानाविधोत्सवविधानम्.
८. वृत्त्यधिकारः.

## No. 2735. हारीतस्मृतिः.

## HĀRĪTASMṚTIḤ

Pages, 15. Lines, 8 on a page.

Begins on fol. 11*a*. of the MS. described under No. 2619.

Complete.

**Beginning:**

ये वर्णाश्रमधर्मस्थास्ते भक्ताः केशवं प्रति ।
इति पूर्वं त्वया प्रोक्तं भूर्भुवस्स्वं द्विजोत्तम ॥

वर्णानामाश्रमाणां च धर्मान् नो ब्रूहि भार्गव ।
येन सन्तुष्यते देवो नारसिंहस्सनातनः ॥

मार्कण्डेयः—

अत्राहं कथयिष्यामि पुरावृत्तमनुत्तमम् ।
ऋषिभिस्सह संवादे हारीतस्य महात्मनः ॥

हारीतं सर्वधर्मज्ञमासीनमिव पावकम् ।
प्रणिपत्याब्रुवन् सर्वे मुनयो धर्मकाङ्क्षिणः ॥

भगवन् सर्वधर्मज्ञ सर्वधर्मप्रवर्तक ।
वर्णानामाश्रमाणां च धर्मान् नो ब्रूहि शाश्वतान् ॥

समासाद्योगशास्त्रं च विष्णुभक्तिकरं परम् ।
एतच्चान्यांश्च भगवन् ब्रूहि नः परमां गतिम् ॥

हारीतस्तानुवाचाथ तैरेवं चोदितो मुनिः ।
शृण्वन्तु मुनयस्सर्वे धर्मान् वक्ष्यामि शाश्वतान् ॥

* * * *

इत्येष धर्मः कथितो मया यत्(:) पृष्टो भवद्भिस्त्वखिलापहारी ।
वदामि राज्ञामपि चैव धर्मान् पृथक् पृथक् बोधत विप्रवर्याः ॥

इति प्रथमोऽध्यायः ॥

**End:**

वर्णाश्चत्वारो राजेन्द्र चत्वारश्चापि चाश्रमाः ।
स्वधर्मं येऽनुतिष्ठन्ति ते यान्ति परमां गतिम् ॥
स्वधर्मेण यथा नृणां नारसिंहः प्रसीदति ।
न तुष्यति तथान्येन कर्मणा मधुसूदनः ॥
अतः कुर्वन्निजं धर्मं यथाकालमतन्द्रितः ।
सहस्रनिष्कदेवेशं नारसिंहं च सालयम् ॥
उत्पन्नवैराग्यबलेन योगी ध्यायेत्परं ब्रह्म सदा क्रियावान् ।
सत्यं सुखं रूपमनन्तमाद्यं विहाय देहं पदमेति विष्णोः ॥

**Colophon:**

इति हारीतधर्मशास्त्रं संपूर्णम् ॥

---

## No. 2736. हारीतस्मृतिः.
## HĀRĪTASMṚTIḤ.

Pages, 276. Lines, 21 on a page.

Begins on fol. 354*a* of the MS. described under No. 2141.

Complete.

Same work as the above.

---

## No. 2737. हारीतस्मृतिः.
## HĀRĪTASMṚTIḤ.

Substance, palm-leaf. Size, 18⅜ × 1⅝ inches. Pages, 204. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

## No. 2738. हारीतस्मृतिः

## HĀRĪTASMṚTIḤ.

Pages, 40. Lines, 8 on a page.

Begins on fol. 63*a* of the MS. described under No. 2616

Incomplete.

---

## No. 2739. हारीतस्मृतिः.

## HĀRĪTASMṚTIḤ.

Pages, 178. Lines, 9 on a page.

Begins on fol. 47*a* of the MS. described under No. 2611.

Incomplete. After the 6th Adhyāya the leaves are too injured to allow easy reading and identification.

## II. DIGESTS (GENERAL).

### No. 2740. अवशिष्टधर्मनिरूपणम्.

### AVAŚIṢṬADHARMANIRŪPAṆAM.

Substance, palm-leaf. Size, 13⅝ × 1⅜ inches. Pages, 16. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 100*a*.

The other works herein are, Smṛtimuktāphalam 1*a*, Sarvāṅgavapanavidhiḥ 86*a*, Abhōjyabhōjanaprāyaścittam 88*a*, Dravyaśuddiḥ 92*a*, Yativapanavidhiḥ 108*a*.

**Beginning:**

अथ अवशिष्टधर्माः ।

तत्र मनुः—

कृत्तकेशनखश्मश्रुर्धौतशुक्लाम्बरश्शुचिः ।
स्वाध्याये चैव युक्तस्य नित्यमात्महितेषु च ॥

वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ।
यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥

कमण्डलुस्ताम्रादिमयः ।

कलौ पञ्च न कुर्वित भ्रातृजायां कमण्डलुमिति मृन्मयनालिकेरकमण्डलुनिषेधात् ।

**End:**

नित्यनैमित्तिकं चैव कर्म कुर्वन्नतन्द्रितः ।
निषिद्धं वर्जयेद्धीमानिहामुत्र सुखी भवेत् ॥

**Colophon:**

इत्यवशिष्टधर्मनिरूपणम् ॥

भगिन्यौ भ्रातरौ चैव देशान्तरगतौ यदि ।
अतीते द्वादशे वर्षे कथं स्याद्दर्शनं तयोः ॥
इति पृष्टो वसिष्ठेन पराशर उवाच ह ।
निवेद्य देवपुरतः तत्र रूपगुणैर्युतः ॥
तूष्णीं दृष्ट्वा गृहं गत्वा प्रतिष्ठाप्य हुताशनम् ।
मृत्युञ्जयेन जुहुयात्तिलमष्टोत्तरं शतम् ॥

---

No. **2741.** आचारनवनीतम्.

ĀCĀRANAVANĪTAM.

Substance, palm-leaf. Size, 14 × 1⅛ inches. Pages, 266. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Śrāddhaprakaraṇa complete.

*Ācāranavanīta* is a digest of the Dharmaśāstra on the funeral and the Śrādana ceremonies; by Appādīkṣita a native of Gaurīmāyūra. The MS. contains only a portion of the whole work which consists of four chapters (1) Ācārakāṇḍa (2) Śrāddhakāṇḍa (3) Dravyaśuddhi (4) Kālanirṇaya.

From Dr. Burnell's Catalogue of the Tanjore Palace Library we learn that the author flourished at the time of King Sohāji (1684—1711 A.D.) and that the work was composed at the request of that king.

Transcribed by Mullandram Vēnkaṭeśvara Avadhāni for the use of Vaṇṇakkambāḍi Vīrarāghava Vādhyār.

**Beginning:**

अथोत्तरसंस्कारः सपिण्डीकरणान्तः प्रस्तूयते । उत्तरः संस्कारो नाम ब्राह्मणादीनां मरणानन्तरं पित्रादीनां पुत्रादिभिः कर्तव्यः संस्कार-

विशेषः । तेषां प्रेतत्वनिवृत्तिद्वारा पित्रादीनां पुण्यलोकसम्पादनकरः शास्त्रविहितः कर्मविशेषः । तथा च सुमन्तुः—

मातुः पितुश्च कुर्वीत मृतयोरौरसः सुतः ।
पैतृमेधिकसंस्कारं मन्त्रपूर्वकमादृतः ॥ इति ॥

पितृमेधसूत्रविहितमन्त्रपूर्वकमित्यर्थः ॥

**End:**

यन्नाम्ना पातयेत्पिण्डं तन्नयेद्ब्रह्म शाश्वतम् ॥

इति पित्रादीनां नरकादिदुर्गतिङ्गतानामपि पुत्रादिभिः विधिवत् श्रद्धया क्रियमाणं श्राद्धं तत्तद्दुरितक्षयद्वारा तानपि मोक्षाधिकारिणः करोतीत्यर्थः । तस्मादुक्तेषु श्राद्धकालेषु यथाविधि पुत्रादिभिः कर्तृभिः मुख्यकल्पेन असामर्थ्येऽनुकल्पादिना वा श्राद्धमवश्यं कर्तव्यमेवेति सिद्धम् ॥

**Colophon:**

गौरीमायूरमप्पादीक्षितविरचिते आचारनवनीते पैतृकश्राद्धप्रकरणं समाप्तम् ॥

दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ।
ततः सन्ध्यामुपासीत जपेच्च जुहुयादपि ॥

जुहुयादिति कर्त्रन्तराभावे वेदितव्यम् ॥

सूतके च प्रवासे च अशक्तौ श्राद्धभोजने ।
एवमादिनिमित्तेषु भावयेद्वेति योजयेत् ॥

इति कात्यायनस्मरणात् ॥

**Colophon:**

गौरीमायूरमप्पादीक्षितविरचिते आचारनवनीते श्राद्धपरिच्छेदः समाप्तः ॥

इदं लिखितं वेङ्कटेश्वरेण ॥

## No. 2742. कमलाकरभट्टीयम्.

## KAMALĀKARABHAṬṬĪYAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 232. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

A work on Dharmaśāstra by Kamalākarabhaṭṭa son of Rāmakṛṣṇabhaṭṭa. Deals with the rights and duties of Śūdras.

Begins on fol. 10*a*. The other works herein are—Nārāyaṇabaliprayōgaḥ (Tamil) 1*a*, Nārāyaṇabaliprayōgasaṅkalpa 117*a*.

Complete.

**Beginning:**

प्रणम्य रामं पितरौ कमलाकरशर्मणा ।
रामकृष्णतनूजेन शूद्रधर्मो निरूप्यते ॥

तत्र शूद्रत्वं ऊढसवर्णजत्वं पितृ(विप्र)त्वादिवत् । यद्यपि सर्गाद्यकालीने विश्वामित्रादौ च नैतत्; तथापि तत्राद्दष्टविशेषारब्धशरीरत्वमेव ब्राह्मणत्वम्, अन्यत्र तु पूर्वोक्तमेव शूद्रेऽपि इति दिक् । तत्र पद्भ्यां शूद्रो अजायत, शूद्रो मनुष्याणामश्वः पशूनाम् इति बह्वृचतैत्तिरीयादिश्रुतिभिः,

मुखबाहूरुपज्जातास्तस्य वर्णा यथाक्रमम् ।
लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः ॥
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ।

इति मन्वादिस्मृतिभिश्च शूद्रस्य वर्णत्वेऽपि कर्मणां निषेधो वचनान्न्यायाच्च गम्यते ।

**End:**

यो भट्टतन्त्रग्रहणार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।
योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनास्तु स कृती बुधरामकृष्णः ॥

**Colophon:**

इति जगद्गुरुमीमांसकनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमला-करभट्टकृते शूद्रधर्मतत्त्वे शूद्रसमसङ्करजस्वरूपं तद्वृत्तिनिरूपणम् ॥

समाप्तश्चायं निबन्धः ॥

---

## No. **2743.** कमलाकरभट्टीयम्.

## KAMALĀKARABHAṬṬĪYAM.

Pages, 118. Lines, 22 on a page.

Begins on fol. 223*a* of the MS. described under No. 2714.

Contains to the end of Śrāddhaprayōga.

Same work as the above.

---

## No. **2744.** चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 589. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

A digest of all Smṛti rules by Hēmādri. Contains the Kāṇḍa on expiations complete with index.

Begins on fol. 1*a*. The other work herein is, Karmavipākaḥ 296*a*.

**Beginning:**

कमलादयितं कृष्णं कमलासनसंस्तुतम् ।
कमलाक्षमहं वन्दे कमलाकरशायिनम् ॥

अथेदानीं हेमाद्रिकारिणा लोकोपकारार्थं सर्वपुराणस्मृतिसंहिता-वेदज्यो(ज्यौ)तिषवैद्यागमश्रौतस्मार्तसूत्रेषु ग्रन्थानालोच्य ब्रह्मक्षत्रविशां शूद्रादीनां ब्रह्महत्यादिसमानि पापानि वाङ्मनःकायसम्भवानि हिंसादीनि सम्भवन्ति ; तेषां पापानामपनोदनप्रायश्चित्ताध्यायो लिख्यते । तथा हि—

विप्रादीनां चतुर्णां पापभीरूणां प्रतिग्रहादिदोषैर्हिंसादिनिमित्तैः क्रयविक्रयादिभिः ब्राह्मणशुश्रूषाकरणादिनिमित्तैरनेकदोषास्सम्भवन्ति ; तन्निरासार्थं प्रायश्चित्तपराङ्मुखानां दोषबाहुळ्यात्तत्तद्दोषापनोदनं प्रायश्चित्तं पूर्वोक्तेषु ग्रन्थेषु मुनिभिर्दृष्टम् ; तदेव प्रायश्चित्तं मया निरूप्यते । वर्णाश्रमभेदेन तदकरणे पापहननदोषाधिकतया प्रायश्चित्तं प्रदर्शितम । तदेवाह—

"ब्रह्महा क्षयरोगी स्यात्सुरापी श्यावदन्तकः ।
सुवर्णचोरः कुनखी दुश्चर्मा गुरुतल्पगः ॥"

इत्यादिनिमित्तैस्समस्तदोषोपशान्त्यर्थं कुत्रचिन्मरणान्तप्रायश्चित्तं कुत्रचित्पुनस्संस्काररूपम् ॥

**End:**

विधवायाः अस्नानभोजन - पर्वकालरात्रिभोजन - ताम्बूलचर्वण - पर्युषितान्नभोजन-पान-मलिनवस्त्रधारण-केशरक्षण-तीर्थाचरणराहित्य-ललाटे सुगन्धधारण-कस्तूर्यालेपन-पुष्पधारण - कांस्यपात्रभोजन - एकभुक्तराहित्य - एकादश्युपवासराहित्य-दशमीद्वादशीरात्रिभोजन- * * * * * परपुरुषेण सह सङ्गम-एकादशीदिनसाळग्रामतीर्थराहित्य-भोजनादीनामनुलोमेन पापसाधारणापनोदकं प्रायश्चित्तं धर्मशास्त्रोक्तमार्गेण प्रत्याम्नायरूपेण साध्यमखण्डं प्राच्योदीच्याङ्गसहितमाचरिष्य इति सङ्कल्प्य उक्तमार्गेण कुर्यात् ॥

इति महाप्रायश्चित्तम् ॥

सुलभप्रायश्चित्तम् ॥

**Colophon:**

इति हेमाद्रिविरचिते धर्मशास्त्रे प्रायश्चित्तकाण्डस्सम्पूर्णः ॥

दुन्दुभौ कन्नि(न्य)काश्वेतत्रयोदश्यां विधोर्दिने ।
हेमाद्रिणा विरचितः प्रायश्चित्ताभिधश्शुभः ॥
काण्डः श्रीशैलवेदान्तरामानुजवता(नुषा) स्वयम् ।
विलिख्य तातदासेन समग्रं च समापितः ॥

दुन्दुभौ मिथुने मासे चतुर्थदिवसे त्वयम् ।
आरब्धः कन्यकामासद्वाविंशतिदिने(दिवसे) पुनः ॥
समाप्तश्च त्रयीचूडारामानुजवता(नुषा) सता ।
तातदासेन चाहत्य ह्येकोनाशीतिवासराः ॥

---

## No. 2745. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 348. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Prāyaścittakāṇḍa.

Begins on fol. 1*a*. The other works herein are, Nārāyaṇabaliprayōga 175*a*, Cāturmāsyavratakalpa 178*a*.

Contains the whole of the chapter dealing with the purification ceremony relating to a woman becoming pregnant in the year of her marriage.

---

## No. 2746. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $18 \times 1\frac{3}{8}$ inches. Pages, 528. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Prāyaścitta kāṇḍa incomplete. From the beginning to Brahmakṛcchrapratyāmnāya. Fol. 120 to 150 are lost.

---

## No. 2747. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 511. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, new.

From the beginning to the end of Cāndrāyaṇādikṛcchrapratyāmnāya.

Prāyaścittakāṇḍa incomplete.

Same work as the above.

## No. 2748. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 16¾ × 1⅜ inches. Pages, 168. Lines, 8 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Kṛṣīvalaprāyaścitta to Nimittagōvadhaprāyaścitta; incomplete.

With index.

---

## No. 2749. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 4. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, new.

Begins on fol. 1*a*. The other works herein are—Vaiśvadēvavidhi 3*a*, Yatidharmasamuccaya 5*a*, Sannyāsavidhi 7*a*, Cāturmāsyavidhi 12*b*, Yatisaṁskāravidhi 15*a*, Āturasannyāsavidhi 16*b*.

Contains Sannyāsipratigrahaprāyaścitta alone.

---

## No. 2750. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 328. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

A work on Hindu law and ritual in five Kāṇḍas by Hēmādri who lived under King Mahādēva in the 13th century.

Dānakāṇḍa complete.

**Beginning:**

अथ दश महादानान्युच्यन्ते—

तत्त्वा(त्ता)द्दाग्विमलं (कुलं) निरवधिर्विद्यानवद्या कृतिं(ति):
सम्पत्कम्पितदैत्यसैन्यनिवहा मा(धुर्य)धुर्या गिरः ।

इत्यन्योन्यजिगीषयेव गुरुतां यस्मिन् भजन्ते गुणाः
तेनायं विधिरुच्यते दशमहादानेषु हेमाद्रिणा ॥

तत्सङ्ग्रहश्लोकस्तु कूर्मपुराणे—

कनकाश्व(श्व)तिला नागा दासीरथमहीगृहाः ।
कन्या च कपिला धेनुः महादानानि वै दश ॥

तत्र प्रथमनिर्दिष्टतया (कनक)मेव तावदुच्यते स्कान्दे काशीखण्डे.

End:

वृक्षैर्विना शुभगतिर्न भवेन्नराणां
दुष्पुत्रकैरिव तथोभयलोकनाशः ।
एतद्विचार्य सुधिया परिपाल्यवृक्षाः
(पुंसा) पुराणविधिना परिकल्पनीयाः ॥

इति तरुपुत्रविधिः ॥

पर्यवसितं चानन्तफलदानप्रकरणम् ॥

अस्ति ध्वस्तसमस्तवैरिनिवहो वीरश्रियाप्लुत(स्फुर)-
ज्ज्वा(ज्जै)त्रक्षेत्रनिवासभूरिह महादेवो महीवल्लभः ।
तस्य श्रीकरणाधिपो विजयते हेमाद्रिरावारिधि
क्षोणीमण्डलमण्डनीकृतमहाराशिप्रकाशोदयः ॥

चिन्तामणौ महाशास्त्रे तेन हेमाद्रिणा कृते ।
दानखण्डाभिधं काण्डं जगाम परिपूर्णताम् ॥

यदीयनाम्नाङ्क निनां(कृतिं) च कर्तुर्नो(र्तुं ना)न्यो मुनिभ्यः प्रभुतामुपैति ।
दानानि तान्याचरितुं च वक्तुं हेमाद्रिदेवो भुवि दृष्टिपादः ॥

Colophon:

इति श्रीमन्महाराजाधिराजश्रीमहादेवस्य समस्तकरणाधीश्वरसकलविद्याविशारदश्रीहेमाद्रिविरचिते चतुर्वर्गचिन्तामणौ दानकाण्डस्समाप्तः ॥

## No. 2751. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 15⅞ × 1¼ inches. Pages, 410. Lines, 6 on a page. Character, Nandināgarī and Telugu. Condition, injured. Appearance, old

Breaks off in Kṣīradhēnupratigrahaprāyścitta in the Prāyaścitta prakaraṇa.

Same work as the above.

---

## No. 2752. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 15⅞ × 1⅛ inches. Pages, 408. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

From Bhujagadāna to Ubhayatōmukhagōdāna.

Same work as the above.

---

## No. 2753. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 14⅞ × 1⅝ inches. Pages, 380. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Dānakāṇḍa to the end of the chapter on Tiladāna or gift of sesamum.

Same work as the above.

---

## No. 2754. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Pages, 30. Lines, 25 on a page.

Begins on fol. 367 of the MS. described under No. 2109.

From Lakṣahōmapaddhati to Rasadhēnudāna.

Dānakāṇḍa incomplete.

## No. 2755. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 295. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Dānakāṇḍa incomplete.

Same work as the above.

---

## No. 2756. चतुर्वर्गचिन्तामणिः.

## CATURVARGACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 18¼ × 1½ inches. Pages, 23. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, new.

Rōgaśāntiprakaraṇa in Prāyaścittakāaṇḍa incomplete.

**Beginning:**

रोगशान्तिं प्रवक्ष्यामि रोगार्तानां शरीरिणाम् ।
बलिपूजाङ्गहोमैश्च जपब्राह्मणभोजनैः ॥
यस्मिन् धिष्ण्ये यथा नृणां रोगस्सञ्जायते तथा ।
तद्धिष्ण्यपूजा कर्तव्या तदीश्वर(सु)तृष्ण(प्त)ये ॥
सुवर्णेन प्रमाणेन तत(त्तद)र्धेन वा पुनः ।
धिष्ण्येशप्रतिमां कुर्याद्यथावित्तानुसारतः ॥
ईशान्यामथ वा प्राच्यामुदीच्यां वा समाहितः ।
गोमयेनोपलिप्तायां रङ्गवल्लीं प्रकल्पयेत् ॥
तण्डुलास्तत्र दातव्यास्तन्मध्येऽष्टदळं लिखेत् ।
धिष्ण्येशप्रतिमां तत्र स्थापयेद्देशिकोत्तमः ॥

**End:**

प्रगृह्णीष्व बलिञ्चेमं दाहरूपमहाज्वरम् ।
आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबलः ॥
इति तापज्वरशान्तिः ॥

अथैहि(क)तापज्वरहराणि ।

तस्करो यो वृथाप्राणिहिंसको निर्दयेच(यश्च)यः ।
आतुरस्य शु(सु)खं सिद्धिं प्र . . . ॥
आचाररहितो यश्च परकर्मसुनिन्दकः ।
अधर्मनिरतो यश्च तानेतान् ज्वरसौ(सं)ज्ञिकः ॥
ग्रहो गृह्णाति तन्मात्रादेकरात्रज्वरी भवेत् ।
द्विरात्रेण त्रिरात्रेण चतूरात्रे(ण) ज्वरेण तथा शीतज्वरेण सततज्वरेण॥

---

## No. 2757. द्रव्यशुद्धिदीपिका.
## DRAVYAŚUDDHIDĪPIKĀ.

Substance, paper. Size, $7\frac{1}{4} \times 3\frac{3}{4}$ inches. Pages, 141. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

Gives the method of purifying metals and of getting rid of pollution caused by contact.

Complete.

Wants one leaf in the beginning. A work on ceremonial purification by Purusōttama.

**Beginning:**

शुद्धिकाला(:)। स्पर्शः स्पृष्टं तस्य स्पृष्टं तत्स्पृष्टम्। तदस्यास्तीति तत्स्पृष्टीत्यत्र तत्पदेन दिवाकीर्त्यप्रभृतयः पञ्चापि परामृश्यन्त इति । अपरार्केऽप्येवम्। तेन पञ्चास्पृशामपि स्पर्शे स्नानम्। यद्यप्यत्र स्नानमात्रमुक्तम्; तथापि सचेलस्नानं सर्वसम्मतम् ।

" श्वानं श्वपाकं धूमश्च देवद्रव्योपजीविनम ।

ग्रामयाचकं सोमविक्रयिणं चितिं चितिकाष्ठं मद्यं मद्यभाण्डं सस्नेहं मानुषास्थि शवस्पृशं महापातकिनं शवं स्पृष्टा सचेलमम्भोऽवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्र्यष्टशतं जपेत् । घृतं प्राश्य स्नात्वा त्रिराचामेत् " इति च्यवनवचनात् । तेन रजस्वलाशवचण्डालपति(त)सूतिकातत्स्पर्श-

शावाशौचितत्स्पर्शिस्पर्शे सचेलस्नानं, तद्व्यतिरिक्तस्नानार्हस्पर्शे त्वाचमनमिति सिध्यति। ते च स्नानार्हा विज्ञानेश्वरेण सङ्गृहीता अग्रे वाच्या(:)। साम्प्रतन्तु रजस्वलादिस्पर्शे विषये विशेष उच्यते ।

**End:**

आहारशुद्धिश्च स्ववर्णाश्रमवृत्त्या सम्पादितान्नेन; तस्य च सिद्धस्य भगवति समर्पणानन्तरं प्रसादतया तद्भोजनेन। तदुक्तं हरिवल्लभसुधा(धो)दयनिबन्धे ब्रह्माण्डे—

पादोदकं पिबन्नित्यं तन्निवेदितमग्रतः ।
अद्यादात्मविशुद्ध्यर्थं सर्वकामाप्तये तथा ॥ इति ॥

पाद्मेऽपि—

मुकुन्दाशनशेषन्तु यो हि भुङ्क्ते दिनेदिने ।
सिक्थे सिक्थे भवेत्पुण्यं चान्द्रायणशताधिकम् ॥
भुक्त्वान्यदेवनैवेद्यं द्विजश्चान्द्रायणं चरेत् ।
भुक्त्वा केशवनैवेद्यं सर्वपापैः प्रमुच्यते ॥ इति ॥

अतो ज्ञानपक्षेऽपि स्वरूपोपकाराय स्मरणादिरूपा भक्तिरवश्यमपेक्षितेति सैवात्मशोधनाय सेवोपयोगाय च कर्तव्येति दिक् ।

इति श्रीवल्लभाचार्यचरणाब्जप्रसादतः ।
नानानिबन्धानालोक्य द्विधा शुद्धिः स्फुटीकृता ॥

**Colophon:**

इति श्रीमद्वल्लभाचार्यचरणाब्जदासदासेन पीताम्बरात्मजेन पुरुषोत्तमेन स्फुटीकृता द्रव्यशुद्धिदीपिका सम्पूर्णा ।

---

## No. 2758. धर्मप्रवृत्तिः.

## DHARMAPRAVṚTTIḤ.

Pages, 236. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 1164.

Complete. To the end of Pūrvāparaprakaraṇa.

At the end there are 3 pages containing the following: Patitasrāddhavidhi, Darśanirṇaya, Dvibhāryāgnisaṁsarga, Darśanirṇaya (again).

Copied from the book of Madura Subbanna resident of Śaṅkaragupta.

**Beginning:**

नारायणं नमस्कृत्य कामदां च सरस्वतीम् ।
गणनाथं गुरूंश्चापि धर्मसंरक्षणाय वै ॥

धर्मप्रवृत्तिः क्रियते कलौ नारायणेन तु ।
विदुषां कर्मनिष्ठानां सम्मता धर्मवर्धनी ॥
आलोक्य धर्मशास्त्राणि मन्वादिरचितानि वै ।
आश्वलायनसूत्रं च वृत्तिं नारायणं(णीं) तथा ॥

सारमेवं समुद्धृत्य स्मृतीनां वचनान्यथ ।
सिद्धान्तानि समूलानि समादायाथ चैव हि ॥
वचनानि सतां चैव सम्मतानि मनीषिणाम् ।
ग्रन्थेऽस्मिंस्तानि लिख्यन्ते धर्मप्रवृत्तिसंज्ञि(ज्ञ)के ॥
शौचादिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ।
तिथीनामपि सर्वासां निर्णयानस्य(प्य) संशयान्(यम्) ॥

यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत[ः] ।
धर्मसंरक्षणा(र्था)य तस्मिन्देशे वसेद्द्विजः ॥

अथ नित्यविधिः —

उषःकाले समुत्थाय चिन्तयेदात्मनो हितम् ।
स्मृत्वा नारायणं देवं स्तोत्राण्यपि च सञ्जपेत् ॥

**End:**

ब्राह्मणी(णा)नां सपिण्डेषु कर्तव्यः पुत्रसङ्ग्रहः ।
तदभावे सगोत्रेषु अन्यत्र तु न कारयेत् ॥

**Colophon:**

इति श्रीनारायणविरचितायां धर्मप्रवृत्तौ पूर्वापरप्रकरणं समाप्तः(म्) ॥

शुभकृद्वत्सरे चैव ज्येष्ठमासे मलिम्लुचे ।
ऋतौ ग्रीष्मे शुक्लपक्षे षष्ठ्यां तु स्थिरवासरे ॥
धर्मप्रवृत्तिरित्याख्या लिखितेयं मया स्मृतिः ।
श्रीमद्वल्लान्वये जातो नर(नृ)सिंहाख्यस्सुबुद्धिमान् ॥
तस्य पुत्रोऽभवच्छ्रीमान्सर्वशास्त्रविशारदः ।
श्रीमन्नारायणेन्द्राख्यस्वामिशिष्यश्च भक्तिमान् ॥
रामचन्द्रपदाम्भोजे वीरराघवपण्डितः ।
त्रयाणां तस्य पुत्राणां कनीयांश्चैव भक्तिमान् ॥
श्रीरामचरणाब्जे तु नाम्ना वेङ्कटपण्डितः ।
मया यल्लिखितं ग्रन्थं तत्सर्वं क्षम्यतां हरिः ॥
श्रीमदिन्दुपुरीशाय कौसलेयाय धन्विने ।
सीतालक्ष्मणयुक्ताय मायातीताय ते नमः ॥
जननी जानकी साक्षाज्जनको रघुनन्दनः ।
भरतो मे पितृव्यस्तु हरयो मम बान्धवाः ॥

Contains the following Prakaraṇas :—

१. नित्यकर्मप्रकरण.
२. गर्भाधानादिपञ्चदशप्रकरण.
३. नानाविधश्राद्धविधिप्रकरण.
४. आशौचविधिप्रकरण.
५. श्राद्धप्रकरण.
६. श्राद्धप्रकरण(प्रकारान्तर)
७. दानप्रकरण.
८. सर्वशुद्धिप्रकरण.
९. प्रायश्चित्तप्रकरण.
१०. नवरात्रिप्रकरण.
११. तिथिनिर्णयप्रकरण.
१२. स्थालीपाकादिमङ्गलान्तप्रकरण.
१३. पूर्वापरप्रकरण.

## No. 2759. धर्मप्रवृत्तिः.
## DHARMAPRAVṚTTIḤ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 214. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Breaks off in Prāyāścittaprakaraṇa.

Same work as the above.

## No. 2760. धर्मप्रवृत्तिः.
## DHARMAPRAVṚTTIḤ.

Substance, palm-leaf. Size, 17⅝ × 1¼ inches. Pages, 231. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 209*a*. The other work herein is, Smṛtiratnākara 1*a*.

At the end there is an index of Dharmapravṛtti extending over 19 pages.

Complete.

Same work as the above.

## No. 2761. धर्मप्रवृत्तिः.
## DHARMAPRAVṚTTIḤ.

Substance, palm-leaf. Size, 13¼ × 1⅜ inches. Pages, 208. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

To the end of Upapātakaprāyaścitta.

Begins on fol. 1*a*. The other works herein are, Vighnēśvarastōtra 105*a*, Kāvērībhujaṅga 106*a*, Raṅganāthāṣṭaka 107*b*.

## No. 2762. धर्मप्रवृत्तिः.
## DHARMAPRAVṚTTIḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 294. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Dharmaśāstravacanāni, 148*a*.

## No. 2763. धर्मप्रवृत्तिः.

## DHARMAPRAVṚTTIḤ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 99. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, not new.

From Dānaprakaraṇa to Anadhyāyanirṇaya.

Begins on fol. 60*a*. The other works herein are—Ṣaḍaśītivyākhyā 1*a*, Aśvatthavivāhakalpa 110*a*, Saṅkaramṛtatithinirṇaya 113*a*, Śivarātrinirṇaya 117*a*, Grahaṇanirṇaya 120*b*, Malamāsanirṇaya 124*b*, Anantavratōdyāpanavidhi 131*a*, Saṅkarakulalakṣaṇaṁ 142*a*, Vyāsapūjāvidhi 143*a*.

---

## No. 2764. धर्मशास्त्रविषयः.

## DHARMAŚĀSTRAVIṢAYAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 928.

A work on Dharma.

Incomplete.

**Beginning:**

कृतेऽकृते वा सापिण्ड्ये मातापित्रोः परस्य वा ।
अर्वाक्संवत्सराद्वृद्धिः त्रिपक्षस्योपरि क्रिया ॥

पित्रोर्देशान्तरमरणविषये तत्र सुदर्शनकारः—

देशान्तरस्थः पितरौ मृतौ चेदन्येन यत्कार्यमशेषकर्म ।
दाहं विना तच्च पुनस्तु सर्वं ज्येष्ठः प्रकुर्यादनुजैस्सपिण्डनम् ॥

* * * *

तत्र सुदर्शनकारः—

असंक्रान्ते तु सङ्कल्पविधानन्तु यदुच्यते ।
मनुनोक्तमयं धर्मो विन्ध्यस्योत्तरवासिनाम् ॥

इति अधिमासविधिस्समाप्तः ॥

**End :**

अतो मलमासमृतानां कदाचित्प्रत्याब्दिकं मलमासे कार्यम् । शुद्ध-मासमृतानान्तु प्रथमाब्दिकं तत्र कार्यम् । द्वितीयाब्दिकन्तु शुद्धमास इति । एतन्निर्णयमभिप्रेत्य नित्यकार्याणि चोभयोरित्यादिवचनानि प्रवृत्तानि । केचिदेव(वं) व्याख्यानं कुर्वन्ति—मलमासमृतानान्ते वर्षे वर्षे य.

---

No. **2765.** धर्मशास्त्रविषयः.

DHARMAŚĀSTRAVIṢAYAḤ.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 59. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Appears to be a collection from various Smṛtis.

Begins on fol. 1*a*. The other works herein are, Ṣaṭkarmacandrikā 30*a*, Śrāddhaprayōga 48*a*, Upākarmavidhi 59, Vyākaraṇapatra 75*a*, Hayagrīvapañjaramantra 82*a*, Tatvaṭīkā 88*a*.

**Beginning :**

शब्देनापोऽशनं पीत्वा शब्देन घृतपायसम् ।
शब्देनापःपयःपानं सुरापानसमं विदुः ॥
घृतहीनन्तु यो भुङ्क्ते नर(आ)हुतिपञ्चकम् ।
पश्चाद्घृतेन यो भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ॥
यस्यान्नं सूपसंयुक्तं प्राणस्यैवाहुतिर्भवेत् ।
श्वमांसतुल्यमाप्नोति(प्नातं) गार्ग्यकश्यपगौतमाः(मैः) ॥

**End :**

स्पृष्ट्वा तोयसरस्स्नायात् द्वात्रिंशद्वारमेव च ।
मन्त्रस्नानं ततः कुर्यात्पुण्याहेन विशुध्यति ॥
इत्यादिस्मृत्यन्तरवचनानि द्रष्टव्यानि ॥
षट्त्रिंशत्स्थले—
देवयात्राविवाहेषु यज्ञेषु प्रकृतेशुचि(षु च) ।
उत्सवेषु च सर्वेषु स्पृष्ट्वा स्पृष्टिर्न विद्यते ॥

No. 2766. भगवन्तभास्करः.

BHAGAVANTABHĀSKARAḤ.

Substance, paper. Size, 11 × 4¾ inches. Pages, 290. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Also a work on Dharma Śāstra.

Contains two Mayūkhas. Vyavahāra 1*b* and Nīti 79*b*.

This work is said to have been composed early in the 17th century by Nīlakaṇṭhabhaṭṭa son of Śaṅkarabhaṭṭa.

**Beginning** (of Vyavahāra):

उक्त्वा नृपनयरीतिं नत्वा भास्वत्पदाम्बुजं सम्यक् ।
विचर(रच)यति नीलकण्ठो व्यवहारविनिर्णये किंचित् ॥
द्विजराजैकमूर्धन्यवृषाध्यक्षशिवान्वितम् ।
काश्यां सर्वोपदेष्टारं भावये शङ्करं गुरुम् ॥
विरोधिमार्गद्वयदर्शनार्थं द्वेधा (बभू)वात्र परः पुमान् यः ।
श्रीशङ्करो भट्ट इहैकरूपो मीमांसकाद्वैतमुरीचकार ॥
प्रतारकैराहृतमत्र किंचिन्मया तु निर्मूलतया तदूहितम् ।
ऊनोक्तिभावेन हितेन काचित् वपुष्यहीनापचितिर्न हीयते ॥

विप्रतिपद्यमाननरान्तरङ्ग(ग)ताज्ञाताधर्मज्ञापनानुकूलो व्यापारो व्यवहारः; वादिप्रतिवादिकर्तृकः सम्भवद्भोगसाक्षिप्रमाणके(को) विरोधिकोटिव्यवस्थापनानुकूलो वा व्यापारः सः । सम्प्रतिपत्त्युत्तरे तु व्यवहारपदप्रयोगो भाक्(क्तः)—इति मदनरत्ने । वादवितण्डादिव्यावृत्त्यर्थमुत्तरदलम् ॥

अथ तत्पदम् । याज्ञवल्क्यः—

"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति यद्राज्ञे व्यवहारपदं हि तत् ॥"

आधर्षितः तिरस्कृतः । तस्याष्टादशभेदानाह मनुः—

"तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म च ॥

वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादस्स्वामिपालयोः ॥

सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके ।
स्तेयं च साहसं चैव स्त्रीसङ्ग्रहणमेव च ॥

स्त्रीपुंधर्मो विभागश्च द्यूतमारू(ह्व)य एव च ।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥" इति ॥

**End :**

यच्च यस्योपकरणं येन जीवन्ति कारुकाः ।
सर्वस्वहरणेऽप्येतन्न राजा हर्तुमर्हति ॥

अन्यथा(न्याया)द्गृहीतस्य दण्डस्य प्रतिपत्तिमाह याज्ञवल्क्यः —

"राजा न्यायेन यो दण्डो गृहीतो वरुणाय तम् ।
निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ॥"

त्रिंशद्गुणं वरुणोद्देशेन सङ्कल्प्य विप्रेभ्यो दद्यादित्यर्थः ॥

**Colophon :**

इति श्रीमीमांसकशङ्करभट्टात्मजभट्टनीलकण्ठस्य कृतौ भगवद्भास्करे व्यवहारमयूखस्समाप्तः ॥

**Beginning** (of Nīti) :

एतदेवर्षिसङ्घानामवाङ्मनसगोचरम् ।
प्रत्यक्षमपि तद्धाम सर्वदा समुपास्महे ॥ १ ॥

विरोधिमार्गद्वयदर्शनार्थं
द्विधा बभूवात्र परः पुमान् यः ।
श्रीशङ्करो भट्ट इहैकरूपो
मीमांसकाद्वैतगुरीचकार ॥ २ ॥

पितृसौदि(हि)त्यसंसिद्धिहेतुमुक्त्वाथ तत्सुतः ।
नीलकण्ठः प्रकुरुते राजनीतिं नृपादृताम् ॥ ३ ॥

तत्र राजशब्दः क्षत्रियमात्रे शक्तो न राज्ययोगिनि । ।अभिषेकोत्तरभाविराज्ययोगात् प्रागपि राजानमभिषिञ्चेदित्यादेः शास्त्रीयप्रयोगस्य क्षत्रियमात्रेऽपि सद्भावादिति निरणाय्यवेष्ट्यधिकरणे तस्य च विधिवदभिषिक्तस्य प्रजापालनं धर्म इत्याह मनुः —

"ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥"

**End :**

अथाश्वस्य चतुष्षष्टिपदगमनप्रकारः ।

सिंहलद्वीपराज्ञः(जस्य) श्लोकौ —

* * * *

अथ तातचरणानां श्लोकौ —

* * * *

अथ मामकः प्रकारः —

आद्यं वस्वेकमष्टाद्रिशिखिविधुपदं वह्निजं नन्दिसंज्ञं
वेदैकं पञ्चयुग्मं शरहरनयनं खाशुगं त्रित्रियुक्तम् ।
अश्वद्विव्योमचन्द्रं युगमितमुडुराडक्षिमद्रित्रिपञ्चै-
वस्व(वाश्वाक्षि)च्छि(द्र)भूमिज्वलनमुदधिकुद्वैरदं त्रिद्विषष्ठम् ॥

* * * *

पुनुरन्तपदितो वाजिनं नीलकण्ठः ॥

**Colophon :**

इति श्रीजगद्गुरुभट्टनारायणसूरिसूनुपण्डितशिरोरत्नमीमांसकशङ्करतदात्मजनीलकण्ठकृते भास्करे नीतिमयूखस्सम्पूर्णः[स्समाप्तः] ॥

## No. 2767. भगवन्तभास्करः.

## BHAGAVANTABHĀSKARAḤ.

Substance, paper. Size, 13⅛ × 8⅛ inches. Pages, 171. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, old.

Vyavahāramayūkha complete.

Same work as the above.

---

## No. 2768. भगवन्तभास्करः.

## BHAGAVANTABHĀSKARAḤ.

Substance, palm-leaf (Srītāla). Size, 16 × 2⅛ inches. Pages, 108. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Vyavahāramayūkha complete.

Same work as the above.

---

## No. 2769. सदाचारसङ्ग्रहः.

## SADĀCĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 11⅞ × 1⅜ inches. Pages, 56. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Incomplete.

By Śrīnivāsapaṇḍita.

**Beginning :**

प्रणम्य यादवाद्रीशं श्रियं गुरुपरम्पराम् ।
तत्कृपालब्धधीर्वक्ष्ये सदाचारस्य सङ्ग्रहम् ॥

आचारकाण्डः प्रथमः व्यवहारो द्वितीयकः ।
तृतीयो निष्कृतेः काण्डः ग्रन्थेऽस्मिन् सम्यगीरितः ॥

मन्वादिधर्मशास्त्राणि समालोक्य सतां मुदे ।
क्रियते श्रीनिवासेन नवनीताख्यसङ्ग्रहः ॥

धर्मात्मानं प्रणम्याहं धर्मस्य प्रभुमच्युतम् ।
करिष्ये धर्मशास्त्रेभ्यः सदाचारस्य सङ्ग्रहम् ॥

ब्राह्मे मुहूर्त उत्थाय धर्मार्थावनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

वेदतत्त्वार्थशब्देन परं ब्रह्माभिधीयते ।
नारायणः परं ब्रह्म तत्त्वं नारायणः परः ॥

नक्षत्रज्योतिरारभ्य त्वा सूर्योदयदर्शनात् ।
प्रायः सन्ध्येति तां प्राहुः सूरयो मुनिसत्तमाः ॥

**End:**

पीताम्बरमुदाराङ्गं वनमालाविभूषितम् ।
चिन्तयित्वा नमः कृत्वा कीर्तयेद्दिव्यनामभिः ॥

सङ्कीर्त्य नामसाहस्रं नमः कृत्वा गुरूनपि ।
तुलसीं ब्राह्मणं गाश्च संस्पृशेत्सुसमाहितः ॥

या दृष्टा सकलाघसङ्घशमनी स्पृष्टा वपुःपावनी
रोगाणामभिवन्दिता निरसनी सिक्तान्तकना(त्रा)सिनी ।
प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य सन्तोषिणी
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥

श्रियः प्रिये श्रियावासे नित्यं श्रीधरवल्लभे ।
भक्त्या दत्तं मया तोयं तुलसि प्रतिगृह्यताम् ।

मनःप्रसादजननि सर्वसौभाग्यदायिनि ।
आधिं व्याधिश्च हर मे तुलसि त्वां नतोऽस्म्यहम् ॥

श्रियं देहि यशो देहि कीर्तिमायुस्तथा सदा ।
बलं पुष्टिं तथा धर्मं तुलसि त्वं प्रयच्छ मे ॥

---

No. 2770. सदाचारस्मृतिः.

SADĀCĀRASMṚTIḤ.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{1}{8}$ inches Pages 7. Lines, 5 on a page. Character, Nandināgarī and Telugu. Condition, injured. Appearance, old.

Begins on fol. 7*b*.

The other works herein are, Viṣṇusmṛti 1*a*, Brahmasūtrāṇubhāṣya 10*b*, Tantrasāra 13*b*, Pāpapuruṣavisarjana 16*a*, Tantrasāra saṅgraha 17*a*.

Complete.

A work on Dharmaśāstra by Ānandatīrtha.

**Beginning :**

यस्मिन्सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निरासी निर्ममो याति परं जयति सोऽच्युतः ॥ १ ॥
स्मृत्वा विष्णुं समुत्थाय कृतशौचो यथाविधि ।
धौतदन्तस्समाचम्य स्नानं कुर्याद्विधानतः ॥ २ ॥

**End :**

धाता पुरस्ताद्यमुदाजहार ।
शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
तमेवं विद्वानमृत इह भवति ।
नान्यः पन्था अयनाय विद्यते ॥ ३९ ॥
आनन्दतीर्थमुनिना व्यासवाक्यसमुद्धृतिः ।
सदाचारस्य विषये कृता सङ्क्षेपतश्शुभा ॥ ४० ॥
अशेषकल्याणगुणनित्यानुभवसत्तनुः ।
अशेषदोषरहितः प्रीयतां पुरुषोत्तमः ॥ ४१ ॥

**Colophon:**

इति श्रीसदानन्दतीर्थभगवत्पादाचार्यविरचिते सदाचारस्मृतिस्तोत्रं सम्पूर्णम् ॥

---

## No. 2771. स्मृतिकौमुदी.

## SMṚTIKAUMUDĪ.

Substance, paper. Size, 13⅛ × 8⅛ inches. Pages, 175. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

An exposition of the religious duties of Śūdras by Rāyamadanapāla.

Begins on fol. 1*a*. The other work herein is, Tattvārthavṛttiḥ 89*a*.

Complete in 5 Kiraṇas.

**Beginnnig:**

नमः परमकल्याणकारणाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥

अपत्यवात्सल्यवशादुदीर्णं
स्तन्यं पिपासुर्गिरिजाकुचाग्रे ।
मुहुः कराग्रं चलयन्निभास्यो
मनोरथान् नस्सफलीकरोतु ॥

प्रवाळाद्रिप्रस्थद्युतिनिचयपर्यायवपुषे
नमो विघ्नश्रेणीविघटनवरिष्ठाय महसे ।
जगत्प्रादुर्भावस्थितिलयनिरायासरचना-
विनोदासक्ताय प्रणतफलसिद्धिप्रतिभुवे ॥

यदिन्दिरानाथपुरन्दराद्यै-
राराधितं भक्तिभरानताङ्गैः ।
श्रीचण्डिकायाश्चरणारविन्दं
वन्दामहे तत्कुलदेवतायाः ॥

* * * *

आसीदसीमगुणराजकुलाम्बुराशौ
उद्यन् प्रतापशुभकीर्तिघनप्रकाशः ।

लोके सदा हृदि धृतो गुणसन्निविष्ट-
श्रीरत्नपालनृपतिर्भुवनैकरत्नम् ॥

तस्यात्मजो विरहपाल इति प्रसिद्ध-
स्सिद्धाङ्गनाजनसमाजसमिद्धकीर्तिः ।

दानेन यस्सुकृतिनां क्षिपति स्म दैन्यं
सैन्यश्च वैन्यसदृशः प्रतिभूपतीनाम् ॥

सुतोऽस्य जातस्सुकृतोन्नतस्य
न तस्य कश्चित्सदृशो बभूव ।

यमस्खलत्सत्यमवेक्ष्य जा(ता)तो
नाम्ना हरिश्चन्द्र इति व्यधत्त ॥

तस्यात्मजोऽभूदतुलस्वभाव-
स्साधारणो भूमिपतिर्वदान्यः ।

अभूतपूर्वामवनीश्वराणा-
मजीगय(प)द्यो जगति स्वकीर्तिम् ॥

वन्दिच्छिदां(स्तुतां) विरुदकीर्तिमिहान्वितार्थां
कृत्वा परत्र च तदे(थै)व विधातुमिच्छुः ।

कीनाशपाशचयबद्ध(न्ध)विमोचनार्थं
तीर्थत्रयीकरविमुक्तिमचीकरद्यः ॥

अस्यात्मजः श्रीमदनोऽथ नाम्ना
धाम्ना च रूपेण च सङ्गतार्थः ।

रोषारुणे चक्षुषि यद्विपक्षो
नितान्तकान्तारसमासितोऽभूत् ॥
परिशीलयता कलाकलापं
विदधानेन च भूरिशः प्रबन्धान् ।
मदनेन महीभृताथ येन
प्रथिता नूतनभोजराजकीर्तिः ॥
यत्र प्रकाशनमहार्णवपारिजात-
सिद्धान्तगर्भतिथिनिर्णयसारमुख्याः ।
ग्रन्थास्तु येन रचिता विजयं भजन्ते
राज्ञां सभासु विदुषां वदनाम्बुजेषु ॥
वागुत्सवेन मतिमानतिमानशाखी
कीर्तेः पदं मदनपालमहीमहेन्द्रः ।
विद्वन्मुखेन तनुते विम(नु)तोऽर्जुनश्री-
रुत्पन्नचार(रु)किरणां स्मृतिकौमुदीं सः ॥
विद्वच्चकोररसनारुचिदानपटीयसी ।
सच्चित्तोत्पलजीवातुर्जयति स्मृतिकौमुदी ॥
वर्णाचारप्रकटनविधिर्ब्राह्मणादिक्रमेण
प्रोक्तः पूर्वैः खलु न कथिता मुख्यतश्शूद्रधर्माः ।
तस्मादेते विशदपदवीं नाश्रितास्तेन तुर्यं
वर्णं कृत्वा विषयमधुना वर्ण्यते वर्णधर्मः ॥

ननु च के ते पूर्वे? यैर्ब्राह्मणादिक्रमेण निरूपितो वर्णाचार(:); श्रुत्यर्थस्मृतिकर्तारो मन्वादय इति ब्रूमः । तत्र तावद्वर्णानामुत्पत्तिस्वरूपं वर्ण्यते; तदधीनत्वादाचाराणाम् ।

* * * *

इति कृतिमनोहरायां कौमुद्यां मदनपालराजेन्दोः ।
प्रथमेऽत्र कलोल्लासे प्रथमः किरणस्समाप्तोऽयम् ॥

**End:**

एवं दिनशेषं नीत्वा सन्ध्याकाले व्यतीते रात्रावपि वैश्वदेवं कृत्वा सति सम्भवे अतिथिपूजां विधाय बुभुक्षा चेदस्ति तर्हि रात्रावपि भुञ्जीत । केचन वैश्वदेवं रात्रौ नेच्छन्ति ॥

* * * *

**Colophon:**

इति कृतिमनोहरायां रायमदनपालराजेन्दोः ।
आम्नायकलोल्लासे पञ्चमकिरणस्समाप्तोऽयम् ॥

सङ्ख्यावन्विग(न्निवह)चकोरचर्चितायां
कौमुद्यां मदनमुखेन्दुनिर्गतायाम् ।
सम्पूर्णः प्रकृतिमनोहरः कलाना-
मुल्लासः श्रवणसुखावहश्चतुर्थः ॥

इति श्रीरायमदनपालविरचितायां शूद्रधर्मोत्पलद्योतिन्यां स्मृतिकौमुद्यां चतुर्थकलोल्लासे वैश्वदेवनिरूपणं नाम पञ्चमः किरणः ॥

समाप्तश्चतुर्थकलोल्लासः ॥
सम्पूर्णा चेयं स्मृतिकौमुदी ॥

---

No. 2772. स्मृतिकौमुदी.

SMṚTIKAUMUDĪ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 730. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Ācāra complete.

Copying is said to have been begun on the 4th Āvaṇi and finished at 10 P.M. on the 5th of Kārtigai in the year Śukla.

**Beginning:**

वागीश्वरीं हयास्यं च नत्वा विद्वदनुग्रहात् ।
सर्वलोकहितार्थाय क्रियते स्मृतिकौमुदी ॥

मन्वादिप्रणीतानामेव धर्मशास्त्राणां वेदमूलत्वात्तद(दु)क्तान्येव धर्मप्रमाणानीति [तद्धर्मप्रमाणानीति] तदधिगमोपयोगितया तच्छास्त्रप्रणेतारः प्रदश्य(दर्श्य)न्ते ।

ते तु मन्वङ्गिरा व्यासो गौतमोऽत्रिश्शुभो यमः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ॥

*   *   *   *

जाबालिर्जमदग्निश्च लोका(लौगा)क्षिर्ब्रह्मसम्भवः ।
इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः ॥

शङ्खोऽपि—

मनुयमदक्षविष्णवाङ्गिरोबृहस्पत्युशनसा(आ)पस्तम्बगौतमसंवर्तात्रेयमहावीत(शातातप)कात्यायनशङ्खलिखितपराशरव्यासप्रभृतयः ।

*   *   *   *

साधवश्शिष्टाः शिष्टाचारस्मृतिर्वेदः । त्रिविधं धर्मलक्षणमिति शिष्टानां स्वरूपमाह स एव—

धर्मेणाधिगतो यैस्तु वेदस्सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥ इति ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥

ननु यदि वेदविदामाचारः प्रमाणं तर्हि इन्द्रचन्द्रादेरहल्यातारादिगमनमपि प्रमाणं स्यात् । न च तथा; अतः कथमाचारः प्रमाणम् ?

तथाह गौतमः—

धर्मव्यतिक्रमो दृष्टः साहसं महतामपि ।

**End:**

अग्न्याधेयं पाकयज्ञमग्निष्टोमादिकान्मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥
पितैव गुरुरित्येव ततश्चैव पुरोहितः ।
आचार्यो वेददोक्त(ऽप्यृ)त्विक् गुरुत्वं चैव पञ्चसु ॥
सर्वलोकहितार्थाय क्रियते (कृतेयं) स्मृतिकौमुदी ।
वर्णानामाश्रमाणां च काण्डस्त्वाचारसंज्ञितः ॥ इति ॥

**Colophon:**

इति स्मृतिकौमुदिस्स(दी स)माप्ता ॥

---

No. **2773.** स्मृतिकौमुदीविषयसूचिका.

SMṚTIKAUMUDĪVIṢAYASŪCIKĀ.

Substance, palm-leaf. Size, 16⅝ × 1¼ inches. Pages, 28. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

This is an index to 200 pages of a copy of Smṛtikaumudī containing the Acārakāṇḍa alone.

**Beginning:**

स्मृतिकौमुद्यनुक्रमणिका.

१. धर्मशास्त्रप्रणेतारः, पुराणानि धर्मशास्त्राणि हेतुभिर्न हातव्यानि ।

२. शिष्टाचारः महद्वाक्यम्, न तेषामाचारः प्रमाणम्, प्रमाणाभावे शिष्टाचारः, वेदाध्ययनवत् धर्मशास्त्राध्ययनमपि नित्यम्, युगधर्माः, गृहस्थधर्माः, चत्वारिंशत्संस्काराः.

**End:**

मातु(:) श्रेष्ठचर । बीजप्राधान्यात्पिता श्रेयान्(न्) ; तदपेक्षया गायत्रीदाता, विद्यादाता यवीयानपि गरीयान् । भैक्षाचर्यम्. उपनयनभिक्षा ॥

---

No. 2774. स्मृतिचन्द्रिका.

SMṚTICANDRIKĀ.

Substance, palm-leaf. Size, 19 × 1⅝ inches. Pages, 198. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Varṇāśramadharma: deals with Saṁskāra and Āhnika.

Copying is said to have been begun by Aiyātirumali Vedānta Rāmānuja Tātāchāriar, at 10 A.M. on the 12th Cittirai (Newmoon day) and finished at 4 P.M. on the 14th of Vaikāsi, in the year Pramādi.

**Beginning:**

श्रीमते सकलज्ञानसाम्राज्यपदमीयुषे ।
गणेशाय नमो विघ्न(घ्नं)निघ्नते सर्वदा नृणाम् ॥

जयति गणपतेः परशुः सदोद्यतो विघ्नकण्टकच्छि(च्छे)दे ।
प्रणतानामभिलषितार्थसाधने (भवति यः) कल्यः ॥

जगत्सम्भूतिसंरक्षासंहारैकविरोधि(धायि)ने ।
नमो भगवते तस्मै चिदानन्दाय विष्णवे ॥

मन्मनस्सारसे नित्यं वसतात्सा सरस्वती ।
य(म)त्सरस्सूक्तिकुसुमविकासो यत्प्रसादतः ॥

वागीश्वरं गणेशं च नत्वा विद्वदनुग्रहात् ।
सर्वलोकहितार्थाय क्रियते स्मृतिचन्द्रिका ॥

स्वाभिप्रायेण हि मया न किञ्चिदिह लिख्यते ।
किञ्च वाचन(नि)कं सर्वमतो ग्राह्यैव निर्भयैः ॥

मन्वादिप्रणीतानामेव धर्मशास्त्राणां वेदमूलत्वात्तान्येव धर्मप्रमाणानीति तदधिगमोपयोगितया तच्छास्त्रप्रणेतारः प्रथमं प्रदश्य(दर्श्य)न्ते ।

तत्र पैठीनसिः—

"तेषां मन्वङ्गिरोव्यासगौतमात्र्युशनोयमाः ।

* * * *

जाबालिर्जमदग्निश्च लोका(लौगा)क्षिर्ब्रह्मसम्भवः ।

इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः ॥" इति ॥

**End:**

अत्र कूर्मपुराणम्—

"इत्येतदखिलं प्रोक्तमहन्यहनि वै द्विजाः ।

ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥

नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः ।

स याति नरकान् घोरान् काकयोनौ च जायते ॥

नान्यो विमुक्तये पन्थाः मुक्त्वाश्रमविधिं स्वकम् ॥

तस्मात्सर्वाणि कुर्वीत तुष्टये परमेष्ठिनः ।" इति ॥

साह्निक(कं)व्यव(द)धाद्देवः केशवार्यसुतस्सुधीः ।

सर्वैर्वाचनिकैरर्थैरच्युतः प्रीयतां ध्रुवम् ॥

**Colophon:**

इति श्रीसकलविद्याविशारदश्रीकेशवाचार्यभट्टोपाध्यायसूनुयाज्ञिकदेवणभट्टोपाध्यायविराचितायां स्मृतिचन्द्रिकायामाह्निकं समाप्तम् ॥

---

## No. **2775.** स्मृतिचन्द्रिका.

### SMṚTICANDRIKĀ.

**Pages, 21. Lines, 5 on a page.**

Begins on fol. 35*a* of the MS. described under No. 2539.

It treats of Gāyatrīviṣaya in the Āhnikakāṇḍa.

## No. 2776. स्मृतिचन्द्रिका.

## SMṚTICANDRIKĀ.

Substance, palm-leaf. Size, 17 × $1\frac{1}{8}$ inches. Pages, 336. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Āhnikakāṇḍa incomplete.

Same work as the above.

---

## No. 2777. स्मृतिचन्द्रिका.

## SMṚTICANDRIKĀ.

Substance, palm-leaf. Size, $16\frac{5}{8}$ × $1\frac{1}{4}$ inches. Pages, 388. Lines, 6 on a page. Character, Grantha. Condition, very much injured. Appearance, old.

Śrāddhakāṇḍa complete.

**Beginning :**

उक्तमाह्निके नित्यश्राद्धम् । तत्प्रसङ्गादधुना श्राद्धप्रकरणमारभ्यते । तत्रादौ श्राद्धमहिमा ।

अत्र सुमन्तुः—

(श्राद्धात्परतरं नान्यच्छ्रेय)स्करमुदाहृतम् ।
तस्मात्सर्वप्रयत्नेन श्राद्धं कुर्याद्विचक्षणः ॥

देवलोऽपि—

अरोगः प्रकृतिस्थश्च (चिरायुः पुत्रपौत्रवान्) ।
(अर्थवानर्थभो)गी च श्राद्धकामो भवेदिह ॥
परत्र च परां तुष्टिं लोकांश्च विविधान् शुभान् ।
श्राद्धकृत्समवाप्नो(ति यशश्च विपुलं नरः) ॥

(याज्ञवल्क्योऽपि)—

(आयु:) प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः ॥

**End:**

श्राद्धं तत्र तु कर्तव्यमर्घ्यावाहनवर्जितम् ।
श्वध्वाङ्क्षगृध्रकङ्काद्या घ्नन्ति दृष्ट्वा न ते क्रियाः ॥ इति ॥

इ(ऐ)ङ्गुदेन इङ्गुदफलनिष्पन्नेन पिण्याकेन । श्वध्वाङ्क्षादयः श्राद्धकर्त्रादिभिर्दृष्टा अपि तीर्थक्रियमाणश्राद्धे क्रिया न नी ती(निघ्नन्ती)त्यर्थः ॥

इति स्मृतिचन्द्रिकायां तीर्थश्राद्धविषयाणि ॥

श्राद्धकाण्डस्य रचना वचनैर्मुनिभिः कृतैः ।
कृता गदाधरप्रीत्यै श्रीमत्त्याज्यकवेप(याज्ञिकदेव)णः ॥

**Colophon:**

इति सकलविद्याविशारदश्रीकेशवादित्यभल्लो(ट्टो)पाध्यायसूनुयाज्ञ(ज्ञि)कदेवणभल्लो(ट्टो)पाध्यायविरचितायां स्मृतिचन्द्रिकायां श्राद्धकाण्डं समाप्तम् ॥

---

## No. 2778. स्मृतिचन्द्रिका.

## SMṚTICANDRIKĀ.

Substance, palm-leaf (Śrītāla). Size, 16½ × 2¼ inches. Pages, 316. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

Śrāddhakāṇḍa incomplete.

By Dēvaṇabhaṭṭa.

Same work as the above.

## No. 2779. स्मृतिचन्द्रिका.

## SMṚTICANDRIKĀ.

Substance, paper. Size, 11¾ × 9¾ inches. Pages, 435. Lines, 25 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

4 leaves at the end contain an index.

Vyavahārakāṇḍa complete.

A work in Dharma dated 1735 Śaka, by Dēvanabhaṭṭa, son of Kēśavādityabhatta. The book is said to have belonged to Mṛtyuñjayadēvaśarma and to have been written by Rājīvalōcanadēvaśarma.

**Beginning:**

इदानीं व्यवहारकाण्ड आरभ्यते । तत्रादौ व्यवहारस्वरूपं निरूप्यते । तत्र बृहस्पतिः—

"धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः ।
लोभद्वेषाभिभूतानां व्यवहारः प्रकीर्तितः ॥" इति ॥

अस्यार्थः नारदेन विवृतः—

"धर्मैकतानाः पुरुषा यदासन् सत्यवादिनः ।
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ॥
नष्टे धर्मे मनुष्याणां व्यवहारः प्रकीर्तितः ।"

मनुष्याणामृणादानादिविषयको विवादो व्यवहारः प्रकीर्तित इत्यर्थः ॥

**End:**

कात्यायनोऽपि—

"राजक्रियासु ये भक्त्या(म्रा) राजवृत्त्युपजीविनः ।
अप्रियस्य च यो वक्ता वधं तेषां प्रवर्तयेत् ॥"

पुरप्रसारणप्रकृतिसम्भेदादौ राज्ञा यत्कर्तव्यं तदस्माभिः प्रागेव प्रसङ्गादेवास्मिन् काण्डे सदाचारकाण्डे चाभिहितमित्युपरम्यते । तेन प्रकीर्णकाख्यपदप्रतिपाद्यं किञ्चिदेवेह प्रतिपादितम् । अवशिष्टमिह तत्र तत्र प्रसङ्गादुक्तमनुसन्धेयम् ॥

**Colophon:**

इति स्मृतिचन्द्रिकायां प्रकीर्णकाख्यस्य पदस्य विधिवितानः ॥

समाप्तश्च व्यवहारकाण्डः ॥

श्रीकेशवादित्यसमुद्भवस्य देवस्य शान्ताद्विजराजमूर्तेः ।

सच्चन्द्रिकां प्राप्य सुखेन लोकाः कुर्वन्तु सर्वे व्यवहारशुद्धिम् ॥

समाप्तश्चायं ग्रन्थः ॥

---

## No. 2780. स्मृतिचन्द्रिका.

## SMṚTICANDRIKĀ.

Substance, paper. Size, 13 × 8⅓ inches. Pages, 38. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Dhanaprayōgavidhi complete; Ādhiviṣaya incomplete.

The first volume.

Vyavahārakāṇḍa.

Same work as the above.

---

## No. 2781. स्मृतिचन्द्रिका.

## SMṚTICANDRIKĀ.

Substance, paper. Size, 13 × 8⅓ inches. Pages, 298. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

From Ādhiviṣaya breaks off in Strīdharma.

The second volume; continues the matter of the first.

---

## No. 2782. स्मृतिचन्द्रिका.

## SMṚTICANDRIKĀ.

Substance, paper. Size, 13⅛ × 8¼ inches. Pages, 325. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Vyavahārakāṇḍa. Breaks off in Adhamarṇapratidātṛprakaraṇa (discharge of debt by the borrower).

Wants the first leaf.

Incomplete.

## No. 2783. स्मृतिचन्द्रिका.

### SMṚTICANDRIKĀ.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 182. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Vyavahāakāṇḍa. Breaks off in Ṛṇādānaprakaraṇa.

---

## No. 2784. स्मृतिचूडामणिसङ्ग्रहः.

### SMṚTICŪḌĀMAṆISAṄGRAHAḤ.

Pages, 90. Lines, 20 on a page.

Begins on fol. 59*a* of the MSS. described under No. 1198.

This is a compendium of Vātsya Varadācārya's work, Smṛticūḍāmaṇi.

**Beginning:**

श्री वैष्णवाग्रेसरवात्स्यवरदाचार्यप्रणीतस्मृतिचूडामण्यामुक्तविशेषवचनसङ्ग्रह :—

मया कृत(ते) मूत्रपुरीषशौचे स्नानं च गण्डूषणमेहनं च ।
वस्त्रादिसङ्क्षालितदुष्कृतं च क्षमस्व गङ्गे मम सुप्रसन्ने ॥
त्रिरात्रं फलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगास्तु पक्षस्य मासस्य सरिताम्पतिः ॥
स्मृ(श्रु)ताभिलषिता दृष्टा स्मृता पीतावगाहिता ।
गङ्गा तारयते नृणामुभौ वंशौ भवार्णवात् ॥

**End:**

ततश्च अयमर्थः । मातृपितृबान्धवादिमरण इति । नग्नादिसपिण्ड्यन्तं संवत्सरोदकुम्भं वृद्धिश्राद्धं मन्वादियुगादिकाम्यश्राद्धान्यपि ग्रह-

णप्रयुक्तभोजननिषेधकालेऽपि अवश्यमनुष्ठेयानि सपिण्डीकरणानन्तरकर्तव्यानि अनुमासिकानि तु प्रत्याब्दिकवत् भोजननिषिद्धकालेऽकर्तव्यानि। सर्वं समञ्जसम् ॥

इति ग्रहणनिर्णयः ॥

**Colophon:**

स्मृतिचूडामणिसङ्ग्रहः सम्पूर्णः ॥

---

No. **2785.** स्मृतिनवनीतम्.

SMṚTINAVANĪTAM.

Substance, palm-leaf. Size, 11 × 1⅛ inches. Pages, 16. Lines, 7 on a page. Character, Nandināgarī. Condition, good Appearance, old.

Begins on fol. 47*a*. The other works herein are—Smṛtisaṅgraha 1*a*, Navagrahamaṅgalāṣṭaka 34*a*, Madhvācāryaguruparaṁparā 37*a*, Śrāddhaviṣayavacanāni 43*a*, Saurādimānavacanāni 53*a*.

**Beginning:**

(अला)भे दन्तकाष्ठानां निषिद्धादिवसेऽपि च ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्भविष्यति ॥

अथ स्नानविधि(ः)—

सततं प्रातरुत्थाय गृहीत्वा मृत्तिकान्(कां) कुशान् ।
पुष्पाण्यपि यथालाभं जलकूलं द्विजो व्रजेत् ॥

ब्र(ा)ह्म(ा)णं स्नातुमायान्तं देवा ऋषिगणास्तथा ।
पितरस्तत्र गच्छन्ति वायुभूता जलार्थिनः ॥

**End:**

वर्णानामाश्रमाणां च या मर्यादा कृता मया ।
तां ये समनुवर्तन्ते प्रसादस्तेषु मे भवेत् ॥

* * * *

मन्वादिस्मृतिदुग्धाब्धेरसारांशं नवनीतवत् ।
सङ्गृहीते (तं) सतां प्रीत्यै तेन कृष्णः प्रसीदतु ॥

श्रीरामचन्द्रगुरुवर्यकटाक्षितस्सन्
श्रीश्रीनिवासगुरुवर्यकृतात्मबोधः ।
स्मृत्यर्थसारनवनीतमिदं लिलेख
श्रीनारसिंहतनयो वृषभाद्रिनाथः ॥

नवनीतमिदंग्रन्थं मूलास्मरणहेतुकम् ।
नावमान्यं (स) तां मूलं पश्यन्तु च बहुश्रुत(ा): ॥
सुखेन धारणायैव बालानामल्पचेतसाम् ।
सन्तो व्यवस्थां पश्यन्तु श्लोकमात्रं तु लिख्यते ॥

**Colophon:**

इति स्मृतिनवनीते आह्निकनिर्णयो नाम प्रथमः खण्डः ॥

---

No. **2786.** स्मृतिभास्करः.

SMṚTIBHĀSKARAḤ.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 98 Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains Yatidharmaviṣaya.

Begins on fol. 56*a*. The other works herein are,—Yatiliṅgasamarthanam 1*a*, Yatidharmasamuccaya 7*a*, Yatidharma 50*b*, Yatidharmasamuccaya 105*a* (11th Parva), Sannyāsividhi 110*a*, Yatinityakarmavidhi 113*b*, Nārāyaṇabali 116*a*, Yativiṣayavacanāni 117*a*.

**Beginning:**

विश्वेश्वरस्मृतिः—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

* * * *

आनन्दाश्रमपादपद्मयुगळं त्वाराधयाम्यन्वहं
नत्वानन्दपदारविन्दमनिशं सम्भावयाम्या(म्यन्व)हम् ।
सेवे सेवकचिन्तितार्थफलदं श्रीपद्मनाभाश्रमं
भावे सन्ततमच्युताश्रमगुरुं ब्रह्मस्वरूपं परम् ॥

शिष्यः—

शान्तो दान्तः कुलीनश्च विनीतस्सत्यवाक् शुचिः ।
शुद्धाचारस्सुप्रसिद्धश्शुचिर्दक्षस्सुबुद्धिमान् ॥

आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविचक्षणः ।
निग्रहानुग्रहे शक्तो गुरु(ः)शिष्यो(ष्ये) विधीयते ॥

अथाङ्गिरसोक्तातुरसन्न्यासविधिरुच्यते—

आसन्ने सङ्कटे घोरे चोरव्याघ्राग्निगोचरे ।
भयं प्राप्तैस्तु सन्न्यासः कर्तव्यो मनुरब्रवीत् ॥

आतुराणां विशेषोऽस्ति न विधिर्नैव च क्रिया ।
प्रेषमात्रं समुच्चार्य सन्न्यासं तत्र पूरयेत् ॥

**End:**

"बहिर्दण्डं प्रतिष्ठाप्य गृह्णानष्षोडशैव तत् ।
भिक्षमाणेन कर्तव्याः प्राणायामास्त्रयस्तथा ॥" इति ॥

बहिर्दण्डं निक्षिप्य माधूकरं गृह्णानः षोडश प्राणायामान् कुर्यात् । भोजने त्रयं कुर्यात् ॥

**Colophon:**

इति स्मृतिभास्करे यत्यधिकारयत्याचारयतिविधानयतिप्रायश्चित्तादिकं समाप्तम् ॥

## No. 2787. स्मृतिभास्करः.

## SMṚTIBHĀSKARAḤ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 117. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Deals with Śūdradharma.

Begins on fol. 136*a*. The other works herein are—Yatipatnīdharmanirṇaya 1*a*, Dattaputramīmāṁsā 4*a*, Dattaputravidhi 23*a*, Abhinavaṣaḍaśītivyākhyā 47*a*.

**Beginning:**

हरिं शिवं विधातारं तत्पत्नीस्तत्सुतान्गुरून् ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गळाय च ॥

हरिवंशे—

"पुरा किल युगस्यान्ते ब्रह्मलोकं गतो मुनिः ।
ददर्श लोकनाथेशं ध्यायन्तं वै जनार्दनम् ॥
पितामहं महाप्राज्ञं सर्वलोकहिते रतम् ।
स्तूयमानमृषिगणैर्ध्यायमानं सुरोत्तमैः ॥

* * * *

प्रणिपत्य महाभक्त्या नारदस्तं पितामहम् ।
विनयेनोपसङ्गम्य पप्रच्छ मुनिसत्तमः ॥
भगवंस्तव दासोऽस्मि भृत्योऽस्मि हरिवत्सल ।
ब्रूहि शूद्रस्य वै धर्मं सर्वज्ञोऽसि पितामह ॥
येनाहं त्वत्प्रसादेन परं यामि हरेः पदम् ।

ब्रह्मा—

शृणु पुत्र प्रवक्ष्यामि शूद्रधर्ममशेषतः ॥
निषेकादिश्मशानान्तं येन मुच्येत किल्बिषात् ।

शूद्रस्समाचरेद्धर्मं वेदशास्त्रफलप्रदम् ॥
कोटियज्ञस्य फलदं विष्णुलोकप्रदायकम् ।
यच्छ्रु(च्छ्रु)त्वा मुच्यते सद्यो नरः पापयुतोऽपि सः ॥
ब्राह्मे मुहूर्त उत्थाय चिन्तयेदात्मनो हितम् ।

**End:**

गोपनीयमिदं शास्त्रं पूजनीयं चतुर्थजैः ।
न दातव्यं परेभ्यश्च पाषण्डेभ्यः कदाचन ॥
धर्मशास्त्रमिदं श्रुत्वा नारदः पुनरन्वगात् ।
ब्रह्मा ऋषिगणैस्सार्धं तत्रैवान्तरधीयत ॥
नारदीयमिदं शास्त्रं विद्वल्लक्षणपूजितम् ।
आचरेत्सततं शूद्रो विष्णुप्रीतिकरं हि यत् ॥

**Colophon:**

इति सर्वस्मृतिसङ्ग्रहे स्मृतिभास्करे शूद्रधर्मसन्देहनिवृत्तिर्नाम प्रायश्चित्तप्रकरणं समाप्तः(म्) ॥

---

### No. 2788. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 21⅝ × 1⅜ inches. Pages, 42. Lines, 8 on a page. Character, grantha. Condition, good. Appearance, new.

Deals with Varṇāśramadharma. Breaks off in the portion on Dānanirūpaṇa.

Begins on fol. 4*a*. The other work herein is, Nārāyaṇabalividhāna. 1*a* (Tamil).

**Beginning:**

श्रीरामचन्द्रचरणद्वयपद्मकोशा-
दायातु मे चपलमानसचञ्चरीकः ।

मुक्तेर्वशीकरणचूर्णमहो मदीय-
गात्रेषु बिभ्रति रजोऽपि रजोविहीनः ॥

भवकोदण्डदलनं भवबन्धविमोचनम् ।
दशकण्ठरिपुं वन्दे दशस्यन्दननन्दनम् ॥

वैद्यनाथाध्वरी राम . . . . . वंशजः ।
स्मृतिमुक्ताफलं नाम कुरुते सारसङ्ग्रहम् ॥

उरुविस्तरधर्मशास्त्रवार्धेः
उपलब्धं महता परिश्रमेण ।

श्रवणेषु निधीयतां महद्भिः
स्मृतिमुक्ताफलमेकमेव सद्भिः ॥

क न(नु) विशकलितं तु धर्मशास्त्रं
क च पुनराकलने मम प्रसक्तिः ।

सरलमतिजुषस्तथापि सन्तः
सततमिदं मम साहसं सहन्ताम् ॥

तत्रादौ धर्मप्रमाणानि निरूप्यन्ते ।

मनुः—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

वेदः जातावेकवचनम् । धर्ममूलं धर्मस्य प्रमाणम्; न केवलं विध्यात्मकमेव धर्मप्रमाणम्; किन्तु मन्त्रार्थवादात्मकोऽपीत्युक्तम्—अखिल इति.

## No. 2789. स्मृतिमुक्ताफलम्.

## SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 265. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Varṇāśramakāṇḍa complete.

By Vaidyanāthadīkṣita.

Wants Beginning.

**End:**

व्यासः—

" मोक्षाश्रमं यश्चरते यथोक्तं
शुचिस्सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनज्योतिरिव प्रशान्तं
स ब्रह्मभावं श्रयते द्विजातिः ॥" इति ॥

**Colophon:**

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले वर्णाश्रमधर्मनिरूपणं नाम प्रथमपरिच्छेदस्समाप्तः ॥

---

## No. 2790. स्मृतिमुक्ताफलम्.

## SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 13⅞ × 1¼ inches. Pages, 30. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Varṇāśramakāṇḍa, Putrasvīkāraprakaraṇam and Vivāhayōgyāyōgyastrīnirṇayaprakaraṇam.

Begins on fol. 13*a*. The other works herein are, Putrasvīkāravidhi 1*a*, Naṣṭajātakam 28*a*, Dattamīmāṁsā 30*a*.

## No. 2791. स्मृतिमुक्ताफलम्.

## SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 461. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Āhnikakāṇḍa complete.

By Vaidyanāthadīkṣita.

**Beginning:**

अथेदानीमाह्निकं प्रस्तूयते ।

तत्र मनुः—

"ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयन् ।
क(ायक्ले)शांश्च सकलान्वेदतत्त्वार्थमेव च ॥"

वेदतत्त्वार्थः परमात्मा ॥

तथा च व्यासः—

"ब्राह्मे मुहूर्ते उत्थाय धर्म(मर्थं) च चिंन्तये(त्) ।
कायक्लेशं तदुद्भूतं ध्यायी(ये)त मनसीश्वरम् ॥"

* * * *

ब्राह्मे मुहूर्ते यथाशक्ति[प्रहरे] प्रबुद्ध आत्मनो हितं करिष्यमाणं च वेदार्थरूपं चिन्तयेत् । ततो धर्मार्थकामान् स्वोचिते काले यथासम्भवं सेवेतेत्यर्थः ॥

**End:**

व्यासः—

"इत्येतदखिलेनोक्तमहन्यहनि वै मया ।
ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥
नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः ।
स याति नरकान् घोरान् काकयोनिषु जायते ॥
नान्यो विमुक्तये पन्था मुक्त्वाश्रमविधिं स्वकम् ।
तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिनः ॥" इति ॥

**Colophon :**

इति श्रीवैद्यनाथदीक्षितविरंचिते स्मृतिमुक्ताफले आह्निककर्मनिरूपणं नाम द्वितीयः परिच्छेदः ॥

---

## No. 2792. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 401. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Āhnikakāṇḍa complete; 6 leaves in the beginning are wanting and 3 leaves are much injured.

Copying is said to have been begun after sunrise on the 12th day of the dark fortnight in the month of Citra and finished in 109 days.

चैत्रे मास्यसिते पक्षे द्वादश्यामुदयात्परम् ।
आरभ्य वासरेष्वेव नवाधिकशतेष्वयम् ॥

---

## No. 2793. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 161. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Āśaucakāṇḍa, the 3rd chapter, complete.

Begins on fol. 1*a*. The other work herein is, Putrasvīkāravidhiḥ 82*a*.

There is an index of 8 pages at the beginning.

By Vaidyanāthadīkṣita.

Copying the Prāyaścittakāṇḍa of Hēmādri and the Śrāddhakāṇḍa and Āśaucakāṇḍa of Vaidyanāthīyam is herein said to have been

begun by Perungattūr Tirumalai Vellaiyangār Vēdānta Rāmānujatātadāsa on the 4th Ādi in the year Dundubhi and finished by the 4th Mārgali of the same year.

**Beginning:**

अथाशौचप्रकरणम् ।

शङ्खः—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तयेत् ॥ इति ॥

आशौचशब्दार्थः स्मृतिचन्द्रिकायामभिहितः—

सपिण्डादिजनने मरणे वा सति यदप्रायत्यं दानादिकर्मस्वयोग्यतापादकं पापविशेषात्मकं वा तदाशौचशब्देन बोध्यत इति ।

**End:**

सङ्ग्रहे च—

आशौचान्ते कृतस्नानः स्वस्तिवाचनपूर्वकम् ।
ब्राह्मणान् भोजयेत्तत्र शुद्ध्ये विष्णुतुष्टये ॥ इति ॥

**Colophon:**

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले आशौचनिरूपणं नाम तृतीयः परिच्छेदः ॥

---

## No. 2794. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 483. Lines, 7 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Śrāddhakāṇḍa complete. It is the fourth Kāṇḍa.

**Beginning:**

श्रितरामपदाब्जेन वैद्यनाथविपश्चिता ।
स्मृतीनां सारमालोच्य श्राद्धकाण्डं वितन्यते ॥

स्नात्वा कर्माणि कुर्वीतेति स्मरणात् स्नातस्यैव प्रायश्चित्तादिकर्मण्यधिकारात् वारुणस्नाने अशक्तो मुमूर्षुर्ब्राह्मादिस्नानमाचरेत् ।

तदाह योगयाज्ञवल्क्यः—

असामर्थ्याच्छरीरस्य वैषम्याद्देशकालयोः ।
स्नानान्येतानि तुल्यानि मन्त्रादीनि यथाबलम् ॥ इति ॥

स एव—

मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च ।
मानसं यौगिकञ्चेति सप्त स्नानान्यनुक्रमात् ॥

**End:**

रति(ः)शक्तिः स्त्रियः कान्ता भोज्यं भोजनशक्तिता ।
दानशक्तिस्सविभवा रूपमारोग्यमेव च ॥
श्राद्धपुष्पमिदं प्रोक्तं फलं ब्रह्मसमागतम्(मः) । इति ॥

नामानि देवदत्तयज्ञदत्तादीनि, मन्त्रिताः पृथिवी ते पात्रमित्यादयः, आदेशाः इदमन्नादिकममुष्मै भवत्वित्येवमादिनिर्देशाः, पुष्पमवान्तरं फलम्; ब्रह्मसमागमो ब्रह्मप्राप्तिः परमफलं प्रोक्तमित्यर्थः ।

हारीतः—

कालेऽन्यथागतं पात्रे विधिना प्रतिपादितम् ॥
प्राप्नोत्यन्नं तथा दत्तं जन्तुर्यत्र प्रतिष्ठते ।
यन्नाम्ना पातयेत्पिण्डं तं नयेद्ब्रह्म शाश्वतमिति ॥

**Colophon :**

इति श्रीवैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले श्राद्धनिरूपणं नाम चतुर्थः परिच्छेदः ॥

---

## No. 2795. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 12¾ × 1¼ inches. Pages, 630. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Śrāddhakāṇḍa to the end of Śrāddhapraśaṁsā. Wants one leaf.

At the beginning there is an index of 13 pages.

By Vaidyanāthadīkṣita.

---

## No. 2796. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 356. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

14 leaves in the beginning and fols. 90 to 129 are lost.

Contains the Śrāddhakāṇḍa only.

---

## No. 2797. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 276. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Śrāddhakāṇḍa incomplete.

## No. 2798. स्मृतिमुक्ताफलम्.
## SMṚTIMUKTĀPHALAM.

Pages, 154. Lines, 9 on a page.

Begins on fol. 1*a* of the MSS. described under No. 2740.
There is a valuable index of 16 pages at the end.
Prāyaścittakāṇḍa complete.
By Vaidyanāthadīkṣita.

**Beginning :**

श्रीरामचरणाम्भोजलीनमानसषट्पदः ।
वैद्यनाथाध्वरी प्रायश्चित्तं सङ्गृह्य भाषते ॥

अथ प्रायश्चित्तमारभ्यते—

प्रायो नाम तपः; चित्तं निश्चयः; अनुष्ठितेन द्वादशवार्षिकादिनावश्यं पापो निवर्ति(ष्य)त इति विश्वासयुक्तव्रतानुष्ठानलक्षणं तपः प्रायश्चित्तम् ।

तदाहाङ्गिराः—

प्रायो नाम तपः; प्रोक्तं चित्तं निश्चय; उच्यते ।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिहोच्यते ॥ इति ॥

**End :**

तदपि चतुर्विंशतिमते दर्शितम्—

जन्मप्रभृति पापानि बहूनि विविधानि च ।
अर्वाक्तु भ्रूणहत्यायाः षडब्दं कृच्छ्रमाचरेत् ॥
प्रत्याम्नाये गवां देयं साशीति धनिनां शतम् ।
तथाष्टादशलक्षाणि गायत्र्या वा जपेद्बुधः ॥ इति ॥

**Colophon :**

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले प्रायश्चित्तनिरूपणं नाम षष्ठः परिच्छेदः ॥

## No. 2799. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 28. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new.

It contains only the sixth Paricchēda known as Dravyaśuddhiḥ.

Begins on fol. 1*a*. The other works herein are, Dharmaśāstravacanāni 15*a*, Nāḍīśāstra 22*a*, Cintāmaṇi 25*b*

---

## No. 2800. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Pages, 16. Lines, 9 on a page.

Begins on fol. 92*a* of the MS. described under No. 2740.

Contains only the portion dealing with Dravyaśuddhiḥ.

---

## No. 2801. स्मृतिमुक्ताफलम्.

### SMṚTIMUKTĀPHALAM.

Pages, 12. Lines, 8 on a page.

Contains the 5th Paricchēda called Iṣṭi Kālanirṇaya.

By Vaidyanāthadīkṣita.

Begins on fol. 1*a* of the MSS. described under No. 857.

---

## No. 2802. स्मृतिरत्नमहोदधिः.

### SMṚTIRATNAMAHŌDADHIḤ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 200. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

A work on Dharmaśāstra by Paramānandaghana pupil of Cidānandabrahmēndrasarasvatī.

Ṣaṭkarmavicāra complete.

Copying is said to have been finished on Friday the 9th of Mārgaśira-śuddha in the year Śukla.

**Beginning :**

आह्निकमुच्यते । तत्र याज्ञवल्क्यः—

ब्राह्मे मुहूर्त उत्थाय चिन्तयेदात्मनो हितम् ।
धर्मार्थकामान् स्वे काले यथाशक्ति न हापयेत् ॥ इति ॥

माधवीये मनुः—

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थमनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥ इति ॥

**End :**

कूर्मपुराणे—

इत्थं तदखिलं प्रोक्तमहन्यहनि वै मया ।
ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥ इति ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिदानन्दब्रह्मेन्द्रसरस्वतीपूज्यपादशिष्यश्रीपरमानन्दघनविरचिते धर्मशास्त्रसङ्ग्रहे स्मृतिरत्नमहोदधौ षट्कर्मविचारस्समाप्तः ॥

---

## No. 2803. स्मृतिरत्नमहोदधिः.
## SMṚTIRATNAMAHŌDADHIḤ.

Substance, palm-leaf. Size, 15⅜ × 1½ inches. Pages, 233. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Ṣaṭkarmavicāra complete.

The same work as the above.

---

## No. 2804. स्मृतिरत्नमहोदधिः.
## SMṚTIRATNAMAHŌDADHIḤ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 124. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Āśaucakāṇḍa complete.

Same work as the above.

**Beginning :**

पराशरः—

आ चतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिस्स्याद्दशाहं सूतकं भवेत् ॥ इति ॥

गर्भाधानप्रभृति चतुर्मासाभ्यन्तरे गर्भनाशः—स्रावः ; पञ्चमषष्ठयोर्गर्भनाशः—पातः ; सप्तममासप्रभृति गर्भनिर्गमः—प्रसवः । सप्तममासप्रभृति मातुः पित्रादीनां च प्रसवनिमित्तमाशौचं दशाहं भवेदित्यर्थः । गर्भाधानप्रभृति मासत्रये चतुर्थमासे वा स्रावे प्राप्ते मातुराशौचमाह षडशीत्याम्.

**End :**

(आ)शौचान्ते कृतस्नान(ः) स्वस्तिवाचनपूर्वकम् ।
ब्राह्मणान्भोजयेत्तत्र शुद्धये विष्णुतुष्टये ॥

**Colophon :**

(इति श्रीमत्परम)हंसपरिव्राजकाचार्यश्रीमच्चिदानन्दब्रह्मेन्द्रसरस्वतीपूज्यपादशिष्यपरमानन्दघनविरचिते (स्मृतिरत्नम)होदधावाशौचप्रकरणं समाप्तम् ॥

---

## No. 2805. स्मृतिरत्नाकरः.

## SMṚTIRATNĀKARAḤ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 513. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

A work on Dharmaśāstra : also called Sadācārasaṅgraha : by Vēṅkaṭavarada *alias* Sarasvatīvallabha.

With a running Tamil commentary.

Complete.

**Beginning :**

वर्णाश्रमाणां धर्माणां व्यवस्थात्रे युगे युगे ।
लीलयैव गृहीतेच्छावपुषे विष्णवे नमः ॥
यत्प्री(द्भृ)त्या ब्रह्मरुद्राद्या यदीयाज्ञा श्रुतिस्स्मृति ।
यः प्रभुर्जगतां तस्मै परस्मै हरये नमः ॥
सर्वान्तर्यामिणे सर्वकर्माराध्याय विष्ण ।
सर्वोत्तराय सर्वात्मशरण्याय नमो नमः ॥
यतो वचनरत्नानामाकरोऽयं तदुज्ज्वलः ।
स्मृतिरत्नाकरो नाम वक्ष्यते स्मृतिसङ्ग्रहः ॥
नकिञ्चिल्लिख्यते युक्त्या किन्तु स्मृतिवचांसि हि ।
अतोऽयं निर्भयैर्ग्राह्यः कृत्याकृत्यबुभुत्सुभिः ॥

सन्तो विदुस्सारममत्सरास्ते सार्थो हि यत्नो मम सन्मुदे सः ।
वेद्यांशपूर्णं सकलस्मृतीनां सारं बुधारसङ्ग्रहमाद्रियध्वम् ॥

अयं भावः—मनुयाज्ञवल्क्यपराशरव्यासदक्षसंवर्तगौतमापस्तम्बकात्यायनबोधायनशातातपशाण्डिल्यहारीतात्रेयवासिष्ठाश्वमेधिकादिस्मृतिभ्यो विज्ञानेश्वरस्मृत्यर्थसारस्मृतिचन्द्रिकास्मृतिमाधवीयाखण्डादर्शस्मृतिसारसमुच्चयेतिहाससमुच्चयादिभ्यः स्मृतिसङ्ग्रहेभ्यश्च वचनरत्नानि सङ्गृह्यास्य कृतत्वेनात्रोक्तस्य सर्वस्य स्मृतिमूलत्वात्सारांशकत्वाच्च निर्विशङ्कमयं स्मृतिरत्नाकरो नाम स्मृतिसङ्ग्रहो मात्सर्यमुत्सार्य सदादरणीय इति । अत्र चोदनालक्षणो धर्म इत्यादिना चोदनैकप्रमाणको धर्म इत्युक्तम् । तस्य सामान्यलक्षणमाह मनुः—

विद्वद्भिस्सेवितस्सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥

अनेन ग्रन्थेन "ये तत्र ब्राह्मणास्सम्मर्शिनः" इत्यादिश्रुत्यर्थ एवोक्तः ॥

**End :**

मनुः—

वेदोदितं स्वकं कर्म नित्यं कुर्यादतीन्द्रिय(तन्द्रित)ः ।
तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् ॥

**Colophon :**

हरितकुलतिलकस्य सरस्वतीवल्लभापरनामधेयस्य श्रीवेङ्कटनाथस्य वैदिकसार्वभौमस्य कृतिषु स्मृतिरत्नाकरो नाम सदाचारसङ्ग्रहस्समाप्तः ॥

कृत्याकृत्यविवेकदं स्मृतिशतज्ञेयार्थगर्भं सता-
माचारक्रमबोधकं भ्रमतमोविध्वंसहंसोदयम् ।
त्रैवर्गोन्म(त्म)हितप्रकाशकमिमं युष्मन्मुदे तत्कृतं
सन्तो निर्मदमत्सराः कलयत स्मृत्यादिरत्नाकरम् ॥

---

## No. 2806. स्मृतिरत्नाकरः.
## SMṚTIRATNĀKARAḤ.

Pages, 116. Lines, 7 on a page.

Begins on fol. 1*a* of the MSS. described under No 2637.
By Bhaṭṭōjidīkṣita.
Incomplete .

**Beginning :**

भट्टोजिदीक्षितकृते (स्मृतिरत्नाकरे पुनः) ।
आशौचनिर्णयः प्रायश्चित्तिश्च जयतः स्फुटम् ॥

पराशरः—

आ चतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्यात् इति ।

तत्र स्रा(स्रा)वे आद्यमासत्रये त्रिरात्रं मातुराशौचम् । उपर्याषष्ठमासं माससमसङ्ख्यादिनमाशौचम् । चतुर्थे चत्वारि । पञ्चमे पञ्च । षष्ठे

षडित्यर्थः । सपिण्डानान्तु स्नानेनैव शुद्धिः स्रावे । पाते तु त्रिरात्रम् । सप्तममासप्रभृति तु स्वस्वजात्युक्तदशाहादि ।

माधवस्तु—

सूतिकाव्यतिरिक्तानां सप्तमे सप्तरात्रमष्टमे अष्टरात्रं नवमप्रभृति तु दशरात्रमित्याह । जन्माशौचमध्ये शिशुमरणे मृताशौचं नास्त्येव ।

* * * *

इति भ(ट्टोजि)दीक्षितकृते स्मृति(रत्नाकरे) आशौचनिर्णयस्समाप्तः ॥

**End:**

विना शवानुगतिभिस्तथा तद्वाहकैर्विना ।
सखण्डं जातकं शस्तं कावेर्या(:)पश्चिमे तटे ॥
दिनाशौचमहर्मात्राशौचं वै नर्मदोत्तरे ।
स्वगृहे त्रिदिनाशौचं संमतं सर्वयोगिनाम् ॥
ये वेदवेदाङ्गविदो ब्रह्मनिष्ठास्स्तपस्विनः ।
नाशौचिनो भविष्यन्ति जातके मृतकेऽपि वा ॥
एवमाचारकाण्ठ(ण्डस्य) रत्नान्यत्युज्ज्वलानि च ।
सङ्गृह्य विभु(बु)धा(र)सर्वे धार्यन्तां हृदि सर्वदा ॥
मानवादिनिबन्धेषु स्थितान्येव मयाधुना ।
विदुषां कण्ठभूषार्थं रत्नानि ग्रथितान्यलः(म्) ॥

**Colophon:**

इति स्मृतिरत्नाकरे आचारकाण्डस्समाप्तः ॥

---

No. **2807.** स्मृतिरत्नाकरः.

SMṚTIRATNĀKARAḤ.

Pages, 416. Lines, 8 on a page.

Begins on fol. 1*a* of the MSS. described under No. 2760.

To the end of Ardhōdayanirūpaṇa.

Incomplete.

By Vēṅkaṭanātha.

Same work as the above.

---

## No. 2808. स्मृतिसङ्ग्रहः.

## SMṚTISAṄGRAHAḤ.

Pages, 94. Lines, 7 on a page.

A manual of daily rites and other religious ceremonies.

Begins on fol. 50*a* of the MSS. described under No. 2696.

Incomplete.

**Beginning :**

श्रीरामं शिरसा नत्वा कृत्वा स्मर्त्रभिवादनम् ।
तेषां वचांस्युपादाय क्रियते स्मृतिसङ्ग्रहः ॥

अधीत्य चतुरो वेदान् सषडङ्गपदक्रमान् ।
स्मृतिहीना न शोभन्ते चन्द्रहीनेव शर्वरी ॥

तत्र स्मृतयो मन्वादिप्रणीता(:)। मन्वादयस्तु पैठि(ठी)नसिनोक्ताः—

मनुस्तथाङ्गिरोव्यासगौतमात्र्युशनोयमाः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ॥

विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो गुरुः ।
प्रचेता नारदो योगी बोधायनपितामहौ ॥

सुमन्तुः काश्यपो बभ्रुः पैठिं(ठी)नो व्याघ्र एव च ।
सत्यव्रतो भरद्वाजो गार्ग्य(:)कार्ष्णाजनिस्तथा ॥

जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसम्भवः ।
इति धर्मप्रणेतारष्षट्त्रिंशदृषयः स्मृताः ॥ इति ॥

तत्र प्रथमं तावदाह्निकं सङ्क्षेपेण वक्ष्यते ।

तत्र मनुः—

ब्राह्मे मुहूर्ते बुद्ध्येत धर्मार्थावनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥ इति ॥

वेदतत्त्वार्थः परमात्मा ।

याज्ञवल्क्योऽपि—

ब्राह्मे मुहूर्त उत्थाय चिन्तयेदात्मनो हितम् ।
धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत् ॥ इति ॥

एवमात्महितमनुचिन्त्य श्रोत्रियादिकमवलोकयेत् ॥

**End :**

निर्देशे निर्गतदशाहे । इदं ज्येष्ठपुत्रविषयम् । सपिण्डीकरणान्तकृत्ये कनिष्ठकृते तु माधवीये—

विशे . . . . . . श्वो . . पितृविपर्ययम् ।
कृत्वा तु वपनं दत्वा दशाहान्ततिलोदकम् ॥
सपिण्डीकरणश्राद्धं कुर्यादेकादशेऽहनि । इति ॥
दशाहान्तरनेकदाने . . . . . . . . . ॥

---

No. **2809.** स्मृतिसङ्ग्रहः.

SMṚTISAṄGRAHAḤ.

Pages, 84. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2785.

## No. 2810. स्मृतिसारसङ्ग्रहः.

## SMṚTISĀRASAṄGRAHAḤ.

Pages, 74. Lines, 22 on a page.

Begins on fol. 20*a* of the MSS. described under No. 1204.

By Puruṣōttamānanda, pupil of Pūrvānanda.

Complete.

**Beginning :**

सत्त्वैषण(।)विनिर्मुक्तः स भैक्षं भोक्तुमर्हति ।

प्रवृत्तिलक्षणो धर्मो ज्ञानं सन्न्यासलक्षणम् ।
यं कृत्वा . . . . . पुनर्नैव करोति यः ॥

सकृत्कृच्छ्रमतात                    त्यनन्तरम् ।
तस्मात्सत्त्व . . . येण कर्तव्यं . . . धारणम् ॥

इतरस्तु न शक्नोति विषयैरपहार्यते ।
यावद्वर्णं . . . . . यावद्वेदः प्रवर्तते ॥

*    *    *    *

दशलक्षणकं धर्ममनुतिष्ठन्त्समाहितः ।
वेदार्थान् विधिवच्छ्रुत्वा सन्न्यसेदस्पृहो द्विजः ॥

यदा—"यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति श्रुतेश्च । तस्मात् क्रमेण वा सन्न्यसेत् । आतुरसन्न्यासविधीनाह ।

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यातिश्रेष्ठापरोक्षसाक्षात्कारब्रह्मीभूत- श्रीमत्पूर्णानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दविरचितसकलस्मृतिसारसङ्ग्रहः क्रमसन्न्यासप्रकारः समाप्तः ॥

**End:**

प्रत्यहं तर्पणं तेषां दैवतीर्थेन साक्षतम् ।
कुर्याज्जलं केवलं वा महानद्यां यथाक्रमम् ॥
मात्रादिनं(दीनां)चेतरेषां पितृतीर्थेन तर्पणम् ।
विभाण्डको नाम ऋषिरित्याह भगवान् यथा ॥

**Colophon:**

इति श्रीपूर्णानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दसरस्वतीविरचितयतिपार्वणश्राद्धविधिस्समाप्तः ॥

The contents of the various chapters are as given below:—

१. आह्निकविधिः.
२. शौचविधिः.
३. स्नानविधिः.
४. त्रिपुण्ड्रविधिः.
५. क्रमसन्न्यासविधिः.
६. अष्टश्राद्धविधिः.
७. विरजाहोमविधिः.
८. सन्न्यासिमरणे पुत्रादीनां पञ्चमहायज्ञादिकरणविधिः.
९. स्त्रीसन्न्यासविधिः.
१०. महावाक्योपदेशः.
११. क्षौरपर्वनिर्णयः.
१२. यतिपार्वणश्राद्धविधिः.

---

## No. 2811. स्मृतिसारसमुच्चयः.

## SMṚTISĀRASAMUCCAYAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 36. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

A compilation of extracts from several Smṛtis, on domestic rites and observances.

Incomplete. Breaks off in Grahaṇanirṇaya.

**Beginning:**

मुनिना याज्ञवल्क्येन विश्वामित्रेण चात्रिणा ।
विष्णुना च वसिष्ठेन व्यासेनोशनसा तथा ॥

बोधायनेन दक्षेण शङ्खेनाङ्गिरसा तथा ।
आपस्तम्बेन चागस्त्यहारीतभृगुनारदैः ॥

पाराशरे(र्ये)ण गार्गे(र्ग्ये)ण गौतमेन यमेन च ।
शातातपेन लिखितं(त)संवर्ताभ्यां तथैव च ॥

सुमन्तुना गोभिलेन मनु[:]स्वायम्भुवेन च ।
अष्टाविंशतिभिर्दृष्टं शास्त्रं लोकहिते रतैः ॥

धर्मसंरक्षणार्थाय सङ्क्षेपेण महात्मभि(हर्षय): ।
धर्मानूचुस्त्रिवेदोक्तान् स्वर्गादिफलदायकान् ॥

संवर्तः—

स्वभावाद्यत्र विचरेत्कृष्णसारस्सदा मृगः ।
धर्मदेशस्स विज्ञेयो द्विजानां धर्मसाधकः ॥

योगीश्वरः—

यस्मिन्देशे मृगः कृष्णस्तस्मिन् (धर्मं) निबोधत ।
धर्मसंरक्षणार्थाय तस्मिन्देशे वसेद्बुधः ॥

प्रातःकालं समारभ्य नियमः कथ्यतेऽधुना ।
त्रिकालविहितं कर्म तथा नैमित्ति(कादिकम्) ॥

दक्षः—

प्रातरुत्थाय कर्तव्यं गृहकृत्यं दिने दिने ।
तत्सर्वं सम्प्रवक्ष्यामि द्विजानां हितकाम्यया ॥

शौचविधिः ।

मनुः—

मूत्रोत्सर्गपुरीषे च दिवा कुर्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोस्तु यथा दिवा ॥

**End:**

ब्रह्माण्डे च—

आशौचं जायते नृणां ग्रहणे चन्द्रसूर्ययोः ।
राहुस्पर्शे तयोस्स्नात्वा दा . . . . . . ॥
पुत्रजन्मनि यज्ञे च यदा(तथा) सङ्क्रमणे रवेः ।
राहो(:)प्रदर्शने स्नानं प्रशस्तं नान्यथा निशि ॥
ग्रहणोद्वाहसङ्क्रान्तिया . . . . . . . . ।
दानं नैमित्तिकं ज्ञेयं रात्रावपि न दू(दु)ष्यति ॥

---

No. **2812.** स्मृतिसारसमुच्चयः.

SMṚTISĀRASAMUCCAYAḤ.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 262. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete. Breaks off in Abhivādanakramaḥ.

**Beginning:**

अथ स्मृतेः प्रामाण्यम् ।

शङ्खः—

तत्र वेदमूला(:) स्मृतय इति ।

मरीचिः—

दुर्बोधा वैदिकाश्शब्दाः प्रकीर्णत्वाच्च ये खिलाः ।
तत्रैव (किल) दृष्टार्थाः स्मृतितन्त्रे प्रतिष्ठे(ष्ठि)ताः ॥ इति मनुः ॥

श्रुतिं पश्यन्ति मुनयः स्मरन्ति च यथा स्मृतीः ।
तस्मात्प्रमाणमुभयं प्रमाणैः प्रमितं भुवि ॥
योऽवमन्येत ते तूभे हेतुशास्त्राश्रयान्नरः ।
स साधुभिर्बहिष्कार्यः नास्तिका(को) वेदनिन्दकः ॥ इति ॥

हारीतः—

न यस्य वेदा न च धर्मशास्त्रं न वृद्धवाक्यं हि भवेत्प्रमाणम् ।
सोऽधर्मकृद्दृष्टहतो दुरात्मा नात्मापि तस्येह भवेत्प्रमाणम् ॥

देवलः—

मन्वादयः प्रयोक्तारः धर्मशास्त्रस्य कीर्तिताः ।
तत्प्रयुक्तप्रयोक्तारः गृह्यकारास्तु मन्त्रित(ताः) ॥

अङ्गिराः—

प्रमाणानि प्रमाणज्ञैः परिपाल्या(ल्या)नि यत्नतः ।
सीदन्तीह प्रमाणानि प्रमाणैरव्यवस्थितैः ॥ इति ॥

अथ धर्मनिरूपणम्—

कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्यात्मगुणो धर्मः—इति हरदत्तः ।

अत्र मनुः—

विद्वद्भिस्सेवितस्सद्भिः नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातः यस्तद्धर्म(स्तं धर्मं) व्यवस्यत ॥

**End:**

तथायं प्रयोगः—अभिवादये देवदत्तनामाहमस्मीति(स्मि) भोः—इति ।
अत्र गौतमः—स्वनाम प्रोच्याहमयमित्यभिवादोऽज्ञसमवायः—इति ।
तद्व्या(ख्या)ता(रः)—हरदत्त(स)मय प्रत्यभिवादनविधिज्ञमतेन सम्भवे नाम प्रोच्य उच्चैरुच्चार्याहं[शब्द]शब्दश्चोक्त्वा अयमिति ब्रूयात, अयमिति

प्रत्यक्षोपदेशः । अस्मि[न्]शब्द(:)प्रयोक्तव्य इत्याहुः । अन्ते भोश(श्श)ब्दं प्रयुञ्जते–अभिवादये हरदत्तोऽहमस्मि भोः–इति प्रयोगः.

---

No. **2813.** स्मृत्यर्थसारः.

SMṚTYARTHASĀRAḤ.

Pages, 94. Lines, 21 on a page.

Begins on fol. 99*b* of the MS. described under No. 118.

Contains 2 pages of Śrutyarthasāra in the beginning.

Incomplete. Breaks off in the middle of Vividhāśaucasaṅkaṭa-nirṇaya.

**Beginning:**

स्मृत्यर्थसारः—

रत्नोद्भासितकायां सकलजनानन्दिनीं मायाम् ।
सरसिजसंभवजायां सायंप्रातर्नमाम्यहं (देवीम्) ॥

श्रीकण्ठश्रीकराद्यैश्च श्रुतिस्मृतिपुराणगैः ।
स्मृतिशास्त्रेष्वनेकेषु विप्रकीर्णेष्वनेकधा ॥

अनुष्ठानोपकारार्थं स्मृतिछि(च्छि)द्रं प्रयत्नतः ।
पुराणन्यायमीमांसासाङ्ख्यवेगैः प्रपूरितम् ॥

कामधेनौ प्रदीपे च कल्पवृक्षलतादिषु ।
शम्भुद्रविळकेदारलोल्लटाद्यैश्च भाषितम् ॥

अ(म)न्वाद्यके(ने)कस्मृतिषु व्याख्यात्व(तृ)प्रतिपादितम् ।
स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये ॥

*　　　*　　　*　　　*

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तत् ।
द्वापरे त्वर्धमासेन त्वहोरात्रेण तत्कलौ ॥

कालिवर्ज्यधर्माः ॥

**End :**

आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुस्सुताः ।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥

पितुः पितृष्वसुः पुत्राः पितृमातृष्वसुस्सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेया(:)पितृबान्धवाः ॥

मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुस्सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥

सब्रह्मचारिणि त्रिरात्रम् । एकाचार्योपनीतस्सब्रह्मचारी । स्वदेशराजमरणे दिने दिनान्तम् । रात्रौ चेद्रात्र्यन्तम् । ग्राममध्ये शवे स्थिते ग्रामस्य तावदाशौचम् । क्षत्रियाणां भूमिरक्षणार्थम्.

---

## No. 2814. स्मृत्यर्थसारः.

### SMṚTYARTHASĀRAḤ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 90. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Breaks off in the middle of Āśaucavidhi.

Same work as the above, but does not contain Śrutyarthasāra.

---

## No. 2815. स्मृत्यर्थसारः.

### SMṚTYARTHASĀRAḤ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 239. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains to the end of Gaṇḍanakṣatrajananadōṣaśānti.

**Beginning :** Same as in No. 2813.

**End:**

राजद्वारे ग्राममध्ये पर्वते ह्रद(नद)सङ्गमे ।
गजाश्वगोकुलस्थाने वल्मीकेऽश्वत्थमूलके ॥
वृषास्यशृङ्गयोश्चैव मृत्तिका दशसङ्ख्यया ।

पुण्याहानन्तरं कर्ता.

---

No. **2816.** स्मृत्याचारप्रायश्चित्तसङ्ग्रहः.

SMṚTYĀCĀRAPRĀYAŚCITTASAṄGRAHAḤ.

Substance, palm-leaf. Size, 14 × 1⅜ inches. Pages, 275. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Wants beginning and end.

Contains Ācāra and Prāyaścitta rules collected together from different Smṛtis.

**Beginning:**

. . . . . . . . . . . . प्राग्यथाविधि[:] ।
नान्दीश्राद्धं प्रदद्यात्तु कर्म कुर्यादिति स्मृतिः ॥
सर्वर्द्धिकरकर्मभ्यः पूर्वेद्युस्सर्व एव वा ।
ब्राह्मणानर्चयेदष्टौ हिरण्येनौद(नादिभिः) ॥
(समाचरे)त्स्वकं कर्म स्वगृह्योक्तविधानतः ।
द्विजेनैव सदा कार्यं नान्यशाखानुसारतः ॥

**End:**

पञ्चपर्वस्वरूपमाह—

चतुर्दश्यष्टमी पक्षद्वये दर्शश्च पूर्णिमा ।
सङ्क्रान्तिश्चेति पर्वाणि पञ्च प्राहुर्मनीषिणः ॥

तदाह गार्ग्यः —

चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
चत्वार्येतानि पर्वाणि रविसङ्क्रान्तयस्तथा ॥
एतानि पञ्च पर्वाणि तैलान्येतेषु वर्जयेत् ।
अथैतासु तिथिषु मांसादीनां वर्जनीय.

---

## No. 2817. स्मृत्याचारवचनानि.

### SMṚTYĀCĀRAVACANĀNI.

Pages, 6. Lines, 10 on a page.

Begins on fol. 106*a* of the MS. described under No. 2612.

Contains chiefly quotations from Ātrēyasmṛti and Manusmṛti.

---

## III. DIGESTS.—(SPECIAL)

### (1) ĀHNIKAM.

---

### No. 2818. आचमनविधिः

### ĀCAMANAVIDHIḤ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 47*b*. The other works herein are—Kātyāyanasūtram 1*a*, Śaucavidhi 47*a*.

Describes the method of doing Ācamana.

**Beginning:**

अथात आचमनविधिं व्याख्यास्यामः ।

प्राङ्मु(ख उदङ्)मुखो वा भूत्वा बद्धशिखी(खो) नित्यं यज्ञोपवीत्यन्तर्जानु शुचौ देशे प्रभूत उदके राजा(आचा)मति.

**End:**

यन्मुखमुपस्पृशत्यग्निस्तेन प्रीणाति

* * * *

सर्वा(ः)शिरोऽग्रेण बाहुम्(होः) ।
तस्मात् सर्वदेवमयो ब्राह्मणदेह इत्याह भगवान् कात्यायनः ॥
गोकर्णाकृतिहस्तेन माषमग्नं पिबेज्जलम् ।
तन्न्यूनमधिकं पीत्वा पुनराचम्य शुध्य(ति) ॥

**Colophon:**

(इत्याचमनविधिः) समाप्तः ॥

## No. 2819. आचार्यगुणादर्शः.

## ĀCĀRYAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 17. Lines, 4 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Wants beginning. (The first portion deals with the gathering of flowers to God).

Begins on fol. 13*a*. The other work herein is, Aṣṭakavarga (in Hōrāsāra) 1*a*.

Contains only the chapter called Pañcakālakrama which deals with the rites and the services to be performed by a Vaiṣṇava during the day, which is divided into 5 parts. The author of the work is Vēnkaṭācārya, son of Śatakratu Tātācārya of Śrīśaila family.

**Beginning :**

पञ्चकालक्रमः—

अयाचितन्तु परिग्राह्यमेव ।

कुलटाषण्डपतितस्वैरिभ्यः काकिणीमपि ।
उद्यतामपि गृह्णीयान्नापद्यपि कदाचन ॥

* * * *

भुक्तशेषं पर्युषितं घ्रातं परिम्लानम् अस्पृश्यस्पृष्टं जन्तुभिर्भक्षितं जन्तुभिरधिष्ठितम् अशुभदेशे पुष्पितं भूमौ निपतितं पश्चापद्यपि . . . . । गृहार्चायां करवीराणि विसर्जयेत् । आश्वमेधिके—

सर्वेषामेव पुष्पाणां सहस्रगुणमुत्पलम् ।

**End :**

अतो यथाधिकारं यथाशक्य . . . दधाने दयाहृदयदेशिकोपदेशपूर्वकम् अनुप्र . . देशकालदशाद्यानुगुण्येनाच्छिद्रं यथाक्रमं वङ्गिवंशेश्वरोक्तप्रक्रियया समाहृत्य वानुतिष्ठद्भिः अनन्यप्रयोजनैः परमैकान्तिभिः अनवधिकपरमपुरुषचरणपर्य(रि)चर्याकरणरूपापवर्गैश्वर्यं यथायोग्यं यथारोग्यं चात्रैव भोक्तव्यमिति सिद्धम् ॥ इति ॥

शतयज्ञतातगुरुसूनुना मया निगमान्तसूरिगुणदर्पणे कृते ।
सुमुखास्समीक्ष्य सुधियो गुणानमुं सततं निघर्षकरणेन रक्षत ।
अकलितपरमतभङ्गैरविदितनिगमान्तयुग्मसंसर्गैः ।
अघटितयोगषडङ्गैरलमलमन्यैरवेङ्कटाचार्यैः ॥

**Colophon:**

इति श्रीशैलपूर्णकुलतिलकचतुर्वेदिशतक्रतुताताचार्यनन्दनस्य सर्वतन्त्रस्वतन्त्रवेदान्ताचार्यसिद्धान्तविजयध्वजस्य चतुर्वेदिवेङ्कटाचार्यस्य कृतिषु आचार्यगुणादर्शोक्तपञ्चकालक्रमः सम्पूर्णः ॥

---

## No. 2820. आधारशक्तितर्पणम्.
## ĀDHĀRAŚAKTITARPAṆAM.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 8. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 11*a*. The other works herein are, Sandhyāvandanamantrarṣichandōdēvatādi 1*a*, Navagrahadēvatārādhanamantraḥ 5*a*, Dayāśatakam 15*a*, Nyāsaviṁśati 23*a*, Nārāyaṇōpaniṣad 25*a*, Puruṣasūktam 27*a*, Viṣṇusūktam 29*a*, Srīsūktam 31*a*, Bhūsūktam 32*a*, Bhagavattīrthapānamantraḥ 34*a*.

Complete.

Deals with the performance of Tarpaṇa or the offering of handfuls of water to appease the gods, such as, Ādhāraśakti, &c. This forms part of the daily ablutions of a Vaiṣṇava.

**Beginning:**

ओन् आधारशक्त्यै नमः, ओं प्रकृत्यै नमः, ओम् अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः, ओम् अनन्ताय नागराजाय नमः ॥

* * * *

**End:**

सर्वेभ्यो भगवत्पार्षदेभ्यो नमः, ओं नित्येभ्यो नमः, ओं मुक्तेभ्यो नमः, ओं समस्तपरिवाराय श्रीमते नारायणाय नमः ॥

अनन्तरं देवर्षिकाण्डऋषिपितृतर्पणम् ॥

अनन्तरं ब्रह्मयज्ञं कृत्वा । वस्त्रनिष्पीडनमन्त्रः—

येका(के)चास्मत्कुले जाताः अपुत्रा गोत्रजा मृताः ।

ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

इति वस्त्रनिष्पीडनं कृत्वा अनन्तरमाचमनम् ॥

---

## No. 2821. आधारशक्तितर्पणम्.

## ĀDHĀRAŚAKTITARPAṆAM.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 5. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 31*a*. The other works herein are—Ūrdhvapuṇḍravidhi 1*a*, Sandyāvandanamantra 6*a*, Yajñōpavītavidhi 14*b*, Śakalahōmavidhi 24*a*, Vaiśvadēvaprayōga 24*b*, Pañcayajñaprayōga 25*b*, Sandhyāvandanamantra 26*b*, Nyāsāḥ 28*a*, Nāmatrayamantra 30*a*, Mānasikasnāna 34*a*, Yajñōpavītavidhi 35*a*, Ṣaḍakṣarīmantra 38*a*, Dvādaśākṣarīmantra 38*b*, Viṣṇumantra 38*b*.

**Beginning:**

आधारशक्तिं तर्पयामि, प्रकृतिं तर्पयामि, अखिलजगदाधारं तर्पयामि, कूर्मरूपिणं नारायणं तर्पयामि.

**End:**

सुप्रतिष्ठितं गणाधिपतिं सवाहनपरिवारप्रहरणं तर्पयामि, भगवन्तं श्रीमन्नारायणं तर्पयामि ॥

**Colophon:**

आधारशक्तितर्पणं समाप्तम् ॥

## No. 2822. आह्निकम्.
## ĀHNIKAM.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 40. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 6*a*. The other works herein are, Darmavacanāni 1*b*, Viṣṇusahasranāmāvaliḥ 4*a*, Jitantēstōtram 25*b*.

This is a work regarding the daily rites to be performed by a Brahmin. By Rāmānujācārya.

**Beginning:**

ब्राह्मे मुहूर्ते उत्थाय हरिर्हरिरिति सप्तकृत्व उच्चार्य गुरुपरम्परां द्वयश्चानुसन्धाय,

कूर्मादीन् दिव्यलोकं तदनु मणिमयं मण्टपं तत्र शेषं
तस्मिन् धर्मादिपीठं तदुपरि कमलं चामरग्राहिणीश्च ।
विष्णुं देवीर्विभूषायुधगणमुरगं पादुके वैनतेयं
सेनेशं द्वारपालान् कुमुदमुखगणान् सर्व(विष्णु)भक्तान् प्रपद्ये ॥

इति ध्यात्वा ओं वासुदेवाय नमः, । ओं सङ्कर्षणाय नमः, । ओं प्रद्युम्नाय नमः, ओम् अनिरुद्धाय नमः ।

पुरस्तात्केशवः पातु चक्री जाम्बूनदप्रभः ।
पश्चान्नारायणश्शार्ङ्गी नीलजीमूतसन्निभः ॥
इन्दीवरदलश्यामो माधवोर्ध्वं गदाधरः ।
गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥
उत्तरे हलभृद्विष्णुः पद्मकिञ्जल्कसन्निभः ।
आग्नेय्यामरविन्दाभो मुसली मधुसूदनः ॥
त्रिविक्रमः खड्गपाणिः नैर्ऋत्यां ज्वलनप्रभः ।
वायव्यां वामनो वज्री तरुणादित्यदीप्तिमान् ॥

* * * *

अष्टोत्तरशतस्थाने ह्याविर्भूतं जगत्पतिम् ।
नमामि जगतामीशं नारायणमनन्यधीः ॥

**End :**

भगवत्कर्मणा भगवन्तमर्चयिष्यामीति स्वाध्यायं सङ्कल्प्य, भगवतो बलेनेत्यादिबलमन्त्रश्चानुसन्धाय, मनुपराशरपाराशर्यशुकशौनकादिमहर्षिप्रबन्धान् श्रवणमननजपादिभिरभ्यसेत् । यथाधिकारं यथाशक्ति स्वाध्यायमभ्यस्य, ओं कृतश्चेत्यादिना स्वाध्यायेन भगवत्कर्मणा भगवान् प्रीयतां वासुदेव इति तृप्तिं दद्यात् । अथ योगः—सायन्तनसन्ध्याजपहोमानन्तरं भगवदाराधनं च यथाशक्ति कृत्वा, ओङ्कृतश्चेत्यादिना योगाख्येन भगवत्कर्मणा भगवन्तमर्चयिष्यामीति योगं सङ्कल्प्य बलमन्त्रं पठित्वा, ततश्च प्रत्यहमात्मोज्जीवनायैवमनुसरेदित्युक्तप्रकारेण यावच्छक्ति कञ्चित्कालं भगवन्तं ध्यात्वा, ओङ्कृतश्चेत्यादिना योगाख्येन भगवत्कर्मणा भगवान्प्रीयतां वासुदेव इति तृप्तिं दद्यात् ॥

**Colophon :**

इति श्रीरामानुजाचार्यविरचितं नित्यं व्याख्यानशबलितं परिसमाप्तम् ॥

यत्करोमि यदश्नामि यज्जपामि ददामि यत् ।
यत्तपस्यामि भगवन् तत्करोमि त्वदर्पणम् ॥

---

## No. 2823. आह्निकम्.
## ĀHNIKAM.

Substance, palm-leaf. Size, 11 × 1⅛ inches. Pages, 88. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

This w rk specially relates to the disciples of the Ahōbila Mutt at Tiruvallúr, forming one of the two sections of the Vaḍagalai sect of the Śrī Vaiṣṇavas.

| आह्निकप्रकरणविषयाणामनुक्रमणिका— | | Pages. | Lines. |
|---|---|---|---|
| (१) ऊर्ध्वपुण्ड्रविधानक्रमः उपक्रमशून्यः. | .... | ३ | ६ |
| (२) द्वादशनामध्यानश्लोकाः<br>द्वादशदेवीनामध्यानश्लोकाः | .... | ३ | ६ |

| | | Pages. | Lines. |
|---|---|---|---|
| ४. | गुरुपरम्पराध्यानश्लोकाः .... .... | १० | ६ |
| ९. | सन्ध्यावन्दनविधिः .... .... | १८ | ६ |
| १८. | मूलमन्त्रजपविधिः .... .... | २ | ६ |
| १९. | शरणागतिमन्त्रजपविधिः .... .... | २ | ६ |
| २०. | चरमश्लोकमन्त्रजपविधिः .... .... | २ | ६ |
| २१. | आधारशक्त्यादितर्पणक्रमः .... .... | १० | ६ |
| २६. | यज्ञोपवीतप्रतिष्ठाविधानम् तद्धारणादिक्रमश्च | ४ | ६ |
| २८. | आचार्यध्यानश्लोकाः .... .... | २ | ६ |

२९. मन्त्रस्नानमानसिकस्नानम्.

३०. देवर्षिपितृतर्पणम्.

३१. ब्रह्मयज्ञनिरूपणम्.

३६. सन्ध्यावन्दनमन्त्रऋषिच्छन्दोदेवताविनियोगः.

३८. भगवदाराधनक्रमः.

४२. षडासनक्रमः.

४३. भगवदाराधनक्रमः.

४८. वेदान्तदेशिकमङ्गलाशासनम.

५०. शठकोपस्वामिविषयकद्राविडप्रबन्धः.

५३. வாழித்திருநாமம்.

**Beginning:**

आह्निकम्—

(विपन्य)वो जागृवांऽसस्समिन्धते। विष्णोर्यत्परमम्पदम् । ओं षौं नमः, परमाय परमेष्ठ्यात्मने वासुदेवाय नमः; ओं यां नमः, पराय पुरुषात्मने सङ्कर्षणाय नमः; ओं रां नमः, पराय विश्वात्मने प्रद्युम्नाय नमः; ओं वां नमः, पराय निवृत्त्यात्मनेऽनिरुद्धाय नमः; ओं लां नमः, पराय सर्वात्मने नारायणाय नमः; ओन्नमो नारायणाय, ओन्नमो भगवते वासु-

देवाय, विष्णुषडक्षरेण; श्रीमन्नारायणचरणौ शरणं प्रपद्ये श्रीमते नारायणाय नमः; ओन्नमो नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् इत्येतैर्मन्त्रैश्चाभिमन्त्र्य, तर्जन्यानामिकया वा मृदमादाय.

**End:**

पर्यङ्कासनं समर्प्य, अर्घ्यपाद्याचमनम् उत्तरवाक्येन दत्वा मन्त्रपुष्पन्दत्वा "சிற்றஞ்சிறுகாலே" इति गाथाश्चोक्त्वा प्रणम्य

उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥

तत आचामेत् । भगवानेव सर्वं स्वयमेव कारितवान् ॥

---

## No. 2824. आह्निकम्.

## ĀHNIKAM.

Substance, palm-leaf. Size, $12\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 55. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 65*a*. The other works herein are, Gṛhyaprayōga 1*a*, Sāntiprāyaścittaviṣaya 48*a*, Srāddhīyasmṛtivacana 49*a*, Agnisandhānavacana 55*b*, Jyautiṣaviṣaya 56*a*, Ācāravacanāni 92*a*, Śraddhīyasmṛtivacanāni 101*a*, Praśnaśāstra 139*a*.

**Beginning:**

. . . . . शिरः प्रावृत्य वाससा ।
यज्ञोपवीतं कर्णे तु दक्षिणे तु निधाय च ॥
कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः ।
अयज्ञियैरनार्द्रैश्च तृणैस्सञ्छाद्य मेदिनीम् ॥
घ्राणास्ये वाससावेष्ट्य मलमूत्रं त्यजेद्बुधः ।

आपस्तम्बः—

"नोर्ध्वं नाधो न तिय(र्य)क् च किञ्चिद्वीक्षेत बुद्धिमान् ।
नभोभूम्यन्तरं पश्येत्कृत्वा मूर्ध्न्युपवीति(त)कम् ॥

नक्षत्रज्योतिरारभ्य सूर्यस्योदयनं प्रति ।
प्रातस्सन्ध्येति तां प्राहुः श्रुतयो मुनिसत्तमाः ॥
दूरादावसथान्मूत्रं दूरात्पाद(।)वनेजल(न)म् ।
उच्छिष्टान्नं निषेकं च दूरादेव समाचरेत् ॥
नान्यचित्तश्चिरं तिष्ठेन्न स्पृशेत्पाणिना शिरः ।
न ब्रूयान्न शिरः पश्येद्विण्मूत्रोत्सर्जने बुधः ॥"

बोधायनः—

"फालकृष्टे जले चित्त्यां वल्मीके गिरिमस्तके ।
देवालये नदीतीरे दर्भपृष्ठे तु शाड्वले ॥
छायायां वृक्षमूले वा विण्मूत्रे न त्यजेद्बुधः ।
गृहीतोदकपानं चेत्कुर्यान्मूत्रपुरीषके ॥
तत्तोयं मूत्रतुल्यं स्यात्पीत्वा चान्द्रायणं चरेत् ॥"

End:

धात्रीफलं नरस्स्वाद्यालक्ष्मीको(हि)भवेत्सदा ।
वीर्यहानिर्यशोहानिः प्रजाहानिस्तथैव च ॥
भवेद्यस्मात्ततो रात्रौ धात्रीं यत्नेन वर्जयेत् ।

बोधायनः—

ओदनन्तु पुनः पक्कं नाळिकेररसं तथा ।
तथा तोयमभूमीषु ब्राह्मणो नैव भोजयेत् ॥

* * * *

स्नानं कृत्वार्द्रवासस्तु ऊर्ध्वमुच्चारयेद्द्विजः ।
स्नानवस्त्रमधस्ताच्चेत्पुनस्स्नानेन शुध्यति ॥

## No. 2825. आह्निकम्.
## ĀHNIKAM.

Substance, palm-leaf. Size, 9¼ × 1½ inches. Pages, 106. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 13*a*. The other works herein are, Samprōkṣaṇavidhi 1*a*, Nārāyaṇakavacam 5*a*, Bhūgōlapurāṇam 11*a*, Rāmāṣṭōttaraśatanāmāvali 66*a*.

**Beginning:**

अधीयीत तथा ध्यानमाचरेदिति सङ्ग्रहः ।
नमः क्षि(ति)धरायेति न्यसेद्वामपदं भुवि ॥
नमोऽस्तु प्रियदत्तायै तुभ्यं देवि वसुन्धरे ।
त्वं माता सर्वलोकानां पादस्पर्शं क्षमस्व मे ॥

* * * *

ध्यायन्यजेद्दयाम्भोधिं देवदेवं रमासखम् ।
मन्त्रेण मृत्तिकां हृत्वा विशुद्धादेव भूतलात् ॥
विशुद्धदेशनिक्षिप्तस्था(स्ना)नोपकरणस्सुधीः ।
दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥
दक्षिणाभिमुखो रात्रौ कुर्यान्मूत्रादिमोचनम् ।
शौचं कुर्यात्पुरान्यस्तद्विभागैकमृदा शनैः ॥

**End:**

विष्वक्सेनांशमुद्धृत्य, चण्डकुमुदादीनां शठकोपाद्याचार्याणां च यथाक्रमेण निवेद्य, स्वयमपि (स)पुत्रबन्धुदारस्सन् निवेदितान्नं नित्यमेवाश्नीयात् । स्वामिनः निवेदनानन्तरं मन्त्रासने अर्घ्यादि समर्प्य, श्रीभूमिनीलानन्तगरुडविष्वक्सेनाचार्याणां षोडशोपचारं समर्प्य,

चरणं पवित्रं विततं . . . दधातु;
तद्विष्णोः परमं पदं . . . पदम्;
प्र(प)र्यात्प्या . . . . सर्वञ्जयति;
उन्नया क मि हो क इ . . . क्षारे;

तद्वैतद्ब्रह्म . . . . . . . वर्तते;
आप्यायन्तु ममाङ्गानि . . . सन्तु ॥
शान्तिश्शान्तिः ॥
சிற்றஞ்சிறுகாலே, வங்கைக்கடல்கடந்த, பல்லாண்டு.

---

## No. 2826. आह्निकम्.

## ĀHNIKAM.

Pages. 58. Lines, 25 on a page.

Begins on fol. 33*a* of the MS. described under No. 924. By Gōpāladēśika.

**Beginning:**

गोपालदेशिकाह्निकम् ।

श्रीकृष्णदेशिकपदाम्बुजभृङ्गराजं
गोपालदेशिकशिखमणिमाश्रयामः ॥ १ ॥
अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्ततिग्मांशुजाले ।
निरवधिकरुणाब्धौ वेदचूडागुरौ मे
भवतु परमभक्तिः सर्वतन्त्रस्वतन्त्रे ॥ २ ॥
अत्र्यन्ववायकलशोदधिपूर्णचन्द्रं
श्रीकृष्णदेशिकपितृव्यदयैकपात्रम् ।
श्रीवत्सगोत्रवरदार्यविवृद्धबोधं
श्रीकृष्णदेशिकमहं शरणं प्रपद्ये ॥ ३ ॥
वेदान्तलक्ष्मणमुनिं मम देशिकेन्द्रं
वेदान्तरङ्गवचसं जगदेकभाग्यम् ।
वेदान्तदेशिकसुभाषितजीवनोक्ति
वेदान्तयुग्मविहृतिं शरणं प्रपद्ये ॥ ४ ॥

श्रीपाञ्चरा[क्ष]त्ररक्षोक्तः प्रपन्नानां महात्मनाम् ।
भगवत्परिचर्यायाः क्रमः सङ्गृह्यतेऽधुना ॥ ५ ॥

श्रीमद्वेदान्तरामानुजमहादेशिकाय नमः ।
अस्मद्गुरुपरम्पराभ्यो नमः ।

ब्राह्मे मुहूर्ते सम्प्राप्ते निद्रां परित्यज्य सप्तकृत्वो हरिर्हरिर्हरिरिति हरिशब्दं कीर्तयन् तमेव चिन्तयंश्चोत्थाय,

ग्राहग्रस्ते गजेन्द्रे रुदति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥

* * * *

इति हरिशब्दार्थतया प्रसिद्धं समस्तपापहरं भगवन्तमनुसन्धाय, निद्रान्ताचमनं दक्षिणश्रवणस्पर्शरूपं तदानीं शक्यं विधाय,

End:

सर्वे(र्वो)प्यानुषङ्गिको भोगः क्रीडाशुकक्षीरास्वादन्यायेन स्वामिभोगशेषभूतो भवतीति भगवत्कैङ्कर्यैकरतेः परमैकान्तिनः अनादिमायानिशावसानेन[त]मोक्षवासरप्रारम्भे प्रत्यूषवदवस्थितोऽयमायुःशेषकाल इति सर्वं निरवद्यम् ॥

---

## No. 2827. आह्निकम्.

## ĀHNIKAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 80. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

This is by Gōpāladēśika; it is followed by an important section of the Vaḍagalais known as Munitraya.

Complete.

Same work as the above.

## No. 2828. आह्निकम्.

## ĀHNIKAM.

Substance, palm-leaf. Size, $16\frac{1}{3} \times 1\frac{1}{2}$ inches. Pages, 71. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

By Gōpāladēśika.

Same work as the above.

The book is said to have belonged to Narasiṁhācārya.

---

## No. 2829. आह्निकम्.

## ĀHNIKAM.

Substance, palm-leaf. Size, $12\frac{4}{8} \times 1\frac{3}{8}$ inches. Pages, 51. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Vaiṣṇavaikādaśīnirṇaya 27*a*.

Incomplete.

**Beginning:**

तुलसीग्रहणे तु वर्जितानि—

आरवारे च शुक्रे च मन्वादिषु युगादिषु ।
नाहरेत्तुलसीपत्रं मध्याह्नात्परतोऽहनि ॥
सङ्क्रान्तिपक्षयोरन्ते द्वादश्यां निशि सन्ध्ययोः ।
तुलसीं ये विचिन्वन्ति ते कृन्तन्ति हरेश्शिरः ॥

इत्यादि ।

अतोऽनिषिद्धदिनेषु

तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये ।
केशवार्थं लुनामि त्वां वरदा भव शोभने ॥

मोक्षैकहेतोर्धरणिप्रसूते
विष्णोस्समस्तस्य गुरोः प्रिये ते ।
आराधनार्थं पुरुषोत्तमस्य
लुनामि पत्रं तुलसि क्षमस्व ॥
प्रसीद मम देवेशि प्रसीद हरिवल्लभे ।
क्षीरोदमथनोद्भूते तुलसि त्वं प्रसीद मे ॥
इति मन्त्रैस्साङ्कुराञ्चतुष्पत्रां वा तुलसीं गृह्णीयात् ।

* * * *

स्नानविधिः—

जलं प्रविश्य सङ्कल्पितपीठे आवाह . न्विते ॥
इति उदकाञ्जलिना गङ्गामावाह्य, विष्णुपादाम . एनसः ॥
इत्यर्घ्यं दत्वा, मूलमन्त्रेण सप्तकृत्वोऽभिमन्त्र्य, स्वमूर्ध्नि (सि)ञ्चेत् ।

**End:**

वाक्यैकत्वे योजने द्वे तिस्रो वाक्यद्वये तथा ।
वाक्यत्रये पञ्चतर्य(य्य): ता(:)पृथक्पृथगीरिताः ॥
इति [कारि]कारिकादर्पणोक्तसङ्ग्रह(क्र)मेण निगमान्तदेशिकोक्तमन्त्रार्थमपि चिन्तयन् यथाशक्ति मूलमन्त्रं जपेत ॥

---

## No. 2830. आह्निकम्.

## ĀHNIKAM.

Substance, palm-leaf. Size, 14 × $1\frac{1}{2}$ inches. Pages, 92. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*.

The other works herein are, Kaivalyōpaniṣadvyākhya 48*a*, Vākyavṛttiḥ 54*a*, Svātmaprakāśikā 58*a*, Manīṣāpañcakam 62*a*, Daśaślokī 64*a*, Varṇadēvatādivivaraṇam 65*a*, Gāruḍōpaniṣad 66*a*.

Incomplete.

Pertains to the Smārta community of Brāhmins.

**Beginning:**

यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गळा ।
तयोस्संस्मरणात् पुं(सस्सर्वत्र ज)यमङ्गळम् ॥

तमञ्जनानन्दनमुग्रवीर्यं
निरञ्जनं काञ्चनशैलकल्पम् ।
विभञ्जनं रावणि(ण)निष्कुटस्य
प्रभञ्जनस्यात्म(जमाश्रयामि) ॥

पारावती विधिमुखावलिसौधपङ्क्तेः
दिव्याभिजात्यज(न)मानसराजहंसी ।
योगीश्वरैरपि विमृग्यनिज(स्वरू)पा
वागीश्वरी दिशतु मे वचसां समृद्धिम् ॥

आह्निकं सङ्गृह्यते । तत्र मनुः—
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचि(न्तयन्) ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥
वेदतत्त्वार्थः परमात्मा ।

शौनकः—
ब्राह्मे मुहूर्त उत्थाय (चिन्तये)दात्मनो हितम् ।
गुरुं विष्णुं नमस्कृत्य मातापित्रोस्तथैव च ॥

विष्णुपुराणे—
ब्राह्मे मुहूर्त उत्थाय . . . मान्नृप ।
विबुद्धश्चिन्तयेद्धर्ममर्थञ्चाप्यविरोधिनम् ॥
अपीडया तयोः काममुभयोरपि . . . ।

माधवीये—

सूर्योदयात्प्रागर्धप्रहरे द्वौ मुहूर्तकौ; तत्राद्यो ब्राह्मः ।

End:

अत एव व्यासः—

देशक्षोभे महापत्तौ मार्जनार्घ्याद्यसम्भवे ।
सन्ध्यागतं सहस्रांशुं मन्त्रैःकुर्यादुपस्थितम् ॥

इति । अत एव युधिष्ठिरादिभिर्युद्धोद्यतैस्समयानुष्ठानासमर्थैस्सकलाङ्गपरित्यागेनादित्योपस्थानमात्रमनुष्ठितम् ।

तदुक्तं महाभारते—

ते तथैव महाराज दंसि(शि)ता रणमूर्धनि ।
सन्ध्यागतं सहस्रांशुमादित्यमुपतस्थिरे ॥

सन्ध्यागतं सन्धि(न्ध्या)मागतम् । अपरे तु अर्घ्यदानं, सन्ध्याध्यानं, गायत्रीजपः, उपस्थानश्च, प्रधानम्—इति वदन्ति ।

तदेव गायत्र्यादिनामोपेतसन्ध्याशब्दप्रतिपाद्यस्सवितैवोपास्यः ।

उदयात्प्राक्तनी सन्ध्या घटिकाद्वयमीरिता ।
सन्ध्या मुहूर्तमात्रैव ह्र(ा)सवृद्धौ समा स्मृता ॥ इति ।

---

No. 2831. आह्निकम्.

ĀHNIKAM.

Substance, palm-leaf. Size, $8\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 4. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Contains the Tarpaṇa in relation to daily bathing and Brahmayajña.

No. **2832.** **आह्निकम्.**

ĀHNIKAM.

Pages, 92. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1217.

Complete.

**Beginning :**

मनुना याज्ञवल्क्येन विश्वामित्रेण चात्रिणा ।
विष्णुना च वसिष्ठेन व्यासेनोशनसा तथा ॥

बोधायनेन दक्षेण शङ्खेनाङ्गिरसा तथा ।
अगस्त्येनापस्तम्बेन हारीतगुरुनारदैः ॥

पाराशर्येण गार्गे(र्ग्ये)ण गौतमेन यमेन च ।
शातातपेन शङ्खेन संवर्तेन तथैव च ॥

गोविलेन सुमन्तेन (सुमन्तुना गोभिलेन) मनुस्वायम्भुवेन च ।
अष्टाविंशतिभिर्दृष्टं शास्त्रं लोकहितैषिभिः ॥

धर्मसंरक्षणार्थाय सङ्क्षेपेण महर्षयः ।
धर्मानूचुस्त्रिवेदोक्तान् स्वर्गादिफलदायकान् ॥

स्वभावाद्यत्र विचरेत्कृष्णसारस्सदा मृगः ।
धर्मदेशस्स विज्ञेयो द्विजानां धर्मसिद्धये ॥

* * * *

(अहन्यहनि)कर्तव्यो नियमः कथ्यतेऽधुना ।
विहितस्य द्विजातीनां शौचादिविधिसिद्धये ॥

ब्राह्मे मुहूर्त उत्थाय(चिन्तयेदात्मनो हितम्) ।
धर्मार्थकामान् स्वे काले (यथाशक्ति न हापयेत्) ॥

**End:**

इति ऋतुगमननिर्णयः ॥

दर्शो यत्रापराह्णं स्पृशति स दिवसः श्राद्ध(का)ल(लो)द्वयोश्चे-
द्यस्मानल्पोऽपराह्णे यदि भवति सम(:) क्षीयमाणे तु पूर्वः ।
वृद्धौ साम्येऽप्यनग्नेर्युवतिवृषलयोश्च श्च एवाहिताग्नेः
पूर्वा न क्वापराह्णं स्पृशति कुतपसमं स्पर्शतोऽयं विधिः स्यात् ॥
सायन्तन्यपरत्र चेन्मृततिथिः सैवाब्दिके मासिके
सा ग्राह्या ह्यपराह्णयोर्यदि तदा यत्राधिका सा मता ।
तुल्या चेदुभयापराह्णसमये पूर्वा न चेत्तद्द्वये
पूर्वैव त्रिमुहूर्तगास्तसमये नो चेत्परा(रै)वोचिता ॥

**Colophon:**

इत्याह्निकं सम्पूर्णम् ॥

---

## No. 2833. आह्निकसङ्ग्रहः.

## ĀHNIKASAṄGRAHAḤ.

Substance, palm-leaf. Size, 11⅜ × 1⅜ inches. Pages, 80. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 18*a*. The other works herein are - Prāyaścittaviṣayaḥ 1*a*, Guruparamparā 57*b*, Śrīcūrṇapratiṣṭhāvidhiḥ 88*a*, Sthālīpākaḥ 88*b*, Raghuvīragadyam 90*a*, Brahmakūrcavidhiḥ 93*a*, Kūśmāṇḍahōmaḥ 96*a*, Kāśyapōttarasaṁhitā 102*a*.

Complete.

**Beginning:**

ब्राह्मे मुहूर्ते सम्प्राप्ते निद्रां परित्यज्यं सप्तकृत्वः हरिर्हरिर्हरिरिति हरिशब्दं कीर्तयन् तमेव चिन्तयंश्चोत्थाय,

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।

आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥

* * * *

इति हरिशब्दार्थतया प्रसिद्धं समस्तपापहरं भगवन्तमनुसन्धाय, निद्रान्ताचमनं दक्षिणश्रवणस्पर्शरूपं वा तदानीं शक्यं विधाय तस्मिन्नेव शयने . . . . . . . .

* * * *

पूर्वरात्र्यनुसंहितप्रकारेणानुसन्धाय,

**End:**

भगवद्वासुदेवपादारविन्दार्चनेन योगाख्येन कर्मणा भगवन्तं वासुदेवमर्चयिष्यामि, . . . . . . . कर्म करिष्यामि इति सङ्कल्प्य, भगवानेव कारयतीत्यनुसन्धाय, द्वयमनुसन्धाय, अखिलहेयप्रत्यनीकेत्यादिपूर्वोक्तप्रकारेणानुसन्धाय, चतुर्दशभुवनात्मकमण्डमित्यारभ्य श्रीवैकुण्ठगद्यं समग्रमनुसन्दधीत; तदशक्तौ भगवद्ध्यानसोपानं वानुसन्दधीत ।

निद्राप्रसक्तौ संहारक्रममाश्रित्य तत्त्वान्यात्मनि संहरेत् । ततो भगवच्चरणारविन्दयोर्विन्यस्तशिरस्कः माधवं हृदये ध्यात्वा, तमेव चिन्तयन् तमेव कीर्तयन् सुखशयनं कुर्यात् । निद्राविच्छेदप्रसक्तौ सत्यां पुनरा निद्रागमात् तमेव ध्यायेत्; कीर्तयेच्च । एवं वर्तमानस्य सर्वकालोऽप्यवन्ध्यो भवतीति सर्वे व्यापाराः कैङ्कर्यरूपा भवन्ति ॥

**Colophon:**

इत्याह्निकं समाप्तम् ॥

इत्याह्निकसङ्ग्रहस्समाप्तः ॥

## No. 2834. आह्निकसङ्ग्रहः.

## ĀHNIKASAṄGRAHAḤ.

Pages, 26. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 2539. Incomplete.

**Beginning:**

ब्राह्मे मुहूर्त उत्थाय चिन्तयेदात्मनो हितम् ।
धर्मार्थकामान्स्वे काले यथाशक्ति समापयेत् ॥

पराशरव्याख्यानोप(नानु)सारेण आह्निकं सङ्गृह्योच्यते—

रात्रेः पश्चिमेऽर्धयामे हरिं चिन्तयन्नुत्थाय गृहाद्बहिः पादौ मुखञ्च प्रक्षाल्य द्विराचम्य आत्मानं व्याहृतिभिः प्रोक्ष्य शुचौ देशे आसन उपविश्य समाहित आत्मनो हितं कृतं करिष्यमाणमलोकविद्विष्टं सुखोदर्कं धर्मं, तदविरुद्धमर्थम्, उभयाविरुद्धं कामञ्च तन्मूलान्कायक्लेशांश्च विचिन्त्य.

**End:**

पञ्चप्राणाहुति(भि): प्राणे निविष्ट इति प्राणायेति वा पञ्चभिः मन्त्रैः प्राणादीन्ध्यायन् अतिहाय दतोऽस्कन्दयन् हुत्वा ब्रह्मणि म इत्यात्मानं ब्रह्मणि संयोज्य यावद्ग्रासं सन्नयन्नस्कन्दयन् सहाङ्गुष्ठं मुखशब्दमकुर्वन् पाणिम् चालनव(अचालयन्न)धून्वन् गोविन्दं स्मरन् दैवेन तीर्थेन कृत्स्नं ग्रासं ग्रसेत । मध्ये पिपासा चेत् अशब्दयन्नस्कन्दयन्.

---

## No. 2835. ऊर्ध्वपुण्ड्रविधिः.

## ŪRDHVAPUṆḌRAVIDHIḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2821.

Deals with the method of putting the tridental mark on the forehead.

**Beginning:**

पर्वताग्रे नदीतीरे कुरुक्षेत्रे विशेषतः ।
सिन्धुतीरेऽथ वल्मीके तुलसीमूलमाश्रिते ॥

अस्त्रमन्त्रेण वामहस्ते संशोध्य, प्रणवेन जलं निधाय,

अश्वक्रान्ते . . . . . . . . मां पदे पदे ॥

इति मृत्तिकां गृहीत्वा,

गन्धद्वारां . . . . . . श्रियम् ॥

इति मृत्तिकां सेचयेत् । सेचनानन्तरं वामहस्ते अस्त्रमन्त्रेण दशदिक्षु रक्ष(क्षां).

**End:**

दामोदरं चतुष्पाशमिन्द्रगो(को)पनिभं भजे ।
वासुदेवमुपासेऽहं पूर्णेद्वयि(न्द्वयु)तसन्निभम् ॥

इति तत्तद्ध्यानपूर्वकमनु(स)न्धाय, केशवानमि(य नम इ)ति द्वादशोर्ध्वपुण्ड्र(ान्)धारयेत् ॥

---

No. **2836.** ऊर्ध्वपुण्ड्रविधिः.

ŪRDHVAPUṆḌRAVIDHIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 25*a* of the MS. described under No. 206. Complete.

**Beginning:**

ओं वीर्यायास्त्राय फट्—इत्यस्त्रमन्त्रेण हस्तं संशोध्य, उद्धृतासीति मन्त्रेण मृदमादाय, गन्धद्वारेति मन्त्रेण प्रणवेन जलं निधाय सेचयेत् । अस्त्रमन्त्रेण दशदिक्षु रक्षां कृत्वा, भगवान् पवित्रं वासुदेवः पवित्रꣳ शतधारꣳ सहस्रधारमपरिमितधारमच्छिद्रमरिष्टमक्षय्यमच्युतमपरिमितं परमं पवित्रं भगवान् वासुदेवः पुनात्विति अस्त्रमन्त्रेण पुनर्जलं निधाय.

**End :**

प्रणवेन प्रथमं मूर्ध्नि विन्यसेत् । अनन्तरं केशवादिद्वादशनामभिः ललाटादिषु धार्यम् । शिष्टमूर्दं द्वादशाक्षरेण मूर्ध्नि विन्यसेत् ।

---

No. 2837. ऊर्ध्वपुण्ड्रविधिः.
ŪRDHVAPUṆḌRAVIDHIḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 77*b* of the MS. described under No. 206.

Contains only 6½ ślōkas of Ūrdhvapuṇḍradhāraṇamantra-dhyāna.

---

No. 2838. औपासनम्.
AUPĀSANAM.

Substance, palm-leaf. Size, 9¼ × 1⅛ inches. Pages, 16. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 3*a*. The other works herein are, Sudarśana-mantra 1*a*, Aghōranīlakaṇṭhamantra 12*a*.

Deals with the daily ritual of married Brahmins consisting in the throwing of handfuls of rice on fire in propitiation of the Sun in the morning and Fire in the evening.

This work specially pertains to the Sāmavēdis.

**Beginning :**

एह्यग्नेत्यस्य मन्त्रस्य, ब्राह्मणपुत्रो गौतम ऋषिः, अग्निर्देवता, त्रिष्टुप्छन्दः, अग्नेरावाहने विनियोगः ।

ओम् एह्यग्न इह होता निषीदादब्धस्सुपुर एता भवा नः.

**End :**

ओं भूस्स्वाहा—अग्नये अनिरुद्धाय इदं न मम; ओं भुवस्स्वाहा—वायवे प्रद्युम्नायेदं न मम; (ओं) सुवस्स्वाहा—सूर्यादि(य)सङ्कर्षणायेदं न मम; ओं भूर्भुव(स्सुवस्)स्वाहा—प्रजापतये [स्वाहा प्रजापतय] इदं न मम ॥

## No. 2839. औपासनम्.

## AUPĀSANAM.

Pages, 9. Lines, 5 on a page.

Begins on fol. 85b of the MS. described under No. 1872. (Among the other works mentioned therein should have been included Sadācārastōtram 53*a*.)

**Beginning:** Same work as the above.

**End:**

तं जानन्नग्न आसीदाथा नो वर्धया गिरः ।
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्ने(णाग्नये) ।
नम आहवनीयाय महावेद्ये(द्यै)नमो नमः ॥
यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्णाजुष्ट हृषीकेश वासुदेव नमोऽस्तु ते ॥
यज्ञपुरुष ! यथास्थानमुद्वासयामि ॥

---

## No. 2840. औपासनम्.

## AUPĀSANAM.

Substance, palm-leaf. Size, 13½ × 1½ inches. Pages, 2. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 4*b*.

Complete.

The other works herein are :—

| | Fol. | | Fol. |
|---|---|---|---|
| Puṇyāhavācanam .. | 1*a* | Punarādhānam .. | 6*a* |
| Abhyudayaśrāddham .. | 1*b* | Sandhyāvandanavidhiḥ .. | 7*a* |
| Kāmyaśrāddham .. | 4*a* | Gōmukhajananavidhiḥ .. | 8*a* |
| Aupāsanam .. | 4*b* | Vāstuhōmavdihiḥ .. | 10*a* |
| Agnisamārōpaṇam .. | 5*a* | Vāstuhōmarṣidēvatācchandāṁsi .. .. | 11*a* |
| Agnidvayasaṁsargavidhiḥ | 5*b* | | |

| | Fol. |
|---|---|
| Pūgasīmantavidhiḥ .. | 17b |
| Bōdhāyanōkta Pūgasīmantavidhiḥ .. | 19a |
| Phalōdgamadikphalam .. | 20a |
| Gaṇḍaśāntiḥ .. .. | 21a |
| Arkavivāhavidhiḥ .. | 22b |
| Putrasvīkāravidhiḥ .. | 23a |
| Grahaṇaśāntiḥ .. | 24b |
| Paṭṭamantraḥ .. .. | 26a |
| Saṅkrāntiśāntiḥ .. .. | 27a |
| Mūlānakṣatra Jananaśāntiḥ .. .. | 28b |
| Tryambakakalpaḥ .. | 31a |
| Jātavēdasakalpaḥ .. | 32b |
| Kuhūśāntiḥ .. .. | 35a |
| Caturdaśījātaśāntiḥ .. | 36b |
| Gaulīsaraṭapatanaśāntiḥ. | 37a |
A work on the method of consecrating (1) the Garland of lotus seeds and (2) of Tulasi beads, so as to make them fit to be worn round the neck.

**Beginning** of (1):

ततः पद्माक्षतुलसीमालिकां धारयेद्गले ।
श्रीमत्प(तु प)त्रमतुलं देवदेवेन धारितम् ॥
तयोरुपरि सन्धार्य सर्वपापप्रणाशनम् ।
पद्मा(क्षमा)लिका धार्या सततं ब्रह्मवादिभिः ॥
प्रतिष्ठितविधानेन तुलसीमालिकापि च ।
पद्माक्षमालिकां गृह्य मूलमन्त्रेण मार्जयेत् ॥
पञ्चगव्यैस्स्थापयित्वा पुण्याहाद्भिस्ततः परम् ।
पवित्रमूलमन्त्राभ्यां द्वादशाक्षरविद्यया ॥

**End** of (1):

पद्माक्षमालिकामेवं प्रतिष्ठाप्य विधानतः ।
धारयेत्प्रत्यहं विद्वान् अन्यथा(नि)ष्फलं भवेत् ॥

**Colophon** of (1):

पद्माक्षमालिकाप्रतिष्ठा सम्पूर्णा ॥

**Beginning** of (2):

तुलसीमालिकामेवं प्रतिष्ठाप्य विधानतः ।
पद्माक्षमालिका(लया)सार्धं धारयेन्मुक्तिभाक् भवेत् ॥

तुलसीमालिकां विद्वान् संगृह्य प्रोक्ष्य वारिभिः ।
पुण्याहैः पञ्चगव्येन स्नाप्य पञ्चामृतैस्ततः ॥

**End** of (2) :

विप्रेण सर्वदा धार्यौ(र्यं) मालिकाद्वयमुत्तमम् ।
कर्मकाले विशेषेण प्रियं देवस्य नित्यशः ॥

**Colophon** of (2) :

इति तुलसीमालिकाप्रतिष्ठा संपूर्णा ॥

---

No. **2940.** पद्माक्षतुलसीमालिकाप्रतिष्ठा.

PADMĀKṢATULASĪMĀLIKĀPRATIṢHṬĀ.

Pages, 4. Lines, 6 on a page

Begins on fol. 7*a* of the MS. described under No. 896.

Complete.

Same work as the above.

---

No. **2941.** पार्वणस्थालीपाकः.

PĀRVAṆASTHĀLĪPĀKAḤ.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{3}{4}$ inches. Page, 1. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 20*a*. The other works herein are, Gautamasmṛti 1*a*, Aśvalāyanaśrāddhaproyōga 5*a*, Sarasvatīsūktam 18*b*.

Complete.

**Beginning :**

श्रीरामचन्द्रप्रीत्यर्थं पार्वणस्थालीपाकं करिष्ये । तदङ्गजन्या(मग्न्या) धानं करिष्ये । तत्र देवतापरिग्रहार्थमस्मिन् कर्मण्यास्मिन्नन्वाहितेऽग्नावग्निं जातवेदसमिध्मेन प्रजापतिं प्रजापतिं चाघारदेवते आज्येनाग्नीषोमा चक्षुषी आज्येनाग्नीमग्नीषोमौ च प्रधानदेवते.

**End:**

तत्र उलूखलं निधाय उलूखले तण्डुलान् पूरयेत् । व्रीहीन् पत्नी स्वयं वा मुसलेनावहन्य(त्य)तण्डुलान् त्रिः फलीकृतान् त्रिः प्रक्षाल्य श्रपयेत् । शेषं पुनरसन्धानप्रयोगवत् ज्ञातव्यम् ॥

---

No. 2942· मध्वमताचारविधिः.

MADHVAMATĀCĀRAVIDHIḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 206. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Incomplete.

Treats of the nature of the rites and observances of the Mādhva community.

**Beginning:**

सन्तर्पयेच्च तिसृभिर्व्याहृतीभिस्तिलाक्षतैः ।
केवलैस्तण्डुलैर्देवानृषीन् सतिलतण्तुलैः ॥
पितॄन् साक्षात्तिलैरेव तर्पयेद्द्विजसत्तमः ।
सतिलैस्तण्डुलैस्तीरे दद्यात्रीनुदकाञ्जलीन् ॥
ये के चेत्यम्बराम्भोभिस्तीरे निष्पीडयेत्तिलैः ।
स्नात्वैवं वाससान्येन शिरोऽङ्गं परिमार्जयेत् ॥

**End:**

पादस्पृष्टञ्च पतितमकालेनाशुचिस्थितम् ।
भुक्तशिष्टं तथास्पृश्यस्पृष्टं दत्तावशिष्टकम् ॥
वर्ज्यं वल्लित्रयं कन्दं सूरणद्वयमुत्पलम् ।
द्वितयञ्चैव हविर्योग्यं चतुर्मुख ॥
जीवन्ती वास्तुकं शाकं कारवल्लीद्वयं तथा ।
तुम्बीदळश्च भञ्जीश्च शिम्बमुद्गदलानि च ॥

## No. 2943. यतिधर्मः.

## YATIDHARMAḤ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 104. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete.

This is a work by Purusōttamānandasarasvatī, pupil of Pūrṇānanda, regarding the life and duties of an ascetic.

Begins on fol. 1*a*. The other work herein is, Abhinavaṣaḍaśītivyākhyā 52*a*.

The first two leaves are not readable.

**Beginning:**

तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ।
आ(अ)गारादभिनिष्क्रान्तः पवित्रोपाचितो मुनिः ॥
समुपोढेषु कायेषु निरपेक्षः परिव्रजेत् ।
श्रुतिः क्षमा दम(मोऽ)स्तेयं शौचमिन्द्रियनिग्रहम्(:) ॥
ह्रीर्विद्या सत्यमक्रोथ(धो)दशकं धर्मलक्षणम् ।
दशलक्षणकं धर्ममनुतिष्ठन्त्समाहितः ॥

वेदान्तान् विधिवच्छ्रुत्वा सन्न्यसेदनृणो द्विजः ।

यद्वा "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति श्रुतिश्च । तस्मात्क्रमेण वा सन्न्यसेत् । आतुरविधीनाह ।

**End:**

प्रत्यहं तर्पणं तेषां देवतीर्थेन साक्षतम् ।
कुर्याज्जलं केवलं वा महानद्यां यथाक्रमम् ॥
मात्रादीनां चेतरेषां पितृतीर्थेन तर्पणम् ।
विभाज(ण्ड)को नाम बघे वि(ऋषिरि)त्याह भगवान् यथा ॥

**Colophon :**

इति श्रीमत्पूर्णानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दसरस्वतीविरचितयतिपार्वणश्राद्धविधिस्समाप्तः ॥

---

## No. 2944. यतिधर्मः.

## YATIDHARMAḤ.

Substance, palm-leaf. Size, $6\frac{4}{8} \times 1\frac{3}{8}$ inches. Pages, 113. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

This also deals with the life and duties of Hindu ascetics. Complete.

**Beginning :**

उत्तिष्ठ ब्रह्मणस्पते । देवयन्तस्त्वेमहे । उप प्र यन्तु मरुतस्सुदानवः । इन्द्र प्राशूर्भवा सचा । प्रैतु ब्रह्मणस्पतिः । प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसम् । देवा यज्ञं नयन्तु नः ॥

* * * *

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥

* * * *

योगावसाने सात्त्विकत्यागं कृत्वा नमः क्षितिधरायेति मन्त्रमुच्चार्य वराहं ध्यायन् वामपादं भूमौ विन्यस्य.

**End :**

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति मयैव ह्युक्तम् । अतस्तत्त्वतो मद्ज्ञानदर्शनप्राप्तिषु निस्संशयस्सुखमास्स्व—इति दत्तवरः प्रहर्षपरवशहृदयस्सुखमास्त्व ॥

## No. 2945. यतिधर्मः.

## YATIDHARMAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 113*b* of the MS. described under No. 2786.

Incomplete.

Same work as the above.

---

## No. 2946. यतिधर्मः.

## YATIDHARMAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 50*b* of the MS. described under No. 2786.

Similar to the above in subject-matter.

Incomplete.

**Beginning:**

दत्तात्रेयसंहितायाम्—

अथ सन्न्यासिनां धर्मं वक्ष्यामि मुनिसत्तमाः ।
ब्रह्मचारी गृहस्थो वा वनस्थो वा विशेषतः ॥

वैराग्यं प्रतिपन्नश्चेत् मोक्षाश्रममवाप्नुयात् ।
दुर्लभं मानुषं जन्म देहिनां मुनिसत्तमाः ॥

तत्रापि दुर्लभतरं ब्रह्मजन्म कथञ्चन ।
तत्रापि दुर्लभतरं वैराग्यं सर्ववस्तुषु ॥

**End:**

यतिं विना प्रैषमन्त्रं यः श्रुत्वाऽन्यत्र सन्न्यसेत् ।
न गृहस्थो न सन्न्यासी पतत्येव न संशयः ॥

यत्याचारविधौ—

यस्तु सन्न्यासिनं हित्वा गृहस्थात् प्रैषमाश्रयेत् ।
तावुभौ नरकं यातो यावच्चन्द्रदिवाकरम् ॥

इत्यादि । इति यतिकर्तव्यविधौ.

---

No. **2947.** यतिधर्मनिरूपणम्.

YATIDHARMANIRŪPAṆAM.

Pages, 38. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 2631.

Complete.

This consists of Adhyāyas 44 to 56 in Dattātrēyasaṁhitā.

**Beginning :**

दत्तात्रेयः—

यतयश्च द्विधा प्रोक्ता योगिनः पारमेष्ठिकाः ।
तत्रापि कर्मठाः प्रोक्ताः त्रिविधाः पारमेष्ठिकाः ॥
ज्ञानी कर्मी च वेदी च नामतः परिकीर्तिताः ।
योगिनाममृतं स्थानं पुनरावृत्तिवर्जितम् ॥
अन्येषां ब्रह्मणस्स्थान(नं)मुच्यन्ते ब्रह्मणा सह ।
योगिनामेव संस्कारे चूर्णयागः प्रकीर्तितः ॥

* * * *

इति दत्तात्रेयसंहितायामुत्तरभाग(गे)चूर्णयागो नाम चतुश्चत्वारिंशोऽध्यायः ॥

**End :**

आत्मजादिपुनर्नव्यकृत्यं सर्वमशेषतः ।
भवतां श्ृण्वतामद्य सर्वं सम्यक् समीरितम् ॥
किमन्यच्छ्रोतुकामा वः(वा) पृच्छेध्वमृषिसत्तमाः ।

**Colophon:**

इति दत्तात्रेयसंहितायां यत्यादिपुत्रकृत्यनिरूपणं नाम षट्पञ्चाशोऽध्यायः ।

१. चूर्णयाग.
२. संस्कारविधि.
३. यत्यूर्ध्वक्रियाविधि.
४. देशान्तरमृतयतिपुनस्संस्कारविधि.
५. पुनस्संस्कारविधि.
६. यतिपार्वणविधि.
७. यतिपार्वणविधि.
८. पारमेष्ठिकक्रियाविधि.
९. स्वर्गीयतिगतिकर्मविधि.
१०. यतिवर्ज्यकर्मनिरूपण.
११. Do.
१२. Do.
१३. यत्यादिपुत्रकृत्यनिरूपण.

---

## No. 2948. यतिधर्मनिरूपणम्.

## YATIDHARMANIRŪPAṆAM.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 37. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Adhyāyas 44 to 52 in Dattātrēyasaṁhitā.

Same work as the above.

---

## No. 2949. यतिधर्मसमुच्चयः.

## YATIDHARMASAMUCCAYAḤ.

Substance, palm-leaf. Size, 13¼ × 1⅛ inches. Pages, 126. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, new.

A brief exposition of the life and duties of a Vaiṣṇava ascetic: by Yādavaprakāśa.

Breaks off in the 11th Parvan.

**Beginning:**

श्रीमान् जयति लोकानां नायको गरुडध्वजः ।
पाषण्डेभ्यस्त्रयी त्राता येन प्राप्य त्रिलिङ्गताम् ॥
सन्न्यासविषयास्सर्वास्समाहृत्य श्रुतीस्स्मृतीः ।
क्रियते यादवेनायं यतिधर्मसमुच्चयः ॥
विधिः कर्तृदशा लिङ्गं प्रयोगो मुख्यकर्म च ।
अहोरात्रक्रियाचारो लिङ्गधर्मो गतिस्थिती ॥
प्रायश्चित्तानि संस्कारो(र) इत्येकादशपर्वकः ।
यतिधर्मक्रमादत्र धर्मशास्त्रेभ्य उद्धृतम् (:) ॥
तत्र सन्न्यासविधिरस्ति वा न वेति निरूप्यते ।

केचिदाहुः—श्रुतावदृष्टत्वात् यावज्जीवं श्रुतिविरोधे स्मृतीनामप्रामाण्यं नास्त्येव इति । तथा च गौतमः—ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्येति ॥

---

No. **2950.** यतिधर्मसमुच्चयः.

YATIDHARMASAMUCCAYAḤ.

Substance, palm-leaf (Śrītāla). Size, 18½ × 2¼ inches. Pages, 138. Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, new.

Wants beginning, the first two pages having been lost.

Complete otherwise.

**Beginning**—same as in the above.

**End:**

निदध्यात्प्रणवेनैव ध्यानभिक्षो(:)कलेश्व(ब)रम् ।
प्रोक्षणं खननं चैव सर्वं तेनैव कारयेत् ॥

एतमेव भ(ग)वान् वृद्धयाज्ञवल्क्यः ।

**Colophon :**

इति यादवप्रकाशक(कृते) यतिधर्मसमुच्चये यतिसंस्कारविधिर्नाम एकादशं पर्व ॥

दहनपक्षः—

पुत्रोऽन्यो वा गृहस्थस्स्नात्वाचम्य नवघटे पञ्च रत्नानि प्रक्षिप्य प्रणवेन तीर्थोदकमुपरि नारायणपर(रं)ब्रह्मेत्यादिना अभिमन्त्र्य

* * * *

भूमिर्भूम्नेति मूर्धानं भित्वा गायत्र्या अभिमृश्य लवणेप(ना)च्छाद्य प्रणवेन देवयजनं पूरयेत् स्रगा[ला]दिर्नध्या(भिराराध)येत् पुनः पुनः ॥

इति यतिधर्मसमुच्चयं(यः) संपूर्णम्(ः) ॥

१. पारिव्रज्यविधि.
२. पारिव्रज्याधिकारिदशानिरूपण.
३. लिङ्गनिरूपण.
४. सन्न्यासप्रयोग.
५. मुख्यविधि.
६. अहोरात्रक्रिया.
७. आचार.
८. प्रायश्चित्तविधि.
९. गतिस्थितिनिरूपण.
१०. प्रायश्चित्तविधि.
११. यतिसंस्कारविधि.

---

## No. 2951. यतिधर्मसमुच्चयः.

## YATIDHARMASAMUCCAYAḤ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 57. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are, Nārāyaṇabaliprayōga (Bōdhāyana) 30*a*, Yatipārvaṇaśrāddha 27*b*.

Parvas 1 to 9 complete; 10th incomplete.

Seven pages at the end contain certain stanzas from the Śrī-Bhāgavata relating to the conduct and duties of an ascetic.

Same work as the above.

## No. 2952. यतिधर्मसमुच्चयः.

## YATIDHARMASAMUCCAYAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 2786.

Incomplete.

Same work as the above.

---

## No. 2953. यतिधर्मसमुच्चयः.

## YATIDHARMASAMUCCAYAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No. 2786.

11th Parva, complete.

Same work as the above.

---

## No. 2954. यतिधर्मसमुच्चयः.

## YATIDHARMASAMUCCAYAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 5*a* of the MS. described under No. 2749.

Contains the 11th Parva.

Same work as the above.

---

## No. 2955. यतिपत्नीधर्मनिरूपणम्.

## YATIPATNĪDHARMANIRŪPAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2787.

Complete.

Describes the conduct and duties to be adopted by the wife of one who has become a Yati. Forms a portion of Viśveśvarasmṛtisārasaṅgraha by Puruṣōttamānandasarasvatī, a pupil of Pūrṇānandapūjyapāda.

**Beginning :**

द्वे रूपे वासुदेवस्य चरं चाचरमेव च ।
चरं सन्न्यासिनां रूपमचरं प्रतिमादिकम् ॥

अथ यतिपत्नीधर्माः—

यतेर्नारायणस्यैव पत्नी लक्ष्मीसमोत्तमा ।
सपुत्रा शयनं भर्तुः पालयन्ती वने(पथि) स्थिता ॥

**End :**

सपुत्रा शयनं भर्तुरित्यत्र भर्तुश्शयनं स्वशरीरमित्यर्थः ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यातिश्रेष्ठापरोक्षसाक्षात्कारब्रह्मीभूतश्रीमत्पूर्णानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दसरस्वतीविरचितविश्वेश्वरस्मृतिसारसङ्ग्रहे यतिपत्नीधर्मादिनिरूपणं संपूर्णम् ॥

---

## No. 2956. यतिलिङ्गसमर्थनम्.

## YATILIṄGASAMARTHANAM.

Pages, 13. Lines, 9 on a page.

Regarding the distinctive features of Yatis.

Begins on fol. 1*a* of the MS. described under No. 2786.

Skandhas 3. Deals with and defines the various characteristics of Hindu ascetics.

Complete.

**Beginning :**

गुरवे वरदार्याय कुर्वीमहि नमस्क्रियाम् ।
यत्पदाम्भोजसेवा नः सूते वेदान्तसंपदम् ॥

इह खलु कुटीचकबहूदकहंसपरमहंसानां चतुर्णां चरमाश्रमिणामुपवीतत्र(त्रि)दण्डशिखादिलिङ्गं साधारणम् । वृत्तिभेदस्तु तेषां भेदक इति निर्णीयते । तथाहि—शाठ्यायनोपनिषदि श्रूयते—

अथाह ब्रह्म परमं सनातनं ये श्रोत्रिया अकामहता अधीयुः ।

**End :**

वेदार्थं चान्यथा सर्वं प्रवक्ष्यन्ति कलौ युगे ।
नग्नाः प्रच्छन्नबौद्धाश्च विनिन्दन्ति त्रयीमयम् ॥
भिक्षयिष्यन्ति शूद्रान्नं वयं मुक्ता इतिब्रुवन्(वाः) ।
अन्यानपि स्वधर्मस्थान् चालयिष्यन्ति ते कलौ ॥
एवं वेषं समाश्रित्य जीवन्ति वहवो द्विजाः ।
नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते ॥
तस्मात्तान्ना(त्तैर्ना)लपेत् प्राज्ञः न निरीक्षेत वापि तान् ।
आलोकनेन तेषान्तु शुध्यते भानुदर्शनात् ॥
नग्नं वानुपवीतं वा यः श्राद्धे भोजयेद्द्विजम् ।
रेतोमूत्रपुरीषाणि स पितृभ्यः प्रयच्छति ॥

**Colophon :**

इति यतिलिङ्गसमर्थने तृतीयस्कन्धः ॥

---

No. **2957.** यतिवपनाविधिः.

YATIVAPANAVIDHIḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 108*a* of the MS. described under No. 1740.

Incomplete.

Describes the manner in which Vaiṣṇava Yatis should get shaved.

**Beginning :**

शौनकः—

यतिस्तदा शिखावर्जमृतुसान्धिषु वापयेत् ।
ऊर्ध्वं सितचतुर्दश्या या तिथिस्सा तिथिर्भवेत् ॥
ऋतुसान्धिरिति प्रोक्ता वपनं तत्र कारयेत् ।

**End:**

मेधातिथिः—

कक्षोपस्थशिखावर्जमृतुसन्धिषु वापयेत् ।
तत्र मुण्डमतिक्रामेत् भिक्षुस्संवत्सरे क्वचित् ॥
वपनानन्तरं स्नात्वा मृद्भिर्द्वादशभिर्यतिः ।

---

No. **2958.** यतिविषयवचनानि.
YATIVIṢAYAVACANĀNI.

Pages, 15. Lines, 5 on a page.

Begins on fol. 117*a* of the MS. described under No. 2786.

Extracts relating to ascetic life from various Smṛtis.

Incomplete.

**Beginning:**

यमः—

सर्वसङ्गनिवृत्तस्य ज्ञानयोगरतस्य च ।
नैतस्य दहनं कार्यं नाशौचं नैव च क्रिया ॥
शुचौ देशेऽथ गायत्र्या देहं प्रक्षाल्य वारिणा ।
मधुना सर्पिषा वाज्यैः प्रक्षाल्य च सुगन्धिभिः ॥

**End:**

आह कपिलः—

सुजीर्णोऽथ कृशो रोगी प्रशान्तो विकलेन्द्रियः ।
शिष्यबन्धुसुतभ्रातृस्वसृभ्यो भैक्षमाचरेत् ॥

तथा सारपद्धतौ—

नैकान्नं भिक्षुरश्नीयात् सदा . . . .

## No. 2959. रजस्वलास्नानविधिः.

## RAJASVALĀSNĀNAVIDHIḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 121*a* of the MS. described under No. 587.

This is Bōdhāyanōktam.

**Beginning:**

ज्वराधि(भि)भूता या नारी रजसावपरिप्लुता ।
कथं तस्या भवेच्छुद्धिः शौचं स्यात् केन कर्मणा ॥
चतुर्थेऽहनि संप्राप्ते स्पृशेदन्यस्तु तां स्त्रियम् ।
स सचेलोऽवगाह्यापः स्पृष्ट्वा स्नायात् पुनःपुनः ॥
दश द्वादश वा कृत्वा ह्याचामेच्च पुनःपुनः ।
अन्ते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥
ब्राह्मणान् भोजयेत् पश्चात् आशीर्वचनपूर्वकम् ।

स्मृत्यन्तरे—

व्याधितानां रजोदोषदूषितानां तथैव च ॥

**End:**

रजस्वलाया मध्ये मध्ये वस्त्रत्यागः ; स्नातपुरुषस्यान्ते वस्त्रत्यागः । तदनन्तरं पुण्याहोदकेन सुरास्त्वामभिषिश्चन्त्विवति पुराणमन्त्रैरन्ते तां मार्जयेत्; स्नातपुरुषश्च मार्जयेत् । अनन्तरं ब्राह्मणान् पूजयेत् । ततः शुद्धा भवतीत्याह भगवान् बोधायनः ॥

---

## No. 2960. रजस्वलास्नानविधिः.

## RAJASVALĀSNĀNAVIDHIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 96*a* of the MS. described under No. 2888. Complete.

Same work as the above.

## No. 2961. रजस्वलास्नानविधिः.

## RAJASVALĀSNĀNAVIDHIḤ.

Substance, paper. Size, 12⅛ × 7½ inches. Pages, 3. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Begins on fol. 47*b*. The other works herein are :—Rudrayāmalam (Paṭalas 32) 1*a*, Umāmahēśvararaśmimālā 40*a*, Kālikākavacaḥ 41*a*, Rajasvalāstōtram 45*a*, Bhairavayāmalam 49*a*, Prayōgaratnāvaliḥ 61*b*, Ucchiṣṭagaṇapatidhyāna 81*a*, Pratyaṅgirākalpaḥ 84*a*, Pratyaṅgirāvyākhyā 124*a*, Śuddhaśaktimālā 134*a*, Nṛsimhastavarājaḥ 146*a*, Nṛsimhāyutākṣarī 152*a*, Nṛsimhasahasranāmāni 166*a*, Nṛsimhāṣṭōttaraśatam 179*b*.

Same work as the above.

---

## No. 2962. राजाभिषेकविधिः.

## RĀJĀBHIṢĒKAVIDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 2439.

Complete.

Treats of the ceremonies connected with the coronation of kings.

**Beginning :**

अथातस्सम्प्रवक्ष्यामि नृपतेरभिषेचनम् ।
राजयोगे समुत्पन्नं धर्मज्ञं सत्यवादिनम् ॥

कुलजं बुद्धिसम्पन्नं त्यागशौर्य(गु)णान्वितम् ।
अजि(आजी)नमस्त्रशस्त्रज्ञं विनीतं विजितेन्द्रियम् ॥

देवब्राह्मणभक्तं च वाहनेषु कृतश्रमम् ।
सर्वलक्षणसम्पन्नं मन्त्रिवृद्धैश्च संमितम् ॥

एवं सर्वगुणोपेतं कुमारमभिषेचयेत् ।
शुक्लपक्षे तु पूर्वाह्णे दिवसे दोषवर्जिते ॥

**End:**

आचार्याय सवत्सां गां कन्यां पूजां समाहितः ।
आचार्यऋत्विक्पूजां च दानानि च विशेषतः ॥
दश(दानानि)कुर्वीत भूरिदानं समाचरेत् ।
एवं यत्(:) कुरुते भक्त्या सुरराजसमो भवेत् ॥

**Colophon:**

इति गार्ग्योक्तप्रकारेण राजाभिषेकं(कः) सम्पूर्णम्(:) ॥

---

No. **2963.** वचनसारसङ्ग्रहः.

VACANASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 150. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Incomplete.

A work on Ācāra by Śriśailatātadāsa, son of Sundarārya.

**Beginning:**

श्रीशैलतातदासेन सुन्दरार्यतनूभुवा ।
स ह्यन्तेऽधुना सारवचनानि प्रमाणतः ॥
स्मृतिभ्यश्च पुराणेभ्यस्सङ्गृहीतेभ्य एव च ।
पञ्चकालप्रक्रियायाश्चोपयुक्तानि नित्यशः ॥

तत्रादौ याज्ञवल्क्यः —

ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।

इत्यात्मचिन्तनं विधातव्यम् ।

गर्गः —

नाडिकाषट्कपञ्चाशत्प्रातस्त्वेकाधिकोऽरुणः ।
उषःकालोऽष्टपञ्चाशत् शेषस्सूर्योदयः स्मृतः ॥

**End:**

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥
ऋतुस्नातां तु यो भार्यां स्वस्थस्सन्नोपगच्छति ।

घोरायामित्यादि । स्वस्थस्समर्थस्सन्यदि नोपेयात् तदा दोषः । अजातपुत्रस्यैवानृ(यमृ)तुगमननियम इति मदनपारिजातक्रमः ॥

---

## No. 2964. वर्ज्याहारविवेकः.

## VARJYĀHĀRAVIVĒKAḤ.

Substance, palm-leaf. Size, $11\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 8. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 47*a*. The other works herein are: Śrīguṇaratnakōśaḥ 1*a*, Śrīraṅgarājastavaḥ 13*a*, Paramaikāntibhagavadārādhanakramaḥ 27*a*, Mahānadīstōtra 51*a*, Sāḷagrāmalakṣaṇam 54*a*.

Treats of the kinds of food that ought to be avoided.

Complete.

**Beginning:**

अद्वारादागतान्नं वरकविरचितं यावमा(ना)ळान्नद(म)न्नं
काष्ण्यं वक्त्रच्युतान्नं मुखगतकबळार्धान्नमाकारदुष्टम् ।
दृक्दु(ग्दु)ष्टा(ष्टं)भिस्सटान्नं क्षुतवस(म)नयुतं निन्दितान्नं च स(।)ङ्घं
नाश्नीयादारनाळं खरशुनकमुखैस्स्पृष्टमालोकितं च ॥ १ ॥

**End:**

पेयं पर्युषितान्नतोयमथ वा गाङ्गं च (न)मृत्स्नायुतं
पादक्षाळनशेषि(ष)तोयमपि यत्पीतावशेषं परैः ।

तोयं पल्वलकायदा(मा)नपदवीसिद्धं च वर्षोद्भवं
किञ्चास्पृष्टमहीतलं जलमिदं गङ्गासमं सातपम् ॥ १५ ॥

**Colophon :**

आहारनियमश्लोकं(कः) सम्पूर्णम्(ः) ॥

---

## No. 2965. वर्ज्याहारविवेकः.
## VARJYĀHĀRAVIVĒKAḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 29*a*. The other works herein are :—

Aṣṭaślōkīvyākhyā 1*a*, Nyāsaviṁśatiḥ 31*a*, Nyāsaviṁśativyākhyā 33*a*, Dṛṣṭārthaprapattiḥ 43*a*, Upāyānuṣṭhānaprakāraḥ 47*a*, Kṣamāṣōḍaśīstavaḥ 48*a*, Sālagrāmalakṣaṇam 50*a*, Viṣṇusūktam 51*a*, Mahālakṣmīmantraḥ 51*b*, Ramāṣṭōttaraśatanāmāvaliḥ 51*b*, Mantrārthōpadēśaḥ 54*a*.

Written by Vēdāntadēśika.

Complete.

**Beginning** and **End** same as above.

**Colophon :**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतौ वर्ज्याहारविवेकस्संपूर्णः ॥

---

## No. 2966. वर्णाश्रमधर्मः.
## VARṆĀŚRAMADHARMAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 90*a* of the MS. described under No. 217.

Incomplete.

Deals with the duties appertaining to the four castes, namely, Brāhmaṇa, Kṣattriya, Vaiśya and Śūdra, as also to the four stages of life, namely, Brahmacarya, Gārhasthya, Vānaprastha and Sannyāsa.

eginning :

अथातश्शुक्लकीलसंहिताब्रह्मविद्यायां वर्णाश्रमधर्माः—

ब्रह्मक्षत्रियशूद्रा उत्तमा वैश्या मध्यमा इतरा(रे) अधमा लोकेशस्याङ्गेषूत्पन्नाश्चत्वारो वर्णा(स्त)दितरा(रे) विलोमानुलोमसाङ्कर्याः । कलौ वैश्यादुत्तरोत्तरं सङ्करं भवत्यादिवैश्यस्य निधनात्कुत उच्यत इति.

End :

महिषं कृत्वा प्राग्यथाचरेन्नाचरेत्कुलक्षयम् । प्रपञ्चे त्करम(सङ्करोऽ)स्ति प्रपञ्चे वैश्यवर्णो नास्तीति य एवं वेद ॥

---

## No. 2967. विभूतिधारणविधिः.

## VIBHŪTIDHĀRAṆAVIDHIḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 5*a* of the MS. described under No. 854.

On the process of putting on the sacred ashes.

**Beginning :**

अथातो(त)स्त्रिपुण्ड्रविधिं व्याख्यास्यामो भूत्यै न प्रमदितव्यमिति विज्ञायते । अथाप्युदाहरन्ति—

मध्यमानामिकाङ्गुष्ठैर्यत्पुण्ड्रं भस्मना कृतम् ।
तत्त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम् ॥

**End :**

स्रष्टा स्पष्टच्छ(श्च)तेनाह त्रिपुण्ड्रस्य प्रशस्तताम् ।
. . . . ललाटे हि तिर्यगूर्ध्वश्च वर्तुलम् ॥
भूत्यै न प्रमदितव्यमित्येतत्तैत्तिरीयोपनिषद्वचः ।
. . . प्र(माणीकृत्य सर्वै)र्धार्यं भस्मेति चाहुः ॥

## No. 2968. विवाहपीठादिलक्षणम्.

## VIVĀHAPĪṬHĀDILAKṢAṆAM.

Substance, palm-leaf. Size, 15½ × 1⅛ inches. Pages, 31. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 16*a*. The other works herein are: Tithyādinirṇaya 1*a*, Śrāddhōpayuktavacanāni 32*a*.

Incomplete.

Regarding the construction of platforms, &c., on the occassion of marriage ceremonies.

**Beginning:**

षट्सु प्रादेशमात्रं स्यात् द्विपञ्चाङ्गुलमात्रकम् ।
आर्द्रक्षीरसमायुक्तमित्येते(तत्) पीठलक्षणम् ॥

वेदिकालक्षणम्—

हस्तोन्नतं(ता) हस्तचतुष्टयेन विस्तीर्णतामण्डितवामभागे(गा) ।
सुमण्टपस्तम्भचतुष्टयेन सोपानरम्यं(म्या) तु विवाहवेदि(:) ॥

**End:**

अपहृत्य परस्यार्थं यः परेभ्यः प्रयच्छति ।
दातारो नरकं यान्ति यस्यार्थस्तस्य तत्फलम् ॥
ज्ञानहीनस्समर्थोऽपि वेदशास्त्रसमन्वितः ।
चण्डालतोयभाण्डानां गङ्गाजलमशुध्यति ॥

---

## No. 2969. विवाहयोग्यस्त्रीनिर्णयः.

## VIVĀHAYŌGYASTRĪNIRṆAYAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 25. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 11*a*. The other work herein is, Abhinavaṣaḍaśīti (with Dharmapradīpikā) 1*a*.

Wants beginning.

Regarding the rules for the selection of suitable brides.

**Beginning:**

चतुर्थीमित्यादिना सङ्ख्यावाचिना पदेन स्त्रीपुरुषात्मकः कश्चित्कूटस्थो लक्ष्यते । तथा च तस्मादारभ्य चतुर्थः पुरुषः पितृबन्धुवर्गे मातृबन्धुवर्गे चोत्पन्नः कूटस्थमारभ्य तत्पुत्रादिगणनायां चतुर्थपुरुषः । चातुर्थीं वधूं कन्यामुद्वहेत् ।

**End:**

पक्षद्वये पिण्डगोत्रनिवृत्तावप्यवयवसापिण्ड्यनिवृत्तेरभावात् । एवं बन्धुवर्गत्रितये सर्वत्र सापिण्ड्यगोत्रानिवृत्त्यनुवृत्तिभ्यां विवाहनिषेधौ द्रष्टव्यावित्यतिविस्तरेणालम् ॥

---

## No. 2970. विवाहविधिः.

## VIVĀHAVIDHIḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 52*a* of the MS. described under No. 211.

Treats of the rules relating to marriage.

**Beginning:**

मार्कण्डेयः—

कन्यां सरूपिणीं विप्रो भूषणैर्भूषितां सतीम् ।
चोरबुद्ध्या हरेत्क्वापि नरकं याति दारुणम् ॥
तदन्ते भुवमासाद्य भिल्लरूपेन(ण) जायते ।

गालवः—

विप्रो यः कन्यकारत्नं स(र्वाभरण)भूषितम् ।
विप्रजं बाहुजाज्जातं पादजाज्जं विशेषतः ॥

* * * *

देवलः—

ब्राह्मो दैवस्तथा चार्षः प्राजा(पत्य)स्तथासुरः ।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः ॥

लिङ्गपुराणे सूतः—

ब्राह्मे विवाहे राजा(जे)न्द्र बन्धुशीलश्रुतं तथा ।
आरोग्यं सम्यगालोच्य परीक्ष्ये(क्षे)त वरं मुदा ॥

**End:**

अविधिना कृतमकृतमिति ।
कुलमग्रे परीक्षेत ये मातृतः पितृतश्चेति आश्वलायनोक्तत्वात् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।

* * * *

अन्यैर्दत्ता चेद्विना दातुराज्ञामज्ञानाद्वा बन्धनाद्वा बलाद्वा ।
देयान्यस्मै कन्यका नो निषिद्धा साङ्गोद्वाहे सत्यपि प्राह(गार्ग्यः) ॥

---

## No. 2671. वृषोत्सर्जनम्.

## VṚṢŌTSARJANAM.

Pages, 5. Lines, 15 on a page.

Begins on fol. 198*a* of the MS. described under No. 1197.

Regarding the ceremony of setting bulls at large on the occasion of bathing in holy waters.

Complete.

**Beginning:**

पाषाणदानं प्रथमं च कुर्यात्
आवाहनं तत्र नमस्क्रियाश्च ।
अर्घ्यं तथा प्रार्थनमभ्यनुज्ञां
स्नानं च कुर्यादथ तर्पणं च ॥
पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरि ।
पाषाणं ते मया दत्तमाहारार्थं प्रकल्पितम् ॥

विश्वाची च घृताची च विश्वयोने ह्यपां पते ।
सान्निध्यं कुरु मे देव सागरे लवणाम्भसि ॥

* * * *

अतिक्रूर महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥
देवालये स्वगृहे पुण्यक्षेत्रे वा वृषोत्सर्जनं कुर्यात् ।

**End:**

इत्येवं कर्ता पूतं(तो) निर्धूतापमृत्युर्दीर्घायुर्भवतीत्याह भगवान् बोधायनः ॥

---

## No. 2972. वैश्वदेवविधिः.
## VAIŚVADĒVAVIDHIḤ.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 10. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, new.

Treats of the daily offerings to be made to the Viśvē-Dēvas.

Begins on fol. 1*a*. The other works herein are, Malamāsa viṣaya 1*b*, Tarpaṇaviṣaya 3*a*, Śivaikyadīkṣā 6*a*, Mahimnastavaḥ 9*a*.

Complete.

**Beginning:**

सदोपवीतिना कार्यं सदा बद्धशिखेन च ।
विशिखो नोपवीतश्च यत् करोति न तत् फलम् ॥
अनाहिताग्निर्यो दर्शे श्राद्धं कृत्वा विधानतः ।
पितृशेषेण वै कुर्यात् वैश्वदेवं द्विजोत्तमः ॥
प्रत्यब्दे मासिके चैव श्राद्धं कृत्वा विधानतः ।
तच्छेषेणैव कुर्वीत वैश्वदेवं द्विजोत्तमः ॥

**End:**

वैश्वदेवविहीनस्तु बलिदानविवर्जितः ।
इतस्ततस्तु यो भुङ्क्ते स विप्रो यतिरुच्यते ॥

---

## No. 2973. वैश्वदेवविधिः.

## VAIŚVADĒVAVIDHIḤ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 2. Lines, 4 on a page. Character, Telugu. Condition, slightly injured Appearance, old.

Complete.

Begins on fol. 98*a*.

The other works herein are:—



| | Fol. |
|---|---|
| Bālagraharōgacikitsā-vidhiḥ .. .. | 1*a* |
| Hōmakuṇḍavidhiḥ .. | 7*a* |
| Kākasparśaśāntiḥ .. | ,, |
| Pitṛnakṣatrakumāra-jananaśāntiḥ .. | 8*b* |
| Sōmasūryōparāga-nakṣatraśāntiḥ .. | 9*b* |
| Mēkhalājinadaṇḍa-nāśaprāyaścittavidhiḥ | 13*a* |
| Śrāddhatarpaṇa-viṣayaḥ .. .. | 17*a* |
| Daśāhamadhyasamāpti-nirṇayaḥ .. .. | 17*b* |
| Strīpuṁnakṣatra-lakṣaṇam .. .. | 18*a* |
| Goulīkṣutaphalam .. | 18*b* |
| Nāmanakṣatra-śōdhanam .. .. | 19*a* |
| Viṣṇupratiṣṭhā .. | 21*a* |
| Nāgapratiṣṭhā .. .. | 25*a* |
| Aśvatthapratiṣṭhā .. | 27*b* |
| Samudrasnāna-māhātmyam .. | 82*b* |
| Anvārōhaṇavidhiḥ .. | 34*a* |
| Saraṭapatanaśāntiḥ .. | 45*a* |
| Gaulīpatanaphalam .. | 47*b* |
| Prathamarajasvalā-śāntiḥ .. .. | 48*b* |
| Viṣadōṣaśāntiḥ .. .. | 66*a* |
| Sūtakaviṣayaḥ .. .. | 67*a* |
| Garbhiṇīsaṁskāraḥ .. | 75*b* |
| Aparaviṣayavacanāni | 29*b* & 76*b* |
| Dēśāntaramṛtasya-kartavyavidhiḥ .. | 80*b* |
| Aputrakavidhiḥ .. .. | 82*b* |
| Vapanavidhiḥ .. .. | 83*a* |
| Śrādhavamanōcchiṣṭa-saṁsargaprāyaścitta-vidhiḥ .. .. | 86*a* |

| | Fol. |
|---|---|
| Ēkōddiṣṭavacanāni .. | 93*a* |
| Agnisaṁsargaprāyaś-cittam .. .. .. | 93*b* |
| Nāgapratiṣṭhāvidhiḥ .. | 94*b* |
| Vaiśvadēvavidhiḥ .. | 98*a* |
| Nālaveṣṭanaśāntiḥ .. | 99*a* |
| Prasūtagaṇḍadōṣa-śāntikalpaḥ . .. | 102*a* |
| Abhuktanakṣatra-śāntiḥ .. .. | 104*a* |
| Viṣanāḍījananaśāntiḥ .. | 107*b* |
| Suptanipātaśāntiḥ .. | 111*a* |
| Sarvarōgaśāntiḥ .. | 112*a* |
| Saṅkramaṇajanma-nakṣatraśāntiḥ .. | 112*a* |
| Udakaśāntiḥ .. .. | 113*b* |
| Āślēṣājananaśāntiḥ .. | 115*b* |
| Mūlānakṣatraśāntiḥ .. | 117*a* |
| Pañcamāriṣṭaśāntiḥ .. | 123*a* |
| Ēkamāsādijananaśāntiḥ | 124*a* |
| Trividhāntarālajanana-śāntiḥ .. .. | 125*a* |
| Dagdhayōgādi-rajasvalāśāntiḥ .. | 126*b* |
| Kuhūśāntiḥ .. .. | 128*b* |
| Dussvapnaśantiḥ .. | 132*a* |
| Parjanyaśāntiḥ .. | 132*a* |
| Jvaracakram .. .. | 135*a* |
| Pīnasarōgaśāntiḥ .. | 135*b* |
| Bālagrahacikitsā .. | 136*a* |
| Gayāṣōḍaśī .. .. | 138 |

**Beginning :**

अथ वैश्वदेवमुच्यते । तत्र विशेषकालानाह—
वृद्धावादौ क्षये चान्ते दर्शे मध्ये महालये ।
आचा(अर्चा)न्तेष्वपि कुर्वीत वैश्वदेवं चतुर्विधम् ॥ इति ॥
श्वानौ हि श्यान(म)शबलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां बलिं प्रदास्यामि रक्षेतां पथि सर्वदा ॥
ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋति(ता)स्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ दत्तं मया बलिम् ॥

**End :**

पञ्चस्थानेषु सूनाश्च पञ्चयज्ञैर्व्यपोहयेत् ॥
द्वावेकं द्वे च चत्वारि प्रत्येकं त्रिभिरेव च ।
पृथिव्यादिदशैकन्तु अत ऊर्ध्वं पृथक् पृथक् ॥

**Colophon :**

इति वैश्वदेवविधिः ॥

## No. 2974. वैष्णवप्रक्रियासङ्ग्रहः.

## VAIṢṆAVAPRAKRIYĀSAṄGRAHAḤ.

Substance, palm-leaf. Size, 7⅛ × 1⅝ inches. Pages, 2. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 5*a*. The other work herein is, Sannyāsisāpiṇḍyavidhi 1*a*.

Deals with certain Vaiṣṇava doctrines. Complete.

**Beginning :**

श्रीमन्नाथमुनिं श्रीमद्यामुनार्यं यतीश्वरम्।
नत्वा सङ्ग्रहतो वक्ष्ये वैष्णवप्रक्रियामहम् ॥
गृह्यादौ धर्मशास्त्रे यदुदितमभवत्तत्प्रपन्नैश्च कार्यं
नित्यं नैमित्तिकं वाप्यगतिकमधिकारानुरूपं ह्यनन्यैः ।
साक्षादित्याख्यजैमिन्यभिधमुनिगिराग्नीन्द्रसामान्यनाम्नां
कृत्वा साक्षात्परत्वं भगवत इति हि प्रक्रिया वैष्णवी स्यात् ॥

**End :**

सूत्रत्यागो न दोषस्स्मृत इति निगमान्तार्यसद्दिव्यसूक्त्या
वैरुध्यात्स्वाधिकारादनितरशरणैर्वैष्णवैर्वीतरागैः ।
अर्थोऽयं श्रीशपादप्रपदनमहितश्रभिरद्वाजक्लृप्त-
स्वीयायां संहितायां जयति हि नितरामेष घण्टापथस्स्यात् ॥

**Colophon :**

श्लोकत्रयेण संक्षिप्ता वैष्णवप्रक्रिया मया ।
श्रीपाश्चरात्ररक्षादिदेशिकोक्त्यनुसारिणी ॥

---

## No 2975. वैष्णवाचारपद्धतिः.

## VAIṢṆAVĀCĀRAPADDHATIḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 28. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Treats of certain rites and observances of the Vaiṣṇavas.

Contains the 8th Caraṇa—Strīdharma or the duties of women.

Wants beginning.

**Beginning :**

. . . . . च वर्जयेत्सर्वकर्मसु ।
मधूकं कुटजं ब्रांह्यां(ब्राह्मचां) जम्बूप्लक्षावुदुम्बरम् ॥
मातुलुङ्गं पानसञ्च मौचं चर्मदलानि च ॥
आढक्यपर्णं श्रीपर्णं पुन्नागं भाजने शुभम् ॥

**End :**

बालवृद्धान् भोजयित्वा भर्तारं भोजयेत्ततः ॥
स्वयं हृष्टा ततोऽश्नीयाद्भर्तुर्भुक्तावशेषितम् ।
यथोत्पन्नेन द्रव्येण सन्तुष्टा विगतज्वरा ॥
परमापद्गता चापि भर्तारं न निषेधयेत् ;
भिक्षां च भिक्षवे दद्यात् अलोभपरुषाक्षरा ॥
आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ।
अतिप्रतातथा (मृते म्रियेन या)पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥
एवं या नियताचारा भवेद्भागवती सती ।
तस्याः प्रसीदति हरिः भगवान् रमया सह ॥
श्रीव(त्साङ्कः)सदाचारपद्धत्या कमलापतिः ।
श्रीरामानुजहृत्पद्मशरणो मे प्रसीदतु ॥

**Colophon :**

इति श्रीवैष्णवाचारपद्धतौ स्त्रीधर्मप्रतिपादकमष्टमं चरणम् ॥

श्रीमन्नि(लि)म्पकीर्त्यश्रीवैष्णवाचारपद्धतौ ।
अष्टमेन नृहर्यक्षप्रणीतचरणेन च ॥
अत्र मे साहसं सोढुमर्हन्ति सुधियो जनाः ।
निरुपाधिकृपावासलक्ष्मणार्याङ्घ्रिसेवकाः ॥

## No. 2976. शूद्राचारः.

## ŚŪDRĀCĀRAH.

Substance, palm-leaf. Size, 11½ × 1 inches. Pages, 70. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Piṣṭapaśuvidhānam 36*a*.

Treats of the prescribed conduct and duties of Śūdras.

Complete.

**Beginning:**

स्कान्दे सूतसंहितायां द्वादशेऽध्याये—

वक्ष्ये लोकोपकाराय जाति(नि)र्णयमादरात् ।
अगस्त्योऽपि पुराप्टच्छत्प्रणम्य वृषवाहनम् ॥
पुरा सर्वमुनिश्रेष्ठाः प्रलये विलयङ्गते ।
अन्धकारावृते लोके विष्णोरंशो महाद्युतिः ॥
सहस्रशीर्षा पुरुषः स्थितो नारायणाभिधः ।
क्षीराब्धौ चिन्तयन् रुद्रं सुष्वाप ब्रह्मवित्तमाः ॥
कदाचित्पङ्कजं विप्राः तरुणादित्यसन्निभम् ।
तस्य सुप्तस्य देवस्य नाभ्यां जातं महत्तरम् ॥
हिरण्यगर्भो भगवान् ब्रह्मा विश्वजगत्पतिः ।
आस्थाय परमां मूर्तिं तस्मिन् पद्मे समुद्बभौ ॥
तस्य वेदविदां श्रेष्ठाः ब्रह्मणः परमेष्ठिनः ।
महादेवाज्ञया पूर्ववासनासहितान्मुखात् ॥
ब्रह्मणो ब्राह्मणाः स्त्रीभिस्सह जातास्तपोधनाः ।
तस्य हस्तात् सह स्त्रीभिः जज्ञिरे पृथिवीभुजः ॥

* * * *

लक्षणं शृणु सामान्यशूद्रस्य भुजगाधिप ।
विवाहमात्रसंस्कारी द्विजशुश्रूषणं विना ॥

स्वार्जितैर्धनधान्याद्यैस्स्वतन्त्रो जीवति स्वयम् ।
स्वसमानाधिकारिभ्यो देहसम्बन्धमात्मनः ॥

संप्राप्य वैष्णवो भूत्वा चक्राङ्कनपरोऽपि सन् ।

**End:**

वर्तिष्यन्ते कलौ ब्रह्मन् तन्मतेन द्विजातयः ।
स्त्रियः प्रत्यूषणं पत्युः विप्राणां शूद्रजातयः ॥

पित्रोः पुत्राः परित्यज्य जपहोमादिसाधनम् ।
कुर्वन्ते(ते)काम्यकर्माणि इच्छया निपतन्त्यधः ॥

लौकिकैर्नामभिर्गीतैः देवताराधनन्तु यत् ।
शूद्रादीनामयं धर्मो न द्विजानां कदाचन ॥

गायन्ति कृतकैर्गीतैः अवघ्नापशुतीरिति ? ।
गायन्ति विविधां गीतिं श्रोतृ(तॄ)णामपि पापदाम् ॥

इत्यादि ॥

---

No. **2977.** षट्कर्मचन्द्रिका.

ṢAṬKARMACANDRIKĀ.

**Pages, 190. Lines, 8 on a page.**

Begins on fol. 3*a* of the MS. described under No. 2888.

Complete.

A work on the six prescribed duties of a Brahmin
By Timmayajva of the Cerukūri family.

**Beginning:**

रामं नमामि विश्वेशं व्याख्यामुद्रालसत्करम् ।
वसिष्ठवामदेवादिमुनिभिः परिसेवितम् ॥

*　　*　　*　　*

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तये प्रचयगमनाय सीतालक्ष्मण-हनूमद्भरतशत्रुघ्नसहितस्येष्टदेवस्य रामचन्द्रस्य नमस्कारलक्षणं मङ्गला-चरण(णं)कृतम्; ग्रन्थादौ तदवश्यं कर्तव्यम्; शिष्टाचारपरम्पराप्राप्तत्वा-न्मनुविहितत्वाच्च । तदाह मनुः—

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥ इति ॥

विनिपातः आरब्धकर्मन्न(न्यू)नतेत्ययुक्ता(ताप्रयुक्तः) । मनुनापि स्वकृतशास्त्रादाविष्टदेवस्य श्रीकृष्णदेवनमस्कारलक्षणस्य मङ्गलस्याचरित-त्वाच्च । मनुः—

नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्यामि शाश्वतान् ॥

**End:**

ज्ञात्वा ज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ।
विदुह(ष): कर्मसिद्धिस्स्यात् तदा नाविदुषो भवेत् ॥

इति मीमांसायां विद्वद्वाक्यविचारे उक्तः । ज्ञानं कर्माङ्गम्; अज्ञात्वा कर्मकरणे तस्य कर्मापूर्व(र्वा)सिद्धिरिति सैव प्रत्यवायः । इति ॥

**Colophon:**

इति श्रीमदान्ध्रदेशे कृष्णवेणीमहानदीतीरे कोण्डपल्लिसीम्नि मेदूरि-स्थले कपिलेश्वरनामकाग्रहारेऽग्रभागप्रतिग्रहितॄणामृग्वेदिनां सकलशास्त्र-व्याख्यातॄणाम् अग्निष्टोमविश्वजित्सर्वपृष्ठातिरात्राद्यनेकक्रतुयाजिनां का-

श्यपगोत्राणां चरुकूरितिरुमलसोमयाजिनां पौत्रैर्लक्ष्मणभट्टोपाध्यायानां पुत्रै राजमहेन्द्रदेशे कोनसीम्नि गोदावरीतीरे मुक्तेश्वरक्षेत्रे कृताग्निष्टोमैः कोण्डवीटिसीम्नि कृष्णातीरे कोल्लिकोण्डनामकाग्रहारे द्वितीयभार्यया सहानुष्ठितोक्थ्यनामकयज्ञैः ऋग्वेदपारगैः पूर्वोत्तरमीमांसाव्याख्यातृभिः श्रौतस्मार्तकर्मधुरन्धरैश्चरुकूरितिरुमलसोमयाजिभिः श्रीरामानुग्रहकृतेयं षट्कर्मचन्द्रिका सम्पूर्णा ॥

त एवेदानीं सन्न्यस्य रामचन्द्राश्रमाख्या ब्रह्मानन्दमनुभवन्तस्सुखेन तिष्ठन्ति ॥

षट्कर्मचन्द्रिकामेतां ये श्रौतस्मार्तपारगाः ।
शब्दैर्न्यायैश्च वचनैः शोधयन्तु विपश्चितः ॥

तत्तद्ग्रन्थगतैरेव नानावाक्यैर्नकल्पितैः ।
कृतेयं रामचन्द्रस्य प्रीतये बह्वृचां मुदे ॥

नानावेदपुराणशास्त्रविनुतालङ्कारसाहित्यत-
च्छ्रौतस्मार्तनयप्रबन्धाशिथिलव्याख्यानचुञ्चुस्सुधीः ।
सद्वृत्तस्सकलद्विजेन्द्रविनुतास(तरस)त्कीर्तियुक्तस्तथा
चरुकूरि(कूरी)कुलसंभवो विजयते श्रीतिम्मयज्वा बुधः ॥

---

## No. 2978. षट्कर्मचन्द्रिका.

## ṢAṬKARMACANDRIKĀ.

Pages, 100. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 2882.

The leaves are not arranged in order.

Incomplete.

## No. 2979. षट्कर्मचन्द्रिका.
## ṢAṬKARMACANDRIKĀ.

Pages, 34. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 2765.

Incomplete.

Wants beginning and end.

---

## No. 2980. सत्क्रियाकल्पमञ्जरी.
## SATKRIYĀKALPAMAÑJARĪ.

Substance, palm-leaf. Size, 12 × 1⅜ inches. Pages, 33. Lines, 7 on a page. Character, Grantha. Condition, slightly injured Appearance, new.

Deals with certain religious rites relating to the wearing of the sacred thread, the upper garment, &c.

Complete.

Begins on fol. 18*a* The other works herein are, Śuddhayājilakṣaṇam 1*a*, Sūtrayajñōpavītasamarthanam 11*a*.

Contains Vastrayajñōpavītaprakaraṇa.

**Beginning :**

सोत्तरीयैर्यज्ञसूत्रैः पद्माक्षतुळसीसरैः ।
लसन् हृत्पङ्कजे मेऽस्तु श्रीमान् वेदान्तदेशिकः ॥
यत्किञ्चिदुक्तिरसञ्जाता सज्जनभ्रान्तिशान्तये ।
उत्तरीयप्रमाणानि सङ्कलय्य लिखाम्यहम् ॥

विखनस्सूत्रे उपनयनप्रकरणे—

या अकृन्तन्निति वस्त्रम्; इयन्दुरुक्तादिति मेखलाम्; परीदमित्युत्तरीयम्; यज्ञोपवीतमित्युपवीतम्; मित्रस्य चक्षुरित्याजिनं तस्मै ददातीति ।

पारायणव्रते च—

पूर्वाणि सूत्रदण्डादीन्यप्सु विसृज्येति ।

सूत्रम् उपवीतम् । दण्डं(ण्डः) पालाशम्(:) । आदिशब्देन मेखलान्तरीयकृष्णाजिनान्यपि गृह्यन्त इति तद्भाष्यम् ।

**End:**

तन्तुत्रयमधोवृत्तं पुनश्चोर्ध्ववृतं त्रिवृत् ।
कार्पासतान्तवं कार्यं तथैकश्चोत्तरीयकम् ॥

इति यतिधर्मसमुच्चयोपात्तदत्तात्रेयवचनेन यतिनामप्युत्तरीयप्रतिनिषिद्धतया नवतन्तुकसूत्रं धार्यमिति सिद्धम् ॥

**Colophon:**

इति सत्क्रियाकल्पमञ्जर्याम् उत्तरीयप्रकरणं समाप्तम् ॥

---

## No. 2981. सन्न्यासनिर्णयः.

## SANNYĀSANIRṆAYAḤ.

Substance, paper. Size, $7\frac{3}{4} \times 6\frac{1}{4}$ inches. Pages, 2. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 98*b*.

On Hindu asceticism.

Complete.

By Vallabha.

The other works herein are :—

| | Fol. | | Fol. |
|---|---|---|---|
| Paratatvāñjanam .. | 1*a* | Svāminīprārthanā .. | 85*a* |
| Prēmabhaktirasāyanam .. | 46*b* | Mukhyaśaktistōtra .. | 85*b* |
| Bhakticintāmāṇi .. | 60*a* | Rādhāstōtra .. .. | 86*b* |
| Śrīnāthāṣṭakam .. .. | 74*b* | Ārādhanastōtram .. | 87*a* |
| Srīmadaṣṭakam .. .. | 75*a* | Śaraṇāṣṭakam .. .. | 87*b* |
| Dainyāṣṭakam .. .. | 75*b* | Caraṇacihnavarṇanam .. | 88*a* |
| Smaraṇāṣṭakam .. .. | 76*a* | Yamunāvijñapti.. .. | 89*b* |
| Bhujangaprayātāṣṭakam | ,, | Yamunānāmastava .. | 90*a* |
| Bhaktihaṁsaḥ .. .. | 77*a* | Ātmanivēdana .. .. | ,, |
| Giridhāryaṣṭakam .. | 83*b* | Viṭṭhalēśāṣṭakam .. | 90*b* |
| Navanītapriyāṣṭakam .. | 84*a* | Viṭṭhalēśvaracintana-prakāraḥ .. .. | 91*a* |
| Haridāsasiddhāntam .. | 84*b* | Sarvōttamastōttra .. | 92*a* |
| Catuślōkī .. .. | 85*a* | | |

| | Fol. | | Fol. |
|---|---|---|---|
| Śrīvijñapti .. .. | 92b | Vivēkadhairyāśrayaṇa .. | 102b |
| Nijācāryāṣṭaka .. .. | ,, | Janmavaiphalyāṣṭaka .. | 103b |
| Pañcākṣarastōtra .. | 93a | Dainyāṣṭakam .. .. | ,, |
| Ācāryastōtra .. .. | 93b | Vallabhāṣṭakam .. .. | 104a |
| Vallabhabhāvāṣṭaka .. | 94a | Nirōdhalakṣaṇam .. | 104b |
| Vallabhaśaraṇāṣṭaka .. | 94b | Jalabhēdastōtram | 105b |
| Ācāryacintanaprakāra .. | ,, | Viṭṭhalāṣṭōttaraśatam .. | 106b |
| Maṅgalāṣṭaka .. .. | 95 | Puruṣōttamasahasranāma | 108a |
| Dāsabhāvāṣṭaka .. .. | 96a | Jalabhēdaṭīkā .. .. | 119b |
| Nandasūnvaṣṭaka .. | 97a | Sampradāyakuladīpikā .. | 133b |
| Paribṛḍhāṣṭaka .. .. | 97b | Puṣṭipravāhamaryādā-vivaraṇam .. .. | 165a |
| Puṣṭipravāhamaryādā .. | 99b | Nirōdhavivṛti .. .. | 184a |
| Bālabōdha .. .. | 100b | Ācāryanāmāvaliḥ .. | 185b |
| Śatanāmastōtra .. .. | 101a | Prēmāmṛtarasāyanam .. | 187a |
| Sēvāphala .. .. | 101b | | |
| Antaḥkaraṇaprabōdhaḥ .. | 102a | | |

**Beginning:**

प्राप्ततापनिवृत्त्यर्थं परित्यागो विचार्यते ।
स मार्गद्वितये प्रोक्तो भक्ता(क्ति)ज्ञाने विशेषतः ॥

कर्ममार्गे न कर्तव्यः सुतरां कलिकालतः ।
अतः प्राप्ता भक्तिमार्गकर्तव्यत्वविचारणा ॥

श्रवणादिप्रसिद्ध्यर्थं कर्तव्यश्चेत्स नेष्यते ।
सहायसङ्गसाध्यत्वात् साधनानां च रक्षणात् ॥

अभिमानानि(नु) योगाच्च तद्धर्मत्वविरोधतः ।
मृहादिबाधकत्वेन साहसार्थं तथा यदि ॥

अग्रेऽपि तादृशैरेव सङ्गो भवति नान्यथा ।
स्वयं च विषयाक्रान्तः पाषण्डः स्यात्तु कालतः ॥

विषयाक्रान्तदेहानां नावेशस्सर्वथा हरेः ।
अतोऽत्र साधने भक्तौ नैव त्यागस्सुखावहः ॥

विरहानुभवार्थं तु परित्यागः प्रशस्यते ।
स्वीयबन्धनिवृत्त्यर्थमावेशोऽत्र न चान्यथा ॥

कामिन्यो गोपिकाः प्रोक्ता गुरवस्साधनं च तत् ।
भावो भावनया सिद्धस्साधनं चान्यदिष्यते ॥

**End:**

अतः कलौ स सन्न्यासः पश्चात्तापाय नान्यथा ।
पाषण्डित्वं भवेच्चापि तस्मात् ज्ञानेन सन्न्यसेत् ॥

सुतरां कलिदोषाणां प्रबलत्वादिति स्थितम् ।
भक्तिमार्गेऽपि चेद्दोषः तदा किं कार्यमुच्यते ॥

अत्रारम्भे न नाशः स्यात् दृष्टान्तस्याप्यभावतः ।
स्वास्थ्यहेतोः परित्यागात् बाधा केनास्य सम्भवेत् ॥

हरिरत्र न शक्नोति कर्तुं बाधां कुतोऽपरे ।
अन्यथा मातरो बालान् न स्तनैः पुपुषुः क्वचित् ॥

ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यति ।
आत्मप्रदः प्रियश्चापि किमर्थं मोहयिष्यति ॥

तस्मादुक्तप्रकारेण परित्यागो विधीयताम् ।
अन्यथा भ्रं(भ्र)श्यते स्वार्थादिति मे निश्चिता मतिः ॥

इति कृष्णप्रसादेन वल्लभेन विनिश्चितम् ।
सन्न्यासवरणं भक्तौ अन्यथा पतितो भवेत् ॥

**Colophon:**

इति श्रीवल्लभप्रभुविरचितं(तः) सन्न्यासनिर्णयं स(यस्स)म्पूर्णम्(ः) ॥

## No. 2982. सन्यासविधिः.

## SANNYĀSAVIDHIḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol 7*a* of the MS described under No. 2749. Complete

**Beginning:**

अथ सन्यासविधिरुच्यते—

पुनश्च कर्मकरणत्वेन कृच्छ्रचतुष्टयं कृत्वा मोक्षाश्रमस्वीकरणात् पूर्वकृतपापपरिहारार्थं कृच्छ्रचतुष्टयदानं करिष्य इति संकल्प्य । इदं कृच्छ्रलक्षणम्—

पादमेकं सुवर्णन्तु भारधान्यन्तथैव च ।
शिवत्रयतिलायुक्तं षट्प्रस्थं घृतमेव च ॥
दानमेकन्त्विहैतेषां कृच्छ्रमेकन्तथैव च ।

एवं प्रकारेण कृच्छ्रचतुष्टयं कृत्वा उत्तरायणे शुक्लैकादश्यां पौर्णमास्यां वा स्वानुष्ठानानन्तरं मोक्षाश्रमस्वीकारार्थमष्टौ देवादिश्राद्धानि नान्दीमुखविधानेन करिष्य इति संकल्प्य तीर्थं गत्वा जलाञ्जलिना तर्पयेत् ॥

* * * *

ओं सन्यासाश्रममाश्रयिष्यामीति संकल्प्य.

**End:**

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे इति मन्त्रेण कूर्मासनं गृहीत्वा प्राचीमुदीचीं वा दिशं गत्वा विधिवदघमर्षणपुरुषसूक्तेन स्नानं कृत्वा षोडशवारं प्राणायामं कृत्वा उत्तीर्य जलं प्रक्षाळयेत् । ततः अस्य यतेरवभृथस्नानम् । अतः परं यतिधर्म एवानुष्ठेयः ।

**Colophon:**

सन्यासविधिस्समाप्तः ॥

## No. 2983. सापिण्ड्यदीपिका.

### SĀPIṆḌYADĪPIKĀ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 42*a* of the MS. described under No. 2914.

Treats of the rules prohibiting intermarriage between Sapiṇḍas in the mothers line and between Sagōtras in the fathers line.

Complete.

**Beginning:**

असगोत्रामसपिण्डामसमानप्रवरां यवीयसीं वरयेदिति पूर्वैरुक्तम् । गोत्रं नाम स्वकुलपरम्परायातं प्रसिद्धं काश्यपावत्सारनैध्रुवभारद्वाज-कौण्डिन्यादि । समानमेकं गोत्रं यस्याः सा स[पिण्ड्य]गोत्रा सा न भवतीति असगोत्रा । समानस्यच्छन्दसीत्यादिना समानस्य सभावः ॥

**End:**

मातुलस्य सुतां केचित् पितृष्वसृसुतामपि ।
विवहन्ति क्वचिद्देशे सङ्कोच्यापि सपिण्डताम् ॥

दद्याच्च प्रतिगृह्णीयात् स्नात्वैव सुसमाहितः । इति वृद्धमनुः ।

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु निवर्तेता चतुर्दशात् ॥
लेपभाजः चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदस्सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥

**Colophon:**

इति विवाहनिष्कर्षः ॥

---

## No. 2984. सूत्रयज्ञोपवीतत्वसमर्थनम्.

### SŪTRAYAJÑŌPAVĪTATVASAMARTHANAM.

Pages, 37. Lines, 7 on a page.

Begins on fol. 11*a* of the MSS. described under No. 2980.

Regarding the Yajñōpavīta to consist of the sacred thread.

**Beginning:**

यत्तावत् कैश्चिदुच्यते—

निरुक्ते यज्ञोपवीतपदस्य सूत्रपरत्वोपपादनात् तदनुसारिणा भट्ट-भास्करेण माधवपक्षः खण्डित इति । तदिदं बालव्यामोहनमिति मन्त-व्यम् । ज्ञानयज्ञे तत्र द्रव्यमाह—

अजिनं वासो वेति द्रव्यविधिरित्युक्त्या च सर्वे द्रव्यविधयो नियमार्था इति.

**End:**

तन्न्यायेन बोधायनादिवचनात् यज्ञोपवीतं परममिति श्रुतौ यज्ञोपवीतपदस्य सूत्रपरत्वं समर्थनीयमिति दिक् ॥

# III. DIGESTS (SPECIAL).

## (3) ĀŚAUCA.

The works under this sub-division relate to the various kinds of legal and ceremonial pollution.

### No. 2985. अघनिर्णयः.

### AGHANIRṆAYAḤ.

Substance, palm-leaf. Size, $11\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 29. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol 1*a*. The other work herein is, Vaiśvadēvaprayōga 16*a*.

A work in 100 stanzas regarding the various kinds of pollution.

By Hārīta Vēṇkaṭācārya.

Complete.

**Beginning:**

सुरासुरशिरोरत्नं ब्रह्मरुद्रादिसेवितम् ।
प्रणम्य पुण्डरीकाक्षं वक्ष्याम्याशौचनिर्णयम् ॥ १ ॥
निमित्तं पिण्डदानादेः पुरुषस्थमशुद्धिकृत् ।
कालस्नानापनोद्यं यत्तदाशौचमितीर्यते ॥ २ ॥
शावे च सूतकाद्याख्ये कर्मणां त्याग इष्यते ।
द्रव्याण्यपि प्रदू(दु)ष्यन्ति स्वाध्यायश्च निषिध्यते ॥ ३ ॥
सन्ध्याकर्माग्निहोत्रं च प्रेतकार्याणि चाप्लुतः ।
कुर्यादन्येन होमं तु कारयेन्नान्यदाचरेत् ॥ ४ ॥

**End:**

अघान्ते सङ्गवे स्नात्वा विप्रस्स्पृष्ट्वाम्बु शुध्यति ।
नृपादिर्वाहनादीनां स्पर्शादित्यब्रवीन्मनुः ॥

एकत्र सुखबोधार्थं समवेक्ष्य बहुस्मृतीः ।
कृतोऽघनिर्णयः स्पष्टं गृह्यतां तद्बुभुत्सुभिः ॥

**Colophon:**

हारीतो वेङ्कटाचार्यः श्रुतिस्मृतिविचक्षणः ।
व्यक्तं श्लोकशतेनेत्थमकरोदघनिर्णयम् ॥

इत्यघनिर्णयस्समाप्तः ॥

---

No. **2986.** अघनिर्णयः.

AGHANIRṆAYAḤ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 7. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 39*a* The other works herein are: Śuddhicandrikāvyākhyā 1*a*, Śuddhicandrikā 36*a*, Āśaucāṣṭaślōkī 37*b*, Āśaucadaśaślōkī 38*a*, Abhinavaṣaḍaśīti (with Dharmapradīpikā) 43*a*.

Same work as the above.

---

No. **2987.** अघनिर्णयः.

AGHANIRṆAYAḤ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 71*a* of the MS. described under No. 1253.

Contains only 21 out of 100 Ślōkas.

Same work as the above.

## No. 2988. अघनिर्णयः.

## AGHANIRṆAYAḤ.

Substance, palm-leaf. Size, $12\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 25. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Aghanirṇaya (with Tamil commentary) 14*b*, Aghavivēcana 56*a*, Nārāyaṇabaliprayōgaḥ 65*a*, Āśaucaviṣaya 68*b*.

Same work as the above.

---

## No. 2989. अघनिर्णयः.

## AGHANIRṆAYAḤ.

Substance, palm-leaf. Size, $17 \times 1\frac{3}{8}$ inches. Pages, 12. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

The date of transcription is given as Friday, Hasta Nakṣatra, in the month of Paṅguni in the year Śukla.

Complete.

A century of verses by Hārīta Veṅkaṭēśa on the subject of pollution consequent upon deaths and births.

Begins on fol. 72*a*.

Same work as the above.

The other works herein are :—

| | Fol. | | Fol. |
|---|---|---|---|
| Svarāvadhānam .. .. | 1*a* | Taparavyākhyānam .. | 55*a* |
| Prātiśākhyam .. .. | 25*a* | Aniṅgyaparibhāṣā .. | 57*a* |
| Svarapañcāśat .. .. | 36*a* | Aniṅgyaśatakam .. | 59*a* |
| Uccōdarkī .. .. | 39*a* | Iṅgyaratnam .. .. | 64*a* |
| Yaṇādēśaniṣēdhaḥ .. | 39*b* | Antapradīpikā .. .. | 66*a* |
| Rāvaṇabhēṭ .. .. | 40*a* | Śikṣā .. .. .. | 68*a* |
| Vilaṅghyavyākhyānam .. | 41*a* | Tribhāṣyaratnam .. | 69*a* |
| Naparavyākhyānam .. | 51*a* | Ṣaḍviṁśatisūtram .. | 79*a* |

शुक्लसंवत्सरे मीनमासे राकातिथौ दिवा ।
श्री[नि]वासर(ा)घवोऽघाख्यनिर्णयं व्यलिखत्सुधीः ॥

## No. 2990. अघनिर्णयः—सव्याख्यः.

## AGHANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 123. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

The text as well as the commentary by Hārīta Vēṅkaṭēśa, grandson of Sarasvatīvallabha and son of Śrīraṅganāthārya.

Begins on fol. 1a. The other work herein is, Āpastambayallājīya 63a.

Copying is said to have been completed on Tuesday the 24th of Makara in the year Āṅgirasa.

The first 12 pages contain a list of contents.

**Beginning:**

मुकुन्दमरविन्दाक्षमिन्दिरेशमरिन्दमम् ।
वन्द्यं वन्देय वन्दारुबृन्दारकमनिन्दितम् ॥

अशक्तोऽपि सदाचारश्रद्धया(योत्था)प्य चोदितः ।
विष्णुना विप्ररूपेण पुनरप्यनुशासितः ॥

उदैरयमहं विष्णोः प्रसादादघनिर्णयम् ।
तस्येदानीं यथाप्रज्ञं व्याख्यामाख्यातुमुत्सहे ॥

मात्सर्येण नहि प्रयोजनमतो निर्मत्सरा मत्कृतं
गृह्णीध्वं सुधियोऽघनिर्णयमिमं शङ्कातमोभास्व(स्क)रम् ।

योऽनेकस्मृतिदर्शितार्थलहरीमेको व्यनक्त्यञ्जसा
यस्मिन् सङ्ग्रहतोऽपि सत्य(न्त्य)तिशया यद्दा(यद्धा)रकः पूज्यते ॥

इह सङ्ग्रहकारस्तावत्प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणार्थमादौ निजेष्टदेवतां नमस्कृत्य वक्ष्यमाणं प्रतिजानीते—

(मू.)

सुरासुरशिरोरत्नं ब्रह्मरुद्रादिसेवितम् ।

प्रणम्य पुण्डरीकाक्षं वक्ष्याम्याशौचनिर्णयम् ॥ इति ॥

(व्या.)

सुरासुरेभ्यः सर्वेभ्यः उत्कृष्टतमं, ब्रह्मरुद्रादिभिः बृन्दारकैर्वन्दितपादारविन्दं, पुण्डरीकाक्षं, परं ब्रह्म प्रणम्य भक्तिश्रद्धापूर्वकं त्रिविधकरणैः प्रकर्षेण नत्वा आशौचनिर्णयाख्यं ग्रन्थं वक्ष्यामि ।

नत्वा(न्वा)शौच(।)परिज्ञाने नि(तन्नि)र्णयज्ञानं कथमित्याशङ्क्य तदेवादौ विवृणोति —

निमित्तं पिण्डदानादेः पुरुषस्थमशुद्धिकृत् ।

कालस्नानापनोद्यं यत्तदाशौचमितीर्यते ॥

आदिशब्देन प्रेतकर्माद्युच्यते । अथायमर्थः ।

**End :**

उपसंहरति—

(मू.)

एकत्र सुखबोधार्थं सुसमीक्ष्य बहुस्मृतीः ।

अतोऽघनिर्णयस्स्पष्टं गृह्यतां तद्बुभुत्सुभिः ॥ इति ॥

(व्या.)

एकस्मिन्नेव ग्रहे(न्थे) कात्स्न्र्येन श(।)वसूतकाशौचसुखासये मनुयाज्ञवल्क्यपराशरबोधायनगौतमसंवर्तदक्षाद्युक्ताः विज्ञानेश्वराखण्डादर्शस्मृत्यर्थसारवरदराजीयादिकाः सङ्ग्रहरूपा(:)च स्मृति(ती): । सुतरां सम्यक् दृष्ट्वा निरूप्य.

* * * *

ननु अयं कियद्भिः श्लोकैः कृतः ? को वास्याघनिर्णयस्य कर्तेत्यत आह—

(मू.)

हारीतवेङ्कटेशार्यः श्रुतिस्मृतिविचक्षणः ।
व्यक्तं श्लोकशतेनैक्य(नेत्थ)मकरोदघनिर्णयम् ॥ इति ॥

(व्या.)

स्पष्टोऽर्थः ॥

**Colophon** :

समाप्तश्चायमघनिर्णयः ॥

मिथोपि(वि)भिन्नस्मृतिवाक्यभङ्गै-
र्भयानकः किञ्चिदुदञ्चिद(ता)र्थः ।
गूढार्थभावो गम(ह)नो मयायं
नि(ती)र्णोऽतिकृच्छ्रादघनिर्णयाद्भि(ब्धि)ः ॥

सरस्वतीवल्लभसूरिपौत्रः
श्रीरङ्गनाथार्यसुतस्सुशीलः ।
यजुर्निधिर्व्याकृत वेङ्कटेश(:)
विष्णु[:]प्रसादादघनिर्णयं सः ॥

आशौचशतकव्याख्यानं सम्पूर्णम् ॥

---

No. **2991.** अघनिर्णयः—सव्याख्यः.

AGHANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅝ × 1¼ inches. Pages, 192. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Dattamīmāṁsā 97*a*, Kartṛkarmaḥ (Dattakaumudīstha) 112*a*, Dattamañjarī 120*a*.

By Vēṅkaṭēśa.

Incomplete.

Same work as the above.

---

No. 2992. अघनिर्णयः—सव्याख्यः.

AGHANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16¾ × 1⅛ inches. Pages, 150. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

No. 2993. अघनिर्णयः—सव्याख्यः.

AGHANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16¼ × 1 inches. Pages, 174. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Incomplete.

Same work as the above.

---

No. 2994. अघनिर्णयः—सव्याख्यः.

AGHANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 46. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Commentary by Vaidikasārvabhauma *alias* मित्रतात (*Vide* No. 1241).

**Beginning:**

प्रारिप्सितग्रन्थपरिसमाप्तिपरिबन्धि(पन्थि)प्रत्यूहापोहाय बिशिष्टदेवता-नमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्य चिकीर्षितं प्रतिजा-नीते—

सुरासुरशिरोरत्नं . . . . वक्ष्याम्याशौचनिर्णयम् ॥

स्पष्टार्थः । प्रतिज्ञाविषयीभूताशौचशब्दार्थमाह—

निमित्तं पिण्डदानादेः . . . . तदाशौचमितीर्यते ॥

अस्यार्थः—

मुख्यकर्तुर्दाहादिसपिण्डीकरणान्तप्रेतकृत्यस्य सपिण्डसमानोदकाना-मुदकाञ्जलिप्रदानस्य केवलबन्धूनां स्नानमात्रस्य हेतुभूतम्.

**End:**

See the next number.

---

## No. 2995. अघनिर्णयः—सव्याख्यः.

## AGHANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 61. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Begins on fol 1*a*. The other works herein are Daśāphalam 32*a*, Dvādaśabhāvaḥ 65*a*.

**Beginning:**—See the previous number.

**End:**

पक्षिणी योनिबन्ध इति वचनात् पक्षिण्याशौचभूतमातुलेयादियोनि-संबन्धविषये ।

अहस्त्वदत्तकन्यासु इति दिनविधिर्यथा असन्निधानविषय मा(आ)-सीत्; यथा वा मातृष्वसामातुलयोरित्यादिवचनेन त्रिरात्राशौचिभूत-

मातृष्वसृमातुलेयादिविषये मातुले श्वशुरे मित्रे इत्यादिवचनैः प्रातपाक्षिणीविधिः असन्निधानविषय मा(आ)सीत्; तथा विरुद्धस्थले व्यवस्था प्राह्येति ।

अवान्ते सङ्गवे स्नात्वा विप्रः स्पृष्ट्वाम्बु शुध्यति ।
नृपादिर्वाहनादीनि नान्यथेत्यब्रवीन्मनुः ॥
एकार्थ(कत्र)सुखबोधार्थं सुसमीक्ष्य बहुस्मृतीः ।
कृतोऽघनिर्णयः स्पष्टं गृह्यतां तद्बुभुत्सुभिः ॥

Colophon:

हारीतवेङ्कटाचा(टेशा)र्यः श्रुतिस्मृतिविचक्षणः ।
व्यक्तं श्लोकशतेनोक्त(नेत्थ)मकरोदघनिर्णयम् ॥

इति श्रीवैदिकसार्वभौमस्य कृतिषु आशौचशकं (कव्याख्यानं) सम्पूर्णम् ॥

---

No. 2996. अघनिर्णयः—स्मृतिसारसर्वस्वसहितः.

AGHANIRṆAYA WITH SMṚTISĀRASARVASVA.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 180. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the one described under No. 2990.

---

No. 2997. अघनिर्णयः—स्मृतिसारसर्वस्वसहितः.

AGHANIRṆAYAḤ WITH SMṚTISĀRASARVASVA.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 111. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

The benedictory stanza is wanting.

Same work as the above.

Copying is said to have been finished by Vēṅkaṭēśvaran on Thursday the 27th of the month of Māśi in the year Ānanda.

**Colophon:**

हारीतवंशश्रीरङ्गनाथार्यपुत्रसरस्वतीवल्लभापरनामधेयश्रीवेङ्कटेशविरचिता स्मृतिसारसर्वस्वसमाख्या अघनिर्णयव्याख्या समाप्ता ॥

---

No. **2998.** अघनिर्णयः.

AGHANIRṆAYAḤ.

Substance, palm-leaf. Size, 17¼ × 1⅛ inches. Pages, 89. Lines, 6 on a page. Character, Grantha and Tamil. Condition, good Appearance, new.

Begins on fol. 1*a*. The other work herein is, Aghavivēcanam 45*a*.

This MS. of the work has a Tamil explanatory commentary.

Complete.

The text with Tamil meaning by Vīrarāghava of Vāsiṣṭhagōtra and Vaikhānasasūtra, son of Tiruvalappa, a temple priest of Siṅgapperumālkōvil, a village near Chingleput.

**Beginning:**

श्रीमत्पाटलशैलस्थनृसिंहपदपूजकः ।
वासिष्ठगोत्रदुग्धाब्धिपूर्णचन्द्रस्सतां मतः ॥
तिरुवळप्प (इति ख्यातभट्टार्य)स्य सुतोत्तमः ।
श्रीवैखानसशास्त्राब्धिपारदृश्या(श्वा) महीतले ॥
कर्षणादिप्रतिष्टा(ष्ठा)न्तस्नपनोत्सवकर्मसु ।
स्वसूत्रपूर्वपरयोः प्रयोगेषु विचक्षणः ॥
भट्टाचार्य इति श्रीमान् प्रख्यातो वीरराघवः ।
स्मृतिगूढार्थनिर्णेता शिल्पज्यो(ज्यौ)तिषकोविदः ॥

कवितामार्गवित् कश्चित् सार्वभौमप्रबन्धवित् ।
सौकर्याय समस्तानामाशौचशतकस्य तु ।
विवृतिं कृतवान् बुध्या स्वयं द्राविडभाषया ॥

**End:**

ततस्समाप्ते व्रतबन्धके तु कृत्वा तु सांवत्सरिकं यथावत् ।
शुद्धे मुहूर्ते सुदिने सुलग्ने क्षौरं तु कुर्यादेति चाह-कौशिकः ॥

**Colophon:**

आशौचशतकं सम्पूर्णम् ॥

---

No. **2999.** अघनिर्णयः.

AGHANIRṆAYAḤ.

Pages, 82. Lines, 8 on a page.

Begins on fol. 14*b* of the MS. described under No. 2988.

Incomplete.

Same work as the above.

---

No. **3000.** अघपञ्चषष्टिः.

AGHAPAÑCAṢAṢṬIḤ.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 21. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

A work in 65 stanzas on pollution. This MS. contains only 61 stanzas.

Begins on fol. 1*a*. The other works herein are, Āśaucadaśakam 12*a*, Āśaucadaśakavyākhyā 13*b*, Aghapradīpa (with Tamil commentary) 19*a*.

**Beginning:**

गर्भस्रुतिर्मासचतुष्टये चेत्
स्नानं पितुः पञ्चमषष्ठयोश्चेत् ।

ज्ञातेश्च सा चेत्कठिना त्रिरात्रं
तयोर्दशाहान्यथ सप्तमादौ ॥ १ ॥
मासत्रये त्रीणि दिनानि मास-
समानि(न)सङ्ख्यानि दिनानि पश्चात् ।
गर्भच्युतौ मासि तु सप्तमादौ
अघं वधूनामथ सूतिकावत् ॥ २ ॥
पुंसो जनौ त्रिंशदहानि चत्वा-
रिंश(त)स्त्रियस्तत्र परं दशाहात् ।
कर्मार्हता स्पृष्टिरपीह निन्द्ये
प्राक् चेद्वचोदर्शनमप्यमुष्याः ॥ ३ ॥

**End:**

तयोर्मृतौ बन्धुमृतावपीत्थं
शुध्यन्ति सद्यः पुरुषाः स्त्रियश्च ।
स्त्रीणां विशेषोऽत्र पितृव्यपत्न्या-
स्स्यान्मातुलान्या निधनेऽपि सद्यः ॥ ६० ॥
पाषण्डषण्डौ पतिताभिशस्त-
स्वैरिण्य इत्यादिजनस्य मृत्याम् ।
उद्बन्धनाम्बुज्वलनप्रवेश-
विषादनाद्यैर्मरणेऽपि सद्यः ॥ ६१ ॥

---

## No. 3001. अघपञ्चषष्टिः.

## AGHAPAÑCAṢAṢṬIḤ.

Substance, palm-leaf. Size, 6¾ × 1½ inches. Pages, 17. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 42*a*. The other works herein are, Aghapañcaṣaṣṭi (with commentary) 1*a*; Vaidyanāthasaṅgraha 41*a*.

Wants the first two leaves and the 9th leaf: otherwise complete.

Same work as the above.

---

## No. 3002. अघपञ्चषष्टिः–सव्याख्या.

## AGHAPAÑCAṢAṢṬIḤ WITH COMMENTARY.

Pages, 79. Lines, 8 on a page

Begins on fol. 1*a* of the MS. described under No. 3001.

The text by Vīṣinātha and the commentary called Smṛtisiddhāntasudhā by Rāmacandrabudha.

Incomplete.

**Beginning:**

मायूरनाथमभयाम्बिकया समेतम्
आगस्त्यसैकतगणेश्वरषण्मुखाभ्याम् ।
अन्तर्विभाव्य गुरुभिर्विवृणोत्यघानाम्
आशौचविदि(वीषि)[नाथ]कृतसङ्ग्रहणं मृद्धु(द्रू)क्त्या ॥
जे(ज्ये)ष्ठैः पितृव्यतनयैर्विवृतोऽत्य(ऽप्य)सौ मे
श्रीरामचन्द्रविबुधैरवधानिसाग्रैः ।
मूलप्रतीकविवृतिस्थपदाविवेक(कि)-
बालप्रबोधमि(क)तया सफल(:)प्रयासः ॥

इह वैदिकान्वितय(नियत)चिकीर्षितग्रन्थविघ्ननिवर्तक[व]चन्द्रकलावतंसस्फु(स्म)रणरूपमङ्गळमाचरन्नेव स्वग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजनाधिका[र]रिसम्बन्धान् ख्यापयन् स्मृतिसिद्धान्तसुधाख्यं चिकीर्षितग्रन्थं शिष्यावधानाय प्रतिजानीते कलानिधिरिति ।

कलानिधिः कौशिकवंशवार्धेः
श्रीवीदि(षि)नाथो वीर्ण(विबु)धो मथित्वा ।

धीमन्दरेण स्तु(स्मृ)तिदुग्धसिन्धुं
ददाति सिद्धान्तसुधां ये(बुधे)भ्यः ॥

कला चन्द्रकला निर्वीयते अस्मिन् अवतंसरूपेणेत्येवं वि(व्यु)-त्पत्त्या चन्द्रकलावतंसस्मरणरूपमङ्गळमादावप्यनुष्ठितामिति सूचयित्व(तु)-मादौ कलानिधिपदप्रयोगः कृत इति द्रष्टव्यम् । विशुद्धजनरत्नपूर्ण-तया क्षीराब्धिरूपस्य विश्वामित्रस्य प्रवृद्धिहेतुतया चन्द्ररूपी श्रीराम-(मान्)वीषिनाथो(था)ख्यो विष्णु(ः)धर्मशास्त्ररूपक्षीराब्धिं स्वबुद्धिरूपमन्द-रपर्वतेन मथित्वा मथनजन्यामाशौ(च)निर्णयरूपसुधां विद्वत्सुरेभ्यो ददा-तीति श्लोकार्थः ।

**End:**

क्रमाद्दशाहत्र्यहपाक्षिणीत्याशौचेषु वाच्योऽत्र परोक्षशब्दः ।
भवेद्ध्रुवं विंशतिषट्चतुर्द्विसङ्ख्यानवद्योजनदेशवाची ॥

अस्यार्थः—

दशाहाशौचविषये परोक्षशब्दो विंशतियोजनदेशपरः; त्र्यहाशौच-विषये षड्योजनदेशपरः; पाक्षिण्याशौचविषये चतुर्योजनदेशपरः ।

एवं परोक्षे पाक्षिण्याशौचदायिजना[वा]नुक्त्वा सन्निधाने तानाह—पितृष्वसुरिति ।

पितृष्वसूवा(सु)र्मातु(तृ)सहोदर[ः]स्य[ात्]
मातृष्वसुश्चापि च पुत्र ।

---

No. **3003.** अघपञ्चषष्टि(रस)व्याख्या.

AGHAPAÑCASAṢṬIḤ WITH COMMENTARY.

Pages, 31. Lines, 5 on a page.

Begins on fol. 9*a* of the MSS. described under No. 2198.

Complete.

The commentary is by Rāmacandra.

**Beginning:**

शुचिना कर्म कर्तव्यमिति शुचित्वस्य सर्वकर्माङ्गत्वात्तस्य चाशुचित्वे सत्यभावात्तादृशशुचित्वसम्पादकजननमरणप्रयुक्ताशौचकालभेदान् क्रमेण प्रदर्शयिष्यन्नाह—गर्भस्रुतिरिति ।

(मू.)

गर्भस्रुतिर्मासचतुष्टये चेत्
स्नानं पितुः पञ्चमषष्ठयोश्चेत् ।
ज्ञातेश्च सा चेत्कठिना त्रिरात्रं
तयोर्दशाहान्यथ सप्तमादौ ॥ १ ॥

(व्या.)

गर्भस्रुतिः गर्भस्रावः । मासचतुष्टये निषेकमासमारभ्य चतुर्षु मासेषु चेत्तदा। पितुः गर्भदातुः। स्नानम्। कर्तव्यमित्यर्थः। पञ्चमषष्ठयोः पञ्चममासे षष्ठमासे । सा गर्भस्रुतिश्चेत् । ज्ञातेश्च चकारस्समुच्चायकः । पितुश्च ज्ञातेश्च स्नानं भवतीत्यर्थः ।

* * * *

एवं पित्रादेराशौचकालमुक्त्वा मातुरप्याशौचकालव्यवस्थामाह—मासत्रयेति ।

(मू.)

मासत्रये त्रीणि दिनानि मास-
समानसङ्ख्यानि दिनानि पश्चात् ।
गर्भच्युतौ मासि तु सप्तमादौ
अघं वधूनामथ सूतिकावत् ॥

**End:**

(मू.)

पाषण्डषण्डौ पतिताभिशस्त-
स्वैरिण्य इत्यादिजनस्य मृत्याम् ।

उद्बन्धनाम्बुज्वलनप्रवेश-
विषादनाद्यैर्मरणेऽपि सद्यः ॥ ६४ ॥

(व्या.)

पार्षं(षण्डः) वैदिकाचारपरित्यागपूर्वकावैदिकाचारस्वीकारी । षण्डः स्त्रीपुंलक्षणरहितः । पतितः पतनीयानीत्यादिना आपस्तम्बोक्तलक्षणपातित्यकर्मकारी । अभिशस्तः महापातकी । यद्य(प्याभिशस्त्यं)पातित्यान्तःप्रविष्टमेव; तथापि गोबलीवर्दन्यायेन । अन्यत्र पतितशब्दः अभिशस्तव्यतिरिक्तपतितपरः । स्वैरिणी यथेच्छं बहुपरपुरुषगामिनी । इत्यादिको जनः । आदिशब्देन व्रात्यादयो गृह्यन्ते । एतादृशमृतस्य । किं च उद्बन्धनं कण्ठे रज्वादिबन्धनपूर्वकं मरणम् । अम्बुप्रवेशो नामाविहितजलपातः । अत एव प्रयागादितीर्थमरणे न दोषः । अग्निप्रवेशोऽपि तादृश एव। अनुगमना(देर्विहितत्वा)न्न दोषः । विषादनं विषभक्षणम् । आदिशब्देन शृङ्ग्यादयो गृह्यन्ते । तैर्मरणे प्राप्तेऽपि दशाहाद्याशौचविषयाणामपि ज्ञात्यादीनां सद्यश्शुद्धिरेव ॥

**Colophon:**

इति रामचन्द्रविरचिता पञ्चषष्टिव्याख्या समाप्ता ॥
अघपञ्चकषष्टि(:) परिपूर्णा ॥

---

## No. 3004. अघप्रकाशिका.

## AGHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 40. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance new.

A work on pollution.

Complete in 11 Khaṇḍas.

**Beginning:**

यं प्रणम्य सकृद्देवं लोक[ा]ः प्राप्नोति वाञ्छितम ।
नमामि विघ्नराजं तं सर्वदेवादिपूजितन ॥

परिभाव्य स्मृतीस्सर्वाः शिष्टाचारान् समीक्ष्य च ।
अनुष्ठेयमवं वाक्यैस्सुबोधाय प्रकाश्यते ॥

शुचिना कर्म कर्तव्यम्; नाशुचिना ।

"आशौचे वर्जयेत्कर्म नित्यनैमित्तिकादिकम् ।
आशौचिनस्तथास्पृश्याः स्पृष्ट्वा स्नानेन शुध्यति ॥
अशुचिः कर्म कुर्वाणस्सद्यो विन्दति चापदम्" ।

इत्यादिवचनैराशौचे कर्मनिषेधादाशौचे निवृत्ते सकलकर्माधिकारस्सिध्यति । अतस्तन्निवृत्तये तत्प्राप्तये च सम्यगाशौचमवगन्तव्यम् । सपिण्डादिजननमरणानिमित्तकं कालस्नानापनोद्यं मरणे पिण्डदानादेर्निमित्तभूतं दानादिकर्मस्वयोग्यतापादकं पुरुषगमशुद्धिकृदघमाशौचमित्युच्यते ।

**End:**

एवं विज्ञाय, कालापनोद्यमघं यथोक्तमनुष्ठाय, ततः परिशुद्धः कर्माणि कुर्वाणः सम्पूर्णफलं प्राप्नोति ॥

स्मृत्याचारानतिक्रम्य न कोऽप्यर्थोऽप्युदीरितः ।
तस्माद्ग्रन्थमिमं (वीक्ष्य वि)धानं क्रियतां बुधैः ॥

**Colophon:**

इत्यघप्रकाशिकायामेकादशः खण्डः ॥

पराभवे सिंहशुक्लनवम्यां भौमवासरे ।
अण्णाशास्त्रीति प्रकाशां लिलेघा(खाघप्रका)शिकाम् ॥

---

No. **3005.** अघप्रदीपः—सव्याख्यः.

AGHAPRADĪPAḤ WITH COMMENTARY.

Pages, 38. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under No. 3000.

A work on pollution with a Tamil commentary: by Rāmabhadradīkṣita, son of Srī nivāsasūri.

Contains 41 Ślōkas.

**Beginning:**

सर्वस्मृत्यर्थसारान् स्वपितृगुरुमुखात्सादरात्सं गृहीत्वा
दृष्ट्वा सञ्चर्च्य पश्चाद्बहुदिनमपरैरात्मनिर्धारितार्थः ।
पुत्रः श्रीवाससूरेरपरविखनसो दीक्षितो रामभद्रः
चक्रे श्रीवासतुष्ट्यै द्रमिडशुभवचोव्याख्ययाघप्रदीपम् ॥
स्रावे मातुस्त्रिमासे त्रिदिवसमथ तन्माससङ्ख्यादिनं स्यात्
षष्ठान्मासाप(त्प)रत्र प्रसवसममहः पुंप्र(स्प्र)सूता(तौ)तु मासम् ।
स्त्रीसूतौ स्याद्दशाहन्त्वधिकमपि भवेन्मासमात्रादितीव
स्रावाद्याशौचमुक्तं त्रिदिवसमथ च त्वार्तवे स्याद्वधूनाम् ॥

**End:**

तुल्याश्चैव पितृष्वसुश्च सहजातायाश्च मातृष्वसुः
भत्रा(र्तृ)णां विलये तथा भगिनिकासूनोस्सतीमृत्युतः ।
एवं मातुलपुत्रदारविलयेऽपि स्नानमात्रं विधि
प्राहुस्स्मृतिशास्त्रज्ञः पण्डित.

---

No. **3006.** अघविवेचनम्.

AGHAVIVECANAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 45*a* of the MS. described under No. 2998.

A work in discussion of pollution.

Complete.

By Rāmacandrādhvariu, son of Anantasōmayāji.

**Beginning:**

बहुस्मृतीस्समालोच्य सकलाम(न)पि सङ्ग्रहान् ।
क्रियते सुखबोधार्थं वाक्यैरघविवेचनम् ॥

चतुर्षु मासेषु गर्भस्रावे पितुस्स्नानमात्रम् । ज्ञातीनां तु तदपि न । पञ्चमषष्ठयोस्तत्पाते तु पितुर्ज्ञातेश्च स्नानतश्शुद्धिः । अत्रैव कठिनस्य तस्य पाते द्वयोरपि त्र्यहमाशौचम्; सप्तमादिषु चेत् द्वयोरपि दशाहम्; म(ा)-तुस्तु मासत्रये त्रिरात्रं, चतुर्थे चतूरात्रं, पञ्चमे पञ्चरात्रं, षष्ठे षड्रात्रं, सप्तमे सूतिकावत् ।

* * * *

इत्थमुक्तेष्वघार्थेषु न कार्यस्संशयो बुधैः ।
प्रष्टव्यास्स्मृतिसाक्षिण्यः क्रियते यदि सोऽथवा ॥

**Colophon:**

प्रथमपरिच्छेदः ॥

**End:**

ब्रह्मचारिणस्सन्न्यासिनश्च स्वसपिण्डादिमरणे सद्यश्शुद्धिः सद्य एव शुद्धाः ॥

इति तृतीय(षष्ठ): खण्डः ॥

विना मूलप्रमाणेन न कोऽप्यर्थो विनिश्चितः ।
निर्विशङ्कमया ग्रद्ध(मयं ग्रन्थः) तस्माद्ग्राह्यो बुभुत्सुभिः ॥

**Colophon:**

इति पदवाक्यप्रमाणपारावारपारीणभारद्वाजकुलतिलकश्रीमदनन्तसो-मयाजिनस्तनुज(जे)न रामचन्द्राध्वरु(रि)णा विरचिते अघविवेचने द्वितीयः परिच्छेदः ॥

इति अघविवेचनं समाप्तः(म्) ॥

---

## No. 3007. अघविवेचनम्.

## AGHAVIVĒCANAM.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

3 Khaṇḍas complete.

Begins on fol. 21*a*. The other works herein are, Śrāddhabhōjanaprāyaścittavidhi 1*a*, Yājuṣāpuraprayōga 6*a*, Nārāyaṇabali 24*a*, Prayōgacandrikā, 27*a*.

Same work as the above.

---

## No. 3008. अघविवेचनम्.

## AGHAVIVĒCANAM.

Substance, palm-leaf. Size, 11¼ × 1⅜ inches. Pages, 18. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Breaks off in the second Paricchēda.

Same work as the above.

---

## No. 3009. अघविवेचनम्.

## AGHAVIVĒCANAM.

Pages, 18. Lines, 8 on a page.

Begins on fol. 56*a* of the MS. described under No. 2988.

Complete in 2 Paricchēdas.

Dated: Wednesday the 11th of the month Āvaṇi, Saptami, Bharaṇi, in the year Virōdhi.

Same work as the above.

---

## No. 3010. अघविवेचनम्—सव्याख्यानम्.

## AGHAVIVĒCANAM WITH COMMENTARY.

Substance, palm-leaf. Size, 12⅞ × 1½ inches. Pages, 51. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

The first 6 Khaṇḍas complete.

**Beginning:**

(मू.)

श्रुतिस्मृतीस्समालोच्य सकलानपि सङ्ग्रहान् ।
क्रियते सुखबोधार्थं वाक्यैरघविवेचनम् ॥ इति ॥

प्रतिज्ञातत्वात् तद्वाक्ये प्रामाण्यं शङ्कमानानां शङ्कानिरसनाय तद्वाक्यं लिखित्वा, तदर्थमूलप्रमाणान्यपि लिख्यन्ते । चतुर्थमासे गर्भस्रावे पितुस्स्नानमात्रम् । ज्ञातीनां तदपि न । पञ्चमषष्ठयोस्तत्पतने पितुर्ज्ञातीनां च स्ना(न)तश्शुद्धिः । अत्र कठिनस्य पाते द्वयोरपि त्र्यहमाशौचम् । सप्तमादिषु चेद्द्वयोरपि दशाहम् । मातुस्तु मासत्रये त्रिरात्रम् । चतुर्थे चतूरात्रम् । पञ्चमे पञ्चरात्रम् । षष्ठे षड्रात्रम् । सप्तमादिषु सूतिकावत् । पुंप्र(स्प्र)सवे त्रिंशद्दिनैः; स्त्रीप्रसवे चत्वारिंशद्दिनैश्शुद्धिः ।

* * * *

(व्या.)

मुक्ताफले पराशरः—

"यदि गर्भो विपद्येत स्रवते चापि योषितः ।
यावन्मासं स्थितो गर्भः दिनं तावत्तु सूतकम्" ॥ इति ॥

यदि गर्भस्रावपातौ स्यातां तदा यावत्सु मासेषु गर्भः स्थितः तावन्माससङ्ख्यासमदिनं मातुस्सूत्याशौचमित्यर्थः । इदं चतुर्थमासप्रभृति आ सप्तमात् । अर्वाक्तु त्रिरात्रम् ।

स्रावपातौ विविनक्ति स एव—

"आ चतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिस्स्याद्दशाहं सूतकं भवेत्" ॥ इति ॥

**End:**

गृहस्थमृतौ ब्रह्मचारियतीनाम्; ब्रह्मचारिमृतौ ब्रह्मचारिवानप्रस्थयती-

नाम्; वानप्रस्थमृतौ वानप्रस्थब्रह्मचारियतीनाम्; यतिमृतौ यतिब्रह्मचारि-वानप्रस्थानाम्; सपिण्डानां परस्परं सद्यश्शौचं भवतीत्यर्थः ॥

**Colophon :**

इति षष्ठः खण्डः ॥

---

No. **3011.** अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 226. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, new.

Complete.

This is a treatise in Āśauca. The text as well as the commentary by Subrahmaṇyasudhī son of Vēṅkaṭāmba.

An index of 9 pages is given at the beginning.

**Beginning :**

(व्या.)

वागीशवासुदेवादिवरदानविशारदम् ।
वारंवारमहं वन्दे वारणेन्द्राननं महः ॥

सौजन्यं सुमनोऽभिनन्द्यममृतं सत्यं तु वेलातटं
स्वाचारस्सहजो महामधुरिमा धर्मस्सुराणां द्रुमः ।
यत्राद्यः कुलदेवतापदमितः श्रीवेङ्कटेशो हरिः
सोऽयं सर्वमनोरमो विजयते पोन्दूरुवंशार्णवः ॥

सुधांशुस्तत्र सम्भूतः सुब्रह्मण्यसुधीरिति ।
अजस्रपरिपूर्णाभिः कलाभिरुपशोभिते(तः) ॥

कुलशीलविवेकादिप्रशस्तगुणजन्मभूः ।
वेङ्कटाम्बा महाभागा जननी यस्य पावनी ॥

वेङ्कटेशाह्वयो यस्य पिता सज्जनपूजितः ।
पवित्रकीर्तिरत्यन्तमहनीयगुणोज्ज्वलः ॥
तर्कादिप्रौढतन्त्रप्रविततगहनप्रक्रियादुर्गमार्ग-
स्थानस्वैरप्रचारप्रबलमृगपतिर्भूरिसद्ग्रन्थबन्धः ।
काव्यालङ्कारजालप्रचुरपरिचयो यस्सुधासिन्धुपूर-
प्रेङ्खत्कल्लोलजालप्रतिभटकवितामाधुरीसाधुरीतिः ॥
सोऽहं साधुजनानां सन्ततसन्तोषसंविधानचणाम् ।
सदसद्विवेकजननीं सकलस्मृतिभिः प्रतीतसंवादाम् ॥
आशौचनिर्णयाख्यामभिनवषडशीतिमात्मना रचिताम् ।
व्याकुर्वे मन्वादिव्याहारानप्युदाहरन् विशदम् ॥

ननु चन्द्रिकामाधवीयादिनिबन्धेषु तत्तन्मुनिस्मृतिवचनानि सङ्कलय्य सर्वैकमत्योपादानपूर्वकं सर्वे धर्मास्सम्यगेव व्यवस्थिताः । तेष्वाशौचमपि सम्यगेव निरूपितम् ; तथापि तेषु निबन्धेषु प्रत्येकं कृत्स्नस्यानभिधाना-त्तत्तद्विषयेषु भूयश्चर्चाभिः ग्रन्थविस्तराच्च, मन्दानां तत्त्वनिर्णयो न सम्भवतीति तत्सिद्ध्यर्थं कौशिकादित्येन सारांशमात्रं निष्कृष्य सङ्क्षेप-तष्षडशीतिर्निबद्धा सर्वैरुपादीयमाना दरीदृश्यते ; तत्किमर्थोऽयमभिनव-षडशीतेरारम्भ इत्याशङ्का प्रसरति । तत्रोत्तरम्—यद्यपि प्राचीनषड-शीतौ सुखोपलम्भार्थं तत्तन्निबन्धेभ्यस्सारांशमात्रं निष्कृष्य जातकाद्याशौ-चभेदा निरूपिताः ; तथापि न तत्र कार्त्स्न्येनाभिधानम् । तथा हि—

स्रावे जनकस्य स्नानं नाभिहितम् ; चतुर्थमासस्रावे ज्ञातीनां स्नानं नाभिहितम् ; तत्रैवेषत्कठिनस्रावे जनकस्य त्रिरात्राशौचं नाभिहितम् ; पाते मृतप्रसवे च जाताशौचमात्रमुक्तम् ; स्नानमात्रापनोद्यं शावाशौचं नाभिहितम् ।

* * * *

तस्मात् प्राचीनषडशीतावनुक्तस्य सङ्ग्रहार्थं दुरुक्तस्य निरासार्थं च अभिनवग्रन्थारम्भः ।

अत्र चाशौचमात्रविवेचनं क्रियते । आशौचकर्तव्यं तिलोदकादिकं तु अस्मत्कृतधर्मचिन्तामणौ द्रष्टव्यम् । अथ प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये

* * * *

चिकीर्षितं प्रतिजानीते —

(मू.)

गणनाथं नमस्कृत्य गुरूनपि महात्मनः ।
सुब्रह्मण्यो वितनुते सुधीराशौचनिर्णयम् ॥

महात्मन इति गुरूणां विशेषणं स्वकीयसद्गुरुकटाक्षजनितबुद्धिवैशद्याभिप्रायम् ।

आशौचनिर्णय इति ग्रन्थस्य नाम ; आशौचस्य निर्णयो यस्मात् इति बहुव्रीहिः । ततश्च आशौचकलापैः(पो) ग्रन्थस्य विषय इत्युक्तं भवति ।

**End:**

अतस्तेषामाशिषा पुत्रादीनां दीर्घमायुस्सार्व(का)लिकमारोग्यमाचन्द्रार्कं वंशाभिवृद्धिरुत्तरोत्तरं श्रेयोऽभिवृद्धिश्च भवतीति ॥

तेन कृतैषा विदुषामभिनवषडशीतिभावबोधाय ।
धर्मप्रदीपिकाख्या व्याख्या जीयादतीव विख्याता ॥

**Colophon:**

इति श्रीवेङ्कटाम्बागर्भसम्भूतश्रीसुब्रह्मण्यसुधीविरचितायामभिनवषडशीतिव्याख्यायां पित्रादिप्रसादेन पुत्रादेर्वंशाभिवृद्धिनिखिलश्रेयःप्राप्तिनिर्णयः ॥

अभिनवषडशीतिस्सव्याख्या समाप्ता ॥

१. स्रावपाताशौचनिर्णय.
२. प्रसवाशौचादिनिर्णय.
३. दशाहान्तश्शिशुमरणाशौचनिर्णय.
४. अनुपनीताशौचनिर्णय.
५. उपनीताशौचनिर्णय.
६. अतिक्रान्ताशौचनिर्णय.
७. अनेकाशौचसन्निपाताशौचनिर्णय.
८. ग्रामाशौचनिर्णय.
९. सम्पर्काशौचनिर्णय.
१०. द्रव्याशौचनिर्णय.
११. आशौचापवादनिर्णय.
१२. आशौचकर्त्तव्यनिर्णय.
१३. वंशाभिवृद्धिश्रेयःप्राप्तिनिर्णय.

---

No. **3012.** अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Pages, 179. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 2787.

Complete.

Same work as the above.

नलाब्दे चैत्रमाशे(से) च पौर्णम्यां(पूर्णिमा) भृगुवासरे ।
पुराणान्वयजातेन पद्मनाभेन धीमता ॥

षडशीतिस्सुविख्याता सव्याख्याभिनवाभिधा ।

---

No. **3013.** अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKÂ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 166. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are, Śaivāgamaślōkaḥ 95*a*, Karṇāmṛtaślōkāḥ 96*a*.

Incomplete.

Breaks off in the middle of Samparkāśaucanirṇaya.

Same work as the above.

---

## No. 3014. अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

## ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Pages, 24. Lines, 38 on a page.

Begins on fol. 30*a* of the MS. described under No. 2913.

Contains to the end of the portion dealing with Āśaucāpavādanirṇaya.

Same work as the above.

---

## No. 3015. अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

## ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Pages, 19. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2969.

Contains Āśaucāpavādanirṇaya only.

Same work as the above.

---

## No. 3016. अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

## ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Substance, palm-leaf. Size, 16⅝ × 1⅜ inches. Pages, 152. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Breaks off in Samparkāśauca.

Incomplete.

Begins on fol. 13*a*. The other work herein is, Śiśupālavadha-vyākhyā 1*a*.

Same work as the above.

---

## No. 3017. अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

## ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Pages, 23. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under No. 2943.

To the end of Dravyāśauca.

Incomplete.

Same work as the above.

---

## No. 3018. अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

## ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Pages, 140. Lines, 8 on a page.

Begins on fol. 43*a* of the MS. described under No. 2986.

To the end of the portion on Āśaucakartavyanirṇaya.

Incomplete.

Same work as the above.

---

## No. 3019. आशौचखण्डः.

## ĀŚAUCAKHAṆḌAḤ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 186*a*. The other works herein are, Nirṇayasindhu 1*a*, Śaunakīyargvidhānasūktamāhātmya 164*a*.

Complete.

**Beginning :**

अथ वक्ष्याम्याशौचम् — यद्दानादिधर्मेष्वयोग्यत्वलक्षणं सपिण्डादिजनानां सम्भवति; तदाशौचम् । तच्च सपिण्डजनने मरणे च सम्भवति । यतः प्रभृति सन्तानविश्लेषस्स कूटस्थ इति व्यवह्रियते । तमारभ्य गणिताः सप्त पुरुषाः पुत्रपौत्रादयः सपिण्डाः परस्परं गोत्रानुप्रविष्टा इति विज्ञेयाः । अष्टमप्रभृतयस्समानोदकाश्चतुर्दशपर्यन्ताः । पञ्चदशप्रभृतयो गोत्रजाः । गोत्रजानां जनने मरणे वा नाशौचम्; मरणे तु स्नानेनैव शुद्धिः ।

**End :**

ब्राह्मणोऽग्निं स्पृष्ट्वा शुध्येद्राजन्यो वाहनमायुधं वा वैश्यो रत्नं शूद्रो यष्टिं स्पृष्ट्वा शुध्यति ॥

**Colophon :**

आशौचखण्डं समाप्तम् ॥

---

No. **3020.** आशौचत्रिंशच्छ्लोकी–सव्याख्या.

ĀŚAUCATRIMŚACCHLŌKĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 36. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new.

A work on ceremonial pollution, in thirty Ślōkas.

Complete.

**Beginning :**

नत्वा गणेश्वरं देवं शारदां गुरुमात्मनः ।
आशौचसङ्ग्रहत्रिंशच्छ्लोक्या व्याख्यां करोम्यहम् ॥

तत्र स्मार्तक्रममुल्लङ्घ्य लोकप्रासिद्धिक्रमानुसारं गर्भविपत्तिनिमित्ताशौचक्रमेण प्रतिपादयति—

(मू.)

षण्मासाभ्यन्तरेषु स्वपुरुषनिहिते गर्भमात्रेऽपि नष्टे
माता तन्मासस‌ङ्ख्यासमदिनमशुचि(:)स्नानशुद्धास्सपिण्डाः ।
अन्ते मासद्वये तु त्रिदिनमशुचयोऽतः परं सूतिव(म)त्याः
चातुर्वर्ण(र्ण्ये)स्य तुल्यं भवति वयसि यत्प्रोच्यते शौचमात्रम् ॥

(व्या.)

षण्मासाभ्यन्तरेषु षण्मासा(अ)भ्यन्तराणि मध्यानि तेषु । स्वपुरुषनिहिते भर्तृनिहिते गर्भमात्रे पूर्णावयवे गर्भे नष्टे च्युते माता जननी ।

---

## No. 3021. आशौचत्रिंशच्छ्लोकी–सव्याख्या.

### ĀŚAUCATRIMŚACCHLŌKĪ WITH COMMENTARY.

Pages, 40. Lines, 22 on a page.

Begins on fol. 13*a* of the MS. described nnder No. 1197.

Complete.

**Beginning** :—Same as in the previous No. 3020.

**End** :

तथा च स्मृतिः—

इति संस्कृत्य गच्छेयुर्गृहं बालपुरस्सराः ।
विदस्य निम्ब(पत्राणि) नीयतां द्वारि वेश्मनः ॥
आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् ।
प्रविशेयुस्स्वमालम्ब्य कृत्वात्मनि पदं शनैः ॥ इति ॥

**Colophon** :

इति त्रिंशच्छ्लोकीव्याख्यानं (समाप्तम्) ॥

## No. 3022. आशौचदर्पणम्.

## ĀŚAUCADARPAṆAM.

Substance, paper. Size, 6¼ × 3¾ inches. Pages, 32. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Also a work on ceremonial pollution.

Complete.

**Beginning:**

श्रीमदर्जुनपूर्णा(र्वा)र्धे नृहरिं सद्गुणाकरम् ।
प्रह्लादार्तिहरं देवं लोकेशेशमुपास्महे ॥

आशौचशतकाद्यनेकप्राचीनाशौचशास्त्रनिबन्धनान्यवलोक्य सुबोधनार्थं वाक्यैराशौचदर्पणाख्याघनिर्णयं वक्ष्ये——

ब्राह्मणादिवर्णचतुष्टये हृज्ज(मृतिज)न्मनोः क्रमेण दश षोडश विंशत(तिः)त्रिंशत् दिनान्याशौचम् । अभिषिक्तक्षत्रियस्य द्वादशाहम् । गोरक्षासक्तवैश्यस्य षोडशाहम् । चक्राङ्कितवैष्णवशूद्रस्य मासार्धम् ।

**End:**

भगवत्पूजादिकर्ममध्ये ग्रामे मृतिसम्भवे शेषं कर्म तन्त्रेण समाप्य शवनिर्गमनानन्तरं समन्त्रकं पुनः कुर्यात् । प्रतिष्ठादिकर्ममध्ये तन्त्रेण करणनिषेधात् निर्गमनानन्तरमेव कुर्यात् ॥

**Colophon:**

इत्याशौचनिर्णयः ॥

अथाघान्ते स्नानकालः ।

अघान्ते सङ्गवकाले स्नात्वा विप्रः पाणिना तोयं स्पृष्ट्वा, नृपो वाहनादिकं स्पृष्ट्वा, वैश्यः प्रतोदं रश्मिं वा स्पृष्ट्वा, स्वस्तिवाचनपूर्वकं ब्राह्मणान् भोजयित्वा शुध्यति । शूद्रो यष्टिं स्पृष्ट्वा शुध्यतीति ।

अयं निबन्धनस्मृत्यनुसारेण उक्तत्वात् एवं सूतकाशौचतत्त्वाजिज्ञासुभिः निर्विशङ्कैः अङ्गीकार्यः ॥

विक्रमसंवत्सरज्येष्ठकृष्णैकादशीशानिवासरमध्याह्ने लिखितः ॥

---

## No. 3023. आशौचदशश्लोकी.
## ĀŚAUCADAŚAŚLŌKĪ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 38*a* of the MS. described under No. 2986.

A work on pollution in 10 Ślokās.

Deals with pollution.

Complete.

**Beginning:**

मातुर्गर्भविपत्स्वघं त्रिदिवसं मासत्रयेऽथो यथा-
मासाहं त्रिषु सूतिकाविधित(र)तः स्नानं पितुस्सर्वदा ।
ज्ञातीनां पतनादिजातमरणे पित्रोर्दशाहं सदा
नाम्ना प्राक्तदुपैति सूतकवशाद्भ्रातुर्दशाहं परम् ॥ १ ॥

**End:**

क्षत्रे षोडश विंशतिर्नि(र्वि)शि निशा(ः)त्रिंशच्च शूद्रे क्रमा-
द्विप्राद्द्वित्रिचतुर्गुणा वयसि चेच्छूद्री(द्रे)तु पश्चाक्षुते(रे) ।
युक्तास्स्त्रीसुतशिष्यदासभृतका भर्त्रादित(व)द्बान्धवे
हीने स्वं लघु ता(वा) तदीयमधिके शूद्रे(द्रैः) समा(र)सङ्कराः ॥ १० ॥

**Colophon:**

इत्याशौचदशश्लोकी समाप्ता ॥

---

## No. 3024. आशौचदशश्लोकी.
## ĀŚAUCADAŚAŚLŌKĪ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 3000.

Complete.

Same work as the above.

## No. 3025. आशौचदशश्लोकीव्याख्या.
## ĀŚAUCADAŚAŚLŌKĪVYĀKHYĀ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 13*b* of the MS. described nnder No. 3000.

A commentary on the above work.

Complete.

Copying is said to have been completed on the 14th of Āvaṇi in the year Virōdhikṛt.

**Beginning:**

मातुः गर्भविपत्सु मासत्रये त्रिरात्रम्; मासत्रयादूर्ध्वं त्रिषु मासेषु माससङ्ख्यान्यहोरात्राणि मातुरेव; पश्चात् षण्मासादूर्ध्वं तत्पाते मातुस्स्वजात्युक्तमघं भवति। पितुः, स्रावे पाते प्रसवे च सर्वत्र स्नानं भवति। ज्ञातीनां पतनादि(दौ)स्नानमेव। जातमरणे पित्रोः जातदन्तत्वाकृतचौला(लत्वा)दिषु सर्वास्ववस्थासु दशाहम्। नामकरणात् पूर्वं सूतकवशात् मरणं भवति चेत् तन्निमित्तशावं सूतकाशौचेन पित्रोर्गच्छति। नामकरणात्परं भ्रातुर्दशाहमघं भवति।

**End:**

क्षत्रेति। क्षत्रियस्य जननमरणे तत्सपिण्डानां षोडशरात्रम्; वैश्यस्य जननमरणे तत्सपिण्डानां विंशतिरात्रम्, शूद्रस्य जननमरणे तत्सपिण्डानां त्रिंशद्दिनमघं भवति। विप्रस्य जननमरणे दशाहमघं भवति। द्विवर्षात्परं विप्रस्य, त्रिवर्षात्परं क्षत्रियस्य, चतुर्वर्षात्परं वैश्यस्य, पञ्चवर्षात्परं शूद्रस्य, सर्वेषां त्रिदिनं चौळात्परं भवति। चौळात्प्राक् विप्रस्य दिनं, क्षत्रियस्य द्विदिनं, वैश्यस्य त्रिदिनं, शूद्रस्य चतुर्दिनमघं भवति। स्त्रीसुतशिष्यदासभृतक(।)ः (भृतकः) भृत्यः स्वामिवत् भर्तृपितृआचार्यस्वामिनायकतुल्याशौचिनो भवन्ति। बान्धवे स्वं हीने लघु वा तदि(दी)यमभ(घ)वत्। सङ्कराः शूद्रैस्समा भवन्ति॥

**Colophon :**

आशौचदशश्लोकीव्याख्यानं सम्पूर्णम् ॥

## No. 3026. आशौचदशश्लोकी–कर्णाटकटीकासहिता.

### ĀŚAUCADAŚAŚLŌKĪ WITH KANARESE COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 14 × 1⅝ inches. Pages, 11. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 21*a*. The other works herein are, Guruśiṣyalakṣaṇam 1*a*, Gāyatrīmantrārtha 18*a*.

Complete.

## No. 3027. आशौचदीपिका.

### ĀŚAUCADĪPIKĀ.

Substance, paper. Size, 13⅛ × 8½ inches. Pages, 71. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 94*a*. The other works herein are : Kriyākramadyōtikā 1*a*, Jīrṇōddhāraḥ 130*a*, Gaurīmaṇḍapapūjāvidhiḥ 154*a*, Vighnēśvaramaṇḍapapūjāvidhiḥ 222*a*.

Deals with pollution.

Complete.

**Beginning :**

वन्दे विघ्नेश्वरं शम्भुं सच्चिदानन्दविग्रहम् ।
अपारकरुणामम्बां साक्षाद्देशिकरूपिणः ॥
गौरीपीनस्तनालोकसञ्जातानन्दकन्दळः ।
आनन्द ताण्डवं शम्भुः आनन्दं विदधातु नः ॥
अनुकूलस्मृतिस्नेहामाप्नोतिमथवात्तिवा(ल्पोक्तिपरवर्त्तिका)म् ।
शैववर्गपरिग्राह्यां करोम्याशौचदीपिकाम् ॥

इह तावदखिलवृन्दप्रवरशैवतन्त्रदीक्षापवित्रितकळेबराणामनवरतशिवपूजाधुरन्धराणाममृ(त)भक्षवितरणधुरिताशिवपूजने शिष्यसूतकानिषिद्धपरिवर्जनपरिज्ञानहेतुभूताशौचप्रकाशसम्पादितदीपिका प्रवर्त्यते ।

**End:**

सपिण्डीकरणादूर्ध्वं प्रेतकस्यापि शिवलोकप्राप्तिरिति । उक्तं कामिके—

यस्यैतानि न कुर्वन्ति श्राद्धानि नव षोडश ।
पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धसमैरपि ॥
द्वारे च भस्मनिलये आकाशे च यथाक्रमम् ।
स्थहाणि त्रीणि चैकं च प्रेतीभूतस्स दीव्यति ॥
सापिण्डीकरणादूर्ध्वं शिवलोकं स गच्छति ।
इत्येतच्छिवभक्तानां संस्कारं च यथोदितम् ॥
रहस्यं परमाख्यातमपवर्गफलप्रदम् ।
शैवागमरहस्यन्तु कथितं शिवयोगतः ॥

**Colophon:**

इति अघोरशिवाचार्यविरचितायाम् आशौचदीपिकायाम् आदिशैवाशौचं नाम एकादशप्रबन्धः ॥

---

## No. 3028. आशौचनिर्णयः.

## ĀŚAUCANIRṆAYAḤ.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 66. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are, Śrāddhādinirṇaya 34*a*, Karmacintāmaṇiḥ 74*a*.

Treats of pollution.

Incomplete.

Contains also a Tamil commentary.

A work on Āśauca by Vēdāntarāmānujatātadāsa, great-grandson of Śvētācārya, and son of Vēṅkaṭēśavaradāsatātārya.

**Beginning:**

समस्तचिदचिद्वस्तुशेषिणे शेषशायिने ।
सर्वश्रुत्यन्तवेद्याय श्रीरङ्गब्रह्मणे नमः ॥

वर्णानां ब्राह्मणादीनामाशौचविधिनिर्णयम् ।
सर्वत्र सारमुद्धृत्य कलये सप्रमाणकम् ॥

एतत्प्रबन्धकर्ताहं श्वेताचार्यप्रपौत्रकः ।
श्रुत्यन्तरामावरजतातदास इतीरितः ॥

श्रीवेङ्कटेशवरदतातार्येण महात्मना ।
पित्रा सुशिक्षितश्चास्मि धर्मशास्त्रे पुनःपुनः ॥

बहुभ्यश्च महद्भ्यश्च शास्त्रविद्भ्यश्च नैकधा ।
धर्मशास्त्रं श्रुतं तत्तु चर्चितञ्च पुनःपुनः ॥

स्खालित्यं यदि चेत्तत्र क्षन्तुमर्हन्ति साधवः ।
समीचीनं यदि स्याच्चेत् परिगृह्णन्तु चादरात् ॥

षष्टिसङ्ख्यादिनाद्यादिस्नानाद्यन्तमनुक्रमात् ।
द्वाविंशतिविधं प्रोक्तमघं तत्तु यथाक्रमम् ॥

विवरिष्ये सप्रमाणं संस्कृतद्राविडात्मना ।
यतिभङ्गादिदोषोऽत्र न स्मर्तव्यो महात्मभिः ॥

दानादिकर्मयोग्यत्वापादकं पापमेव यत् ।
बोध्यमाशौचशब्देन तज्जन्मनि मृतावपि ॥

कालस्नानापनोद्यञ्च तथा कालापनोद्यकम् ।
स्नानापनोद्यकञ्चेति त्रिविधं तदिहोच्यते ॥

अन्तश्शवनिमित्तञ्च ग्रामाशौचं यदुच्यते ।
कालापनोद्यं तत्प्रोक्तमस्पृश्यस्पर्शनात्मकम् ॥

स्नानापनोद्यं ज्ञात्यादिजन्ममृत्यूद्भवश्च यत् ।
कालस्नानापनोद्यं तत् वैद्यनाथसमीरितम् ॥

**End:**

आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत् ।
इति भरद्वाजस्मरणात् ।

उशना—

अनुगम्य मृतं प्रेतं ज्ञातीनप्यनुसृत्य च ।
स्नात्वा घृतश्च भक्षित्वा पुनः स्नानं समाचरेत् ॥ इति ।

स्मृत्यन्तरे—

शौ(श)वानुगमने क्षौरे पुनः स्नानं विधीयते ।
आर्द्रवस्त्रं परित्यज्य शुष्कवस्त्रेण मार्जनम् ॥
सप्तवाताहतं वस्त्रं शुष्कवत्प्रतिपादितम् ।
आर्द्रं वापि द्विजातीनामादृतं गौतमादिभिः ॥
अजीर्णेऽभ्युदिते वान्तावश्रुपाते क्षुरे भगे ।

स्मृत्यर्थसारे—

अस्पृश्यस्पर्शने स्नाने नाघमर्षणतर्पणे ।
अजीर्णेऽभ्युदिते क्षौरे पुनःस्नाने तु ते स्मृतः (ते) ॥ इति ।

कवषः—

अनुगन्ता च वोढा च पुनः स्नात्वा च योषितः ।

स्मृत्यन्तरे—

अग्न्यभावे घृताभावे सचेलस्नानमाचरेत् ।

अभिमन्त्र्य तु गायत्र्या दशकृत्वो यथाविधि ॥
अर्घाञ्जलिरपः पीत्वा सर्वपापैः प्रमुच्यते । इति ॥

---

## No. 3029. आशौचनिर्णयः.

## ĀŚAUCANIRṆYAḤ.

Substance, palm-leaf. Size, 15½ × 1⅛ inches. Pages, 14. Lines, 5 on a page Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 14*a*. The other works herein are :—

| | fol. | | fol. |
|---|---|---|---|
| Ṣaḍaśītiḥ .. | .. 1*a* | Śaunakīyam .. | .. 28*a* |
| Āśaucanirṇayaḥ .. | .. 14*a* | Āturasannyāsavidhiḥ .. | 41*a* |
| Upākarmanirṇayaḥ | .. 21*a* | Yatisaṁskāraprayōgaḥ | .. 43*a* |
| Aparaviṣayavacanāni | .. 23*a* | Yatisaṁskāraviṣayaḥ .. | .. 50*a* |
| Anāvṛṣṭiśāntiḥ .. | .. 25*a* | Nārāyaṇabaliprayōgaḥ | .. 51*a* |
| Jvaravidhiḥ .. | .. 26*a* | Daśadānaviṣayaḥ | .. 53*b* |

Complete.

A work on ceremonial pollution by Bhaṭṭōjidīkṣita, son of Lakṣmīdharasūri.

**Beginning :**

अथाशौचनिर्णयः—

आ चतुर्थाद्भवेत्स्राव(:)पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्यात् दशाहं सूतकं भवेत् ॥ इति ॥

पराशरा(र):—

तत्र स्रावे आद्यमासत्रये मातुस्त्रिरात्रमाशौचम् ; उपरि आषष्ठ(मासं) माससमदिनमाशौचम् ; च(तु)र्थे चत्वारि ; पञ्चमे पञ्च ; षष्ठे षडित्यर्थः ।

सपिण्डानात्तु(न्तु) स्नानमात्रेण शुद्धिः स्रावे ; पाते तु त्रिरात्रम् ; सप्तममासप्रभृति तु दशरात्रमित्यास्व(त्यत ऊर्ध्वमि)त्युक्तम् ।

**End:**

यतीनां ब्रह्मचारिणाश्च नाशौचम् । समावर्तनानन्तरन्तु प्राङ्मृतानां सपिण्डानामुदकदानं कृत्वा त्रिरात्राशौचं कुर्यात् । एवं पित्रादिभ्यः उदकदानादिकं कुर्वन् ब्रह्मचारी आशौचमपि लभते ।

तदुक्तं त्रिंशच्छ्लोक्याम्—

ताताम्बाचार्यकेभ्या(भ्यः)सतिलजलदो ब्रह्मचारी तदीयाशौचम्—इति ।

प्रक्रान्ति(न्त)प्रायश्चित्तानामाशौचं नास्ति । पूर्वप्रवृत्तचौलोपनयनादिसंस्कारेषु यज्ञदेवताप्रतिष्ठारामाद्युत्सर्गादिष्वप्येवमिति ।

**Colophon:**

इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरिसूनुना भट्टोजिदीक्षितेन विरचितायामाशौचनिर्णयः समाप्तः ॥

---

No. **3030.** आशौचनिर्णयः.

ĀŚAUCANIRṆAYAḤ.

Substance, palm-leaf. Size, $8\frac{1}{8} \times 4\frac{1}{8}$ inches. Pages, 28. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Deals with pollution. Complete.

By Tryambakapaṇḍita. A work based on the Parāśaramādhavīya and on the Mitākṣarā of Yājñavalkyasmṛti.

**Beginning:**

गणपतिं नमस्कृत्य प्रत्यूहादिक(द्रिप)विं कवि(म्) ।
त्र्यम्बकेणाशु बोधात(र्थं)क्रियते शौचनिर्णयः ॥

अर्थतोश(तश्श)ब्दतश्चेह पौनरुक्त्यं न दुष्यति ।
स्फुटबोधाय बालानां ग्रन्थोऽयं रच्यते यतः ॥

अत्र प्रागुपनयनात् कामचारकामभक्ष इति गौतमोक्तेरनुपनीतस्य पित्रादिसंस्कारं विना आशौचे नाधिकारः ।

**End :**

विंशतिप्रभृति दिनत्रयम् । यस्यास्तु विंशतिदिनादर्वाक् प्रायशो रजोदर्शनं भवति ; तस्या दशदिनपर्यन्तं स्नानमात्रम् । एकादशे एकरात्रं, द्वादशे द्विरात्रं, त्रयोदशादारभ्य त्रिरात्रम् ।

इति त्र्यम्बकीये.

अत्र मूलवचनानि मिताक्षरामाधवादिनिबन्धेभ्यो ज्ञेयानि । विस्तरभयाद्वा अस्ना(ज्ञा)नां दुरधिगमत्वाच्च न लिखितानि ।

**Colophon :**

इति श्रीआङ्गी(ङ्गि)रसमुद्गलकुलजलधिसुधांशुपदवाक्यप्रमाणपारावारपारीणयायजूकशिरोरत्ननारायणात्मजरघुनाथसूरिसूनुत्र्यम्बकपण्डितविरचिताशौचनिर्णयस्समाप्तः ॥

ऋत्विजां दीक्षितानाञ्च यज्ञियं कर्म कुर्वताम् ।
नैवाशौचं भवत्येषां पितुश्च मरणं दिनम्(विना) ॥

* * * *

जनने मरणे चैव नाशौचं ब्रह्मचारिणाम् ।
पित्रोर्मरण एव स्यादाशौचं ब्रह्मचारिणाम् ॥

---

## No. 3031. आशौचविषयः.

## ĀŚAUCAVIṢAYAḤ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 52. Lines, 6 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Wants beginning and end.

**Beginning :**

आर्तवं पुष्परजासि(सी) ऋतुरित्यभिधीयते ।
प्र(ा)कृतं विकृतं चेति स्त्रीणां तद्द्विविधं भवेत् ॥

**End :**

इत्थं चतुर्विधमुदीरितमार्तवादि
स्त्रावादिभेदवदतः खलु युक्तियुक्तम् ।
आशौचमाचरति यश्शुचितामुपैति
स ब्रह्मवर्चसपरस्सुजनैकसिंहः ॥

अमावास्यां(यान्तु) मृतिर्यस्य तद्दिने दहनं भवेत् ।
चन्द्रस्य दर्शनात्पूर्वं दश पिण्डानि कारयेत् ॥

एकेनोज्ज्वलतन्तुना त्रिवलितेनाथ त्रिवर्णात्मना
त्रिस्त्रिः केवललब्धभेदनवभिर्जीवादिसङ्कल्पतः ।
सप्तविंशतिभेदतस्समुदितं सूत्रं पवित्रं पुनः
सद्रत्नत्रयरूपमेव बिभृयाद्यज्ञोपवीतं द्विजः ॥

भेरीप्रदीपवरदर्पणकम्बुघण्टा-
चन्द्रार्कचक्रसहितान(न्य)पि मङ्गलानि ।
संस्थापयामि सुसृताङ्कुशवर्धनाय
जैनेन्द्रयज्ञरचनाश्रितमङ्गलानि ॥

---

No. **3032.** आशौचविषयः.

ĀŚAUCAVIṢAYAḤ.

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 7. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Begins on fol. 27*a*. The other works herein are, **Anāhitāgnipaitṛmēdhikavidhi** 1*a* , Mṛttikāsnānavidhi 28*b*.

Wants beginning and end, and hence not identified.

**Beginning :**

पक्षिण्याशौचमृत्विग्दुहितृसुतसहाध्यायिशिष्योपनीत-
याज्येषु स्यात्स्वमित्रश्वशुरभगिनिकाभागिनेयप्रयाणे ।
मातामह्याश्च पित्रोः स्वसृ(स)रि च(वि) मृते मातुले मातुलान्यां
चाथो सज्योतिरेव स्वविषयनृपतौ ग्रामनाथे च द(न)ष्टे ॥

मृते ऋत्विगादिषु पक्षिण्याशौचम् । एतच्चैकग्रामविषयम् ।

**End :**

आत्ममातृष्वसुः पुत्रा आत्ममातृष्वसुस्सुताः ॥
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ।
एकग्रामे तु मरणे पक्षिण्याशौचमिष्यते ॥
गुणहीनेषु शौचेषु सन्निधावेकरात्रकम् ।
ग्रामान्तरेषु गुणेषु गुणहीनेषु चाप्लवः ॥

इति ऋत्विक् त्रिविधः । तदाह नारदः ।

---

## No. **3033.** आशौचविषयः.

## ĀŚAUCAVIṢAYAḤ.

**Pages, 29. Lines, 6 on a page.**

Begins on fol. 68*b* of the MS. described under No. 2988.

Incomplete.

**Beginning :**

अशक्तस्नानविधिः—

शिरस्स्नानेऽप्यशक्तस्तु ज्वरी वृद्धस्तथातुरः ।
शिरोरोगी श्रोत्ररोगी कण्ठस्नानं प्रकल्पयेत् ॥

तत्राप्यशक्तो यदि वा कापिलं स्नानमाचरेत् ।
सायंप्रातरशक्तश्चेत् सायमेवाथवा पुनः ॥

* * * *

दत्तस्य पुत्रजनने मरणे च तेषामाशौचानुष्ठानं कथं वा ? उभयविधज्ञात्योर्जननमरणे दत्तस्याशौचानुष्ठानङ्कथम् ?

**End :**

सङ्ग्रहे गालवः—

दौहित्रः पुत्रिकापुत्रः दत्तकोऽप्यौरसस्तथा ।
उदकं पिण्डदानञ्च यथाकालं समाचरेत् ॥

यथाकालं दशरात्रमित्यर्थः । तदुक्तं शतके—

जन्महान्योस्तु वर्णानां दश षोडश विंशतिः । ब्राह्मणानां दशरात्रविधा . . . . . दशरात्रेणैवोदकपिण्डसमापनङ्कर्तव्यम् ॥ यावदाशौचं प्रेतस्यो.

---

## No. 3034. आशौचसङ्ग्रहः.

## ĀŚAUCASAṄGRAHAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 20. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old

Treats of pollution. Complete.

By Vēṅkaṭēśa.

**Beginning :**

श्रीनिगमशिखरगुरुवरचरणसरसिजस्रवन्मधुरसास्वादैः ।
अत्यन्ततुन्दिलो मे भूयान्मानसमधुव्रतश्चपलोऽयम् ॥
आचारनवनीताघनिर्णयाघविवेकतः ।
सङ्गृह्य षडशीत्यादीन् लिख्यते चाघसङ्ग्रहः ॥

शतके—

आ चतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वन्तु नारीणामापः(न्तं)प्रसव उच्यते ॥

अभिनवषडशीतौ—

चतुर्थ ईषत्कठिनस्रावे त्रिदिवसं पितुः ।
मृदुस्रावे तु सर्वेषां चतुर्थे स्नानमात्रकम् ॥

मरीचिरपि—

स्रावे मातुस्त्रिरात्रं स्यात् सपिण्डाशौचवर्जनम् ।
पाते मातुर्यथामासं पित्रादीनां दिनत्रयम् ॥ इति ।

**End:**

तथाङ्गिराः—

सद्यश्शौचे तु तावत्स्यात् आशौचं (सं)स्थितस्य तु ।
यावत्स्नानं न कुर्वन्ति सचेलं बान्धवा बहिः ॥ इति ।

अत्र संस्थितस्येत्युक्तत्वात् प्रसवे प्र.

* * * *

सङ्ग्रहे—

श्वश्रूश्वशुरतत्पुत्रयाजा(ज्या)चार्यसुतर्त्विजाम् ।
उपाध्यायस्य सद्यस्स्यात् मृतौ तत्प्रतियोगिनाम् ॥ इति ।

अत्र श्वश्रूश्वशुरयोः प्रतियोगी जामाता तत्पुत्रः स्यालः स्वप्रतियोगी स्वसुर्भर्ता । इत्येतत्सङ्ग्रहेण लिखितम् । विस्तरस्तु स्मृत्यन्तरे द्रष्टव्यः ॥

श्रीनिगमशिखरगुरुवरचरणसरसिजस्रवन्मधुरसास्वादैः ।
अत्यन्ततुन्दिलो मे भूयान्मानसमधुव्रतश्चपलोऽयम् ॥

## No. 3035. आशौचसङ्ग्रहः.

## ĀŚAUCASAṄGRAHAḤ.

Pages, 17. Lines, 24 on a page.

Begins on fol. 33*a* of the MSS. described under No. 1797.

Complete.

---

## No. 3036. आशौचाष्टकी.

## ĀŚAUCĀṢṬAKĪ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 37*b* of the MS. described under No. 2986.

Treats of pollution. Complete.

**Beginning:**

नाम्नः प्राग्दन्तजातेरुपनयनविधेराप्लवोऽहस्त्रिरात्रं
जातेरूर्ध्वं दशाहे सहभुवि तु कृते नाम्नि पित्रोस्तदैव ।
स्त्रीषु क्षौराष्टमाब्दादुपनयनविधेः पूर्वस(ङ्ख्या) तिथौ(थिः) स्यात्
मातुस्तन्माससङ्ख्यासमदिनमुभयोरुद्भवे गर्भनाशे ॥

**End:**

श्राद्धं तोयं कृशानुर्बलिकटकरणे दुःखनामाश्रुतौ न-
स्सा स्पृष्टी न प्रदाहावसुगमवहने तप्तकृच्छ्रेण शुद्धिः ।
जन्मन्येकोदकानां त्रिदिनमवगमे पिण्डभाजां दशाहं
सर्वेषां त्रि(:)श्रुतश्चेत् द्व्यदिनसाहिते प्रेतवन्मातुरस्यात् ॥

**Colophon:**

इत्याशौचाष्टकी समाप्ता ॥

## No. 3037. वैद्यनाथसङ्ग्रहः.

### VAIDYANĀTHASAṄGRAHAḤ

Pages, 2. Lines, 8 on a page.

Begins on fol. 41*a* of the MS. described under No. 3001.

Incomplete.

An abstract of the treatise on Āśauca (pollution) by Vaidyanātha.

**Beginning:**

औरसश्चैव पौत्रश्चतत्तु(श्चेत्पु)भौ सन्ततिरेव च ।
ततश्च पुत्रिकापुत्रतत्सन्ततिरनन्तरम् ॥
दत्त[श्च] त(स्त)त्सन्ततिश्चैव धनहारि(री) तथैव च ।

**End:**

आचार्यश्च सहाध्यायी जामाता च सखा ततः ।
स्त्रीहारी धनहारी च राजेत्थं कर्तृनिर्णयः ॥
दाहप्रभृति चैकोद्दिष्टान्ताः पूर्वा(:)क्रियाः स्मृताः ।
तदुत्तरास्सापिण्ड्यान्ता मध्यमास्समा(मुदा)हृताः ॥
तदूर्ध्वमुत्तराः.

---

## No. 3038. शुद्धिचन्द्रिका.

### ŚUDDHICANDRIKĀ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 36*a* of the MS. described under No. 2986.

Complete.

This is a work on Āśauca by Kālidāsa.

**Beginning:**

विप्रक्षत्रिययोस्सपिण्डजनने शुद्धिर्दशद्वादशा-
होरात्रैरथ पक्षकोपरि विश[ां]श्शूद्रस्य मासात्परम् ।

पुत्रीमज्जनतोऽथ सर्वजननीस्पर्शे दशाहाच्छुचिः
कर्माहो[त्] द्विदशाहतः पुरुषसूर्मासात्परं स्त्रीप्रसूः ॥
तद्वत्सर्वसपिण्डिनाञ्च कुलजे शुद्धिर्मृतेऽथाचतु(ः)-
पञ्चाश्वाहि(ह)दशाहिकास्थिचयनात्खण्डे तृतीयं(यां) शकम् ।
अङ्गाशौचमथो मृताहगणनात्साग्नेस्तु दाहात्परं
सर्वे वा दशरात्रिणोऽपि शुचयस्तत्सङ्करात्च्छूद्रवत् ॥

**End:**

सद्यस्सत्रिषु(पु)राश्रमी(मि)व्रतियतिब्रह्मज्ञबुध्या(लब्धा)पदां
स्वे स्वे कर्मणि शिल्पिदासभिषजावि(मि)ष्टस्य राज्ञो द्विजैः ।
ऋत्विङ्नि(ग्दीक्षि)तयोर्निमन्त्रितसदादात्रोर्मथो(हो)पद्रवे
भृत्यामात्यमहीभुजाश्च सकलाशौचेऽपि शुद्धिः स्मृता ॥
स्वं वर्णश्च वहेद्दहेदनुगतौ स्पृष्टौ शवास्थ्नो रुदन्
स्नात्वान्यो(यं)यदि तत्समस्त्रिदिवसैः दग्धेऽस्थि वर्णेऽपरे ।
बन्धोर्निर्हरणात् त्र्यहं सहवसन्नह्नान्यवासेऽन्नभुक्
तुल्यस्तैः शवसंस्कृतिश्च विधिना कृत्वा क्रियां स्याच्छुचिः ॥

**Colophon:**

इति कालिदासविरचिता शुद्धिचद्रिका समाप्ता ॥

---

## No. 3039. शुद्धिचन्द्रिकाव्याख्या.

## ŚUDDHICANDRIKĀVYĀKHYĀ.

Pages, 70. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2986.

Complete.

A commentary on the above work.

Said to have been copied for the use of Sanagavarapu Veṅkaṭa, on the 3rd day of the bright fortnight of the month of Māgha in the year Sarvajit.

**Beginning :**

विप्रक्षत्रिययोरित्यादि । इह यद्यप्यशौ(प्याशौ)चविधायकानि मनु-याज्ञवल्क्य(ल्क्यादिवचनानि)प्रमाणभूतानि भूयांसि सन्ति; तथापि तेषां बहुत्वात् कचिदस्फुटत्वात् कचिदन्योन्यविरुद्धाभिधानेनाव्यवस्थित-विषयत्वात्तान्येवोपजीव्य स्वस्य सञ्चरणाय सुधियाञ्च सुबोधाय ह(सा)राभि-धानपुरस्सरं व्यवस्थितविषयैः पञ्चविंशतिश्लोकैः नानाविध(ा)शौचशुद्धिसङ्ग्र-हायायमारम्भः । तत्र प्रसक्तमेव प्रतिषिध्यत इति न्यायेन शुद्धेराशौ-चाभावरूपत्वात् आशौचं कथं प्रसक्तमित्याकाङ्क्षायाम् ।

मनुः—

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ।
अशुद्धा बान्धवास्सर्वे सूतके च तथोच्यते ॥

अनुजाते अजातदन्ते इत्यर्थः । अत्र बान्धवास्सपिण्डाः ।

**End :**

एवं गृहपतिर्दग्धः सर्वं तरति दुष्कृतम् ।
यश्चैनं दाहयेत्सोऽपि प्रजां प्राप्नोति निन्दि(नन्द)नम् ॥

य(व)शगाश्चाथ भृत्याश्च इहामुत्र च निर्भयाः ।
अतिक्रम्यात्मनो भाव्यं स्थानमिष्टञ्च विन्दति ॥

एवमेषोऽग्निमान् यज्ञपात्रायुधविभूषितः ।
लोकानिमानतिक्रम्य परं ब्रह्मैव विन्दति ॥

तथा—

अनये(यै)वावृत्तनारी दग्धध्या(व्या)या व्यवस्थितः(ता) ।
अग्निप्रदानमन्त्रोऽस्या न प्रयोज्य[ा] इति स्थितिः ॥

इति । व्यवस्थितानुवृत्ता । तत्तु स्मार्ताग्निमद्विषयम् ।

निरग्नेरपि अग्निसम्बन्धिपात्र[ा]न्यासादिव्यतिरेकेण यथासम्भवमन्ये संस्कारधर्माः प्रयोज्य(ा) इति। आहिताग्नेरपि एतदुक्तो विरोधिसंस्कारकर्मा ग्राह्य इति ॥

**Colophon :**

इति काळिदासचन्द्रिकायां शुद्धिचन्द्रिकाव्याख्यानं समाप्तः(म्) ॥

---

No. **3040.** षडशीतिः–सव्याख्या.

ṢAḌAŚĪTIḤ WITH COMMENTARY.

Pages, 116. Lines, 6 on a page.

Begins on fol. 1*a* of the MSS. described under No. 2712.

A work on pollution consisting of 86 Ślōkas. It is devided into five Prakaraṇas of which only three are contained in this MS.

The text is by Kauśikāditya; and the commentary is by Lakṣmīnṛsiṁha, son of Dēvīvallabha.

Said to have been copied by Lakṣmīnārāyaṇa from the MS. of Bhaṭṭa Narasappa.

**Beginning :**

अत्र भगवान् कौशिकादित्यः मन्वादिसकलमुनिमतानालोक्य सुधियां सुबोधाय केवलाशौचविषयकं पञ्चप्रकरणात्मकं षडशीत्याख्यं ग्रन्थं चिकीर्षुराशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुख इति वचनात् ग्रन्थादौ मङ्गळमाचरन्नारभते अथेति ।

अथानेकर्षिवाक्यानां सारमादाय केवलम् ।
सङ्ग्रथ्य कौशिकादित्यो लिखत्याशौचनिर्णयम् ॥

अत्राथशब्दप्रयोगो मङ्गळार्थः । ग्रन्थादौ मङ्गळाचरणं निर्विघ्नपरिसमाप्तिकारणमिति स्मृतेर्विद्यमानत्वात्; अथशब्द आरम्भवाची वा ।

* * * *

तं सारं ग्रन्थीकृत्य केवलमाशौचस्य यावान् कालः तावत्कालमात्र-विषयकम्; न त्वाशौचाक्रियमाणकर्मविषयकम्। आशौचनिर्णयं लिखति। कौशिकादित्यो नाम ग्रन्थकर्ता सकलमुनिनिर्मितस्मृतिस्थितैरेव षडशीति-वाक्यैः षडशीत्याख्यं निबन्धनं करोति; न तु स्वकल्पितैरित्यर्थः ।

**End:**

आशौचान्तः कीकसादेः प्रदाहे शेषाच्छुद्धिः तद्भवाच्चे(त्परश्चे)त् त्रिरात्रम् ।
पुत्रस्यापि प्रागशौचग्रहश्चेत् नो चेत्तस्याप्यत्र सम्पूर्णमाहुः ॥

इति । अत्र सूत्रद्वये अनाहिताग्निमृतौ सत्यां पूर्वगृहीताशौचयोः पत्नीपुत्रयोः बहिर्दशाहादौ त्रिरात्राशौचाभिधानं दत्तपुत्रादिविषये आपद्वि-षयं विज्ञेयम् ।

**Colophon:**

इति श्रीसूरुभट्टान्वयपयःपारावारसुधाकरश्रीपद्मनाभतनूजश्रीदेवी-वल्लभसूनुलक्ष्मीनृसिंहविरचितायां षडशीतिव्याख्यायाम् अघशोधिनीसमा-ख्यायाम् असगोत्राशौचं सम्पूर्णम् ॥

विलम्बिनामसंवत्सरमाघबहुळ अष्टमी सोमवारं वरकु सूरुभट्ट-नरसप्प.

---

## No. 3041. षडशीतिः—सव्याख्या.

### ṢAḌAŚĪTIḤ WITH COMMENTARY.

Pages, 18. Lines, 7 on a page.

Begins on fol. 36*a* of the MSS. described under No. 2696.
Complete in five Prakaraṇas.

**Beginning:**

(अथानेकर्षि)वाक्यानि सङ्गत्यादाय केवलम् ।
सङ्गृह्य कौशिकादित्यो लिखत्याशौचनिर्णयम् ॥

अथपदं मङ्गळार्थम्; ग्रन्थादौ मङ्गळाचरणं निर्विघ्नपरिसमाप्त्य(र्थे)-मिति स्मृतेर्विद्यमानत्वात् ग्रन्थादौ दत्तवान् । अनेकर्षिवाक्यानि सङ्गृह्यादाय सङ्ग्रह्य कौशिकादित्यः केवलमाशौचं लिखति ।

आशौचं द्विविधं प्रोक्तं धौ(जा)तकं मृतकं तथा ।
अल्पश्चैवाधिकश्चेति तत्पुनर्द्विविधं स्मृतम् ॥

आशौचं जाताशौचमृताशौचभेदेन द्विविधम् उक्तम् । तत्पुनर्द्विविधमपि अल्पाधिकभेदेन द्विविधं भवति । एवमाशौचस्य चातुर्विध्यमुक्तं भवति ।

पुत्रीसूतौ गृहे गर्भपाते नाल्पन्तु जातकम् ।
तदन्यमधिकं जातं जातिभेदात्तु तन्मतम् ॥

**End:**

ज्ञातीनां मरणे ब्रह्मचारिणां नास्त्यशौचता ।
अतस्तिलोदकं तेभ्यो न दद्युर्ब्रह्मचारिणः ॥

स्पष्टम् ।

मातापित्रोर्मृतौ ब्रह्मचारिणामस्त्यशौचता ।
पितृभ्यामपि तैस्तस्माद्देयमेव तिलोदकम् ॥

मातापित्रोर्मरणे ब्रह्मचारिणामप्याशौचमस्ति । इदं भ्रातृमरणस्याप्युपलक्षणम् । तस्माद्ब्रह्मचारिभिः पितृभ्यां तिलोदकं देयम् । अपिशब्दात् भ्रातुरपीत्यर्थः ।

स्वाचारादपि ये भ्रष्टाः पतिता ये च दूषिताः ।
न दद्युरुदकं तेभ्यो ये चान्ये नास्तिकास्तथा ॥

स्पष्टम् ।

स्नानं जपं तथा होमं पूजामतिथिसत्क्रियाम् ।
अकृत्वा भुञ्जते ये तु तेषां भस्मान्तसूतकम् ॥

**Colophon:**

इति श्रीमहोपाध्यायकौशिकादित्यकृतौ षडशीतौ स्मृतिधर्मशास्त्रे आशौचापवादप्रकरणम् ॥

ग्रन्थश्च समाप्तः ॥

१. सूतकप्रकरण.
२. सगोत्राशौचप्रकरण.
३. असगोत्राशौचप्रकरण.
